पुस्तकालय

क्रियासारः

KRIYASARA

Edited with notes

By

Mīmāṁsā-Sāhitya-Dharmaśāstra-Jyotiṣa-Vidvān
Nigamāgamapraviṇa
Paṇḍitaratnaṁ Vedavāridhi Vidyābhāskara
Dharmaśāstrābhijña

KOTA VASUDEVA SOMAYAJI

STATE AWARDEE

RTD. PROFESSOR OF DHARMASASTRA

MAHARAJA SANSKRIT COLLEGE

MYSORE

1996

JACL-KRC
015299

राष्ट्रिय संस्कृत संस्थान, जयपुर परिसर

पुस्तकालय

पुस्तक संख्या .....

वर्गीकरण संख्या .....

15299

15299

राष्ट्रिय संस्कृत संस्थान
जयपुर परिसर
पुस्तकालय
क्रमांक... 15299

राष्ट्रिय संस्कृत संस्थान, जयपुर परिसर

पुस्तकालय

वर्गीकरण सं. .....

पुस्तक सं. 15299 दिनाङ्क .....

यह पुस्तक नीचे अङ्कित तिथि या उससे पूर्व लौटा दी जानी चाहिये। यदि पुस्तक निर्धारित तिथि से अधिक समय तक पाठक अपने पास रखेंगे तो 50 पैसे प्रतिदिन के हिसाब से विलम्ब शुल्क देय होगा।

राष्ट्रिय संस्कृत संस्थान
जयपुर परिसर, जयपुर
पुस्तकालय
क्रमांक 15299

12.2P

केन्द्रीय संस्कृत
जयपुर-15
पत्र प्राप्ति सं: 407
10/3/98

क्रियासारः

IS 299

FORWARDED FREE OF COST WITH
THE COMPLEMENTS OF RASHTRIYA
SANSKRIT SANSTHAN - NEW DELHI.

राष्ट्रिय संस्कृत
जयपुर परिसर, जयपुर
पुस्तकालय
क्रमांक...IS299

मीमांसा-साहित्य-धर्मशास्त्र-ज्यौतिष-विदुषा
निगमागमप्रवीणेन
पण्डितरत्नं वेदवारिधिः विद्याभास्करः धर्मशास्त्राभिज्ञः इत्यादि
बिरुदभाजा राज्यप्रशस्तिपुरस्कृतेन
कोट वासुदेवसोमयाजिना
महाराजसंस्कृतमहापाठशालानिवृत्तधर्मशास्त्रप्राध्यापकेन
संशोध्य लघुटिप्पण्या सह प्रकाशितः

शा. श. १९१८

प्रकाशकः

के. वासुदेवसोमयाजी
'मनीषा' १४६९/१, कृष्णमूर्तिपुरम्,
मैसूर–५७० ००४ ☎ ५६३४२८

सर्वेऽधिकाराः ग्रन्थकृता स्वायत्तीकृताः

किमासाराभिधं रत्नं गुरुपादेषु भक्तितः ।
अर्प्यते वासुदेवेन सदाऽस्तु विदुषां मुदे ॥

JACL-KRC
015299

मूल्यम्

विशेषरक्षापत्रयुतस्य १२०-०० रूप्यकाणि

मुद्रकः

साम्राज्यं मुद्रणालय, रामकृष्णनगर, मैसूर–२३ फोन् : 566380

Copies can be had of :

K. VASUDEVA SOMAYAJI "MANEESHA"
1469/1, Krishnamurthy Puram, Mysore-570 004 Ph. 563428

राष्ट्रिय संस्कृत संस्थान
पुस्तकालय
क्रमांक 15297

उपोद्घातः

विदितमेव सर्वेषां यत् मनुजेन श्रेयःसाधने प्रयत्नो विधेयः इति। यद्यपि यागादीनि श्रेयःसाधनानि बहूनि सन्ति। तथाऽपि सुलभतया श्रेयःसाधनमागम एव। अत्र वक्तव्यो विशेष अनुष्ठानपद्धतिप्रकाशनावसरे उक्त इति न पुनरुच्यते। अनुष्ठानपद्धति-प्रकाशनावसरे क्रियासारस्यापि प्रकाशनेच्छा प्रदर्शिता। मदीयभागधेयाद् गुरोरनुग्रहाच्च सेच्छा विलम्बेनापि सम्पूर्णेति प्रमुदितं मे चेतः।

यद्यप्यागमप्रयोगविज्ञानमनुष्ठानपद्धत्या सुलभम्, तथाऽपि विशेष-जिज्ञासूनां मूलग्रन्थदर्शनेहा स्वाभाविकी। तत्रानुष्ठानपद्धतेर्मूलं तन्त्र-समुच्चयः तस्यापि मूलं क्रियासारादय इत्यनुष्ठानपद्धतिप्रकाशनावसरे प्रतिपादितम्।

तन्त्रसमुच्चयश्चातीव प्रौढत्वाद्दुर्ज्ञेयः, स इदानीं दुर्लभोऽपि क्रियासारोऽप्येतावत्पर्यन्तं ताडपत्रेष्वेव सुप्त आसीत्। स च एकषष्टिपटलैः शिवादि सप्तदेवानां प्रतिष्ठास्नपनोत्सवप्रायश्चित्तजीर्णोद्धारादिक्रियाकलापं बोधयति।

ग्रन्थस्यास्य कर्तु-र्देशकालादिकं नाम च न ज्ञायते। व्याघ्रग्रामा लयेन नारायणेनास्य प्रयोगप्रतिपादिका विस्तृता व्याख्या कृता। प्रयोग-परिज्ञानं चानुष्ठानपद्धत्या भवतीति मन्वानेन मया ग्रन्थगौरवभीत्या च सा न प्रकाशिता। अथापि यत्र विशयो जायते तत्र लघुटिप्पणी विरच्य योजिता। अयं च क्रियासारः तद्व्याख्या च पश्चिमसमुद्रतीर-प्रदेशेषु सेतोरागोकर्णं विशेषतः उपलभ्यते। तत्रत्यैश्च प्रमाणत्वेन विशेषतः स्वीक्रियते। अतः क्रियासारकारः परशुरामक्षेत्रोत्पन्नः इति विभाव्यते। व्याख्याकारः परं केरलभाषायां पदार्थविवरणात् केरलीय इत्यत्र न मनागपि संशीतिः उपलब्धेष्वादर्शेषु यत्रैकरूप्यं दृश्यते विशेषपाठा-वश्यकता च, तत्र चतुरस्रकंसाङ्कितो भागः मद्रचितः समावेशितः।

महीशूरप्राच्यविद्यालयेऽप्येकं पुस्तकं दृष्टं तत्र मदीयादर्शापेक्षया विशेषादर्शनात्तदादर्शत्वेन न स्वीकृतम् ।

तत्रैते तुळुलिपिषु विद्यमाना ताडपत्रस्था आदर्शग्रन्थाः ।

१) ब्रह्मश्री बेङ्गळूरु गणपतिसोमयाजिसम्बन्धी क संज्ञः ।

२) मन्निकटस्थः ख संज्ञः ।

३) ब्रह्मश्री कोटफणिधरसोमयाजि सम्बन्धी ग संज्ञः ।

४) ब्रह्मश्री गणपतिसोमयाजि सम्बन्धी व्याख्यासहितः घ संज्ञः ।

एतेषामादर्शपुस्तकदातॄणामौदार्यमभिनन्दामि ।

एतद्ग्रन्थविषये सदभिप्रायं दत्तवतां श्रीपलिमारु-भण्डारकेरिस्वामि-पादानां तथा पेजावर श्रीस्वामिपादानां च सन्निधौ शतशः नतयः समर्प्यन्ते । तथा श्री वी. आर्. शर्ममहोदयानामभिप्रायं दत्तवतां विषये कार्तज्ञ्यं वहामि । परिश्रमेण संशोधितेऽपि कार्यान्तरव्याप्तत्वेन मानवसहजभ्रम प्रमादादिना आयसाक्षरमुद्रणैश्च सम्भाविता दोषाः क्षन्तव्याः । परिश्रमं सोढ्वा मुद्रणं कृतवतां साम्राज्यं मुद्रणालयाधिकारिणामुपकारं न विस्मरामि । अनेन विदुषामनुष्ठातॄणामीषदप्युपकारो भवेच्चेद्धन्यमात्मानं मन्ये ।

द्वितीयमुद्रणं प्रति–

प्रथममुद्रणमेव दुःशकं संस्कृत ग्रन्थानां, विशेषतः आगम ग्रन्थानां, तत्रापि परिमित प्रदेशे लब्धप्रचारस्य । तथापि विदुषां प्रोत्साहात् द्वितीयं मुद्रणमलभतेति ज्ञात्वा मोमुद्यते मे चेतः । अल्पकालेन मुद्रणं कृतवतां साम्राज्यं मुद्रणालयाधिकारिणां कार्तज्ञ्यं वहामि । एवमेव प्रोत्साहलाभे एतन्मूलभूत विष्णुसंहितायाः सटिप्पण्याः प्रकाशनं निरीक्षितम् । शीघ्रमेव विष्णुसंहीता प्रकटी भूयादित्याशास्महे ।

ओं तत् सत्

युवमाघबहुळचतुर्थी **विदुषामनुचरः**

शा. श. १९१८ **कोट वासुदेवसोमयाजी**

H. H. Sri Vidyamanyatheertha Swamiji
Sri Palimaru & Bhandarkeri Mutts
UDUPI - 576101 (S. K.)

श्री विद्यामान्यतीर्थ स्वामीजी
पलिमारु – भण्डारकेरीमठ
उडुपि

Camp : अदमार
Date : 3–12–1979

श्रीविष्णु-श्रीशिवपूजाकलशोत्सवादिप्रयोगाणां प्रमाणोदाहरणपूर्वकं प्रतिपादकः अपूर्वः क्रियासाराख्यः तन्त्रसमुच्चयादपि प्राचीनः ग्रन्थरत्नराजः अयं कोटग्रामस्थैः विद्वद्रत्नैः श्रीवासुदेवसोमयाजिभिः महता प्रयत्नेन संशोध्य अणुटिप्पण्या च संयोज्य सम्प्रकाशितः ।

एतैः महाभागैः एतादृशाः बहवः ग्रन्थाः प्रकाशिताः । एवमेव प्रतिवत्सरं अपूर्वा ग्रन्थाः प्रकाशयिष्यन्ते च । धर्मग्लानिमपि असहमानः वासुदेवो भगवान् एतेषु सन्निहितः एतादृशं धर्मोद्धारकार्यं कारयिष्यति इति वयं विश्वसिमः ।

सकलसज्जनसमुदायः इमं ग्रन्थं उपादाय एतदुक्तप्रकारेणैव स्वग्राम-देवालयेषु पूजोत्सवादिकं प्रवर्तयतु । प्रतिवत्सरं एतैः प्रकाश्यमानग्रन्थानां विशेषरूपेण साहाय्यं च प्रयच्छतु ।

एतेभ्यः पवित्रतमकार्यनिरतेभ्यः सोमयाजिभ्यः भगवान् श्रीवासुदेवः पूर्णायुरारोग्यादिभाग्यमनुगृह्णातु इति सम्प्रार्थयामः ।

इति नारायणस्मरणम्
श्री श्री विद्यामान्यतीर्थ श्रीपादाः
श्री पलिमारु-भण्डारकेरि मठ

H. H. Vishweshathirtha Swamiji
SRI PEJAVARA MUTT
Jagadguru Madhwacharya Samsthanam
UDUPI – 576101, South Kanara
Phone : 8498

श्री विश्वेशतीर्थ स्वामीजी
श्री पेजावर मठ
जगद्गुरु मध्वाचार्य संस्थान, उडुपि

मुक्काम : बेङ्गळूरु
ता. 18–12–1979

महीशूर संस्कृतकलाशाला-धर्मशास्त्रप्राध्यापकाः श्री वासुदेवसोमयाजिनः क्रियासाराभिधमपूर्वमागमग्रन्थं संशोध्य प्रकटीकुर्वन्तीति परं प्रहृष्यामः। विष्णुशिव-दुर्गादि विविधदेवतापूजाप्रकारनिरूपणेन जनानां नितरा-मुपकारकस्यास्य ग्रन्थस्य प्रकाशनं सकलदेवालयेषु पूजादिकार्यकलापप्रवर्तनाय सुतरां साहाय्यं आदधातीति श्री सोमयाजिनां प्रयतनमिदं समभिनन्दामः। राज-कीयाधिपत्य, देवालयादि संस्थाः महाजनश्चास्मिन् कार्ये सर्वविधं सहकारमातन्वन्तु इत्याशास्महे।

श्री श्री विश्वेशतीर्थ श्रीपादाः
उडुपि श्री पेजावर मठ

बी. आर. शर्मा
पञ्जाबविश्वविद्यालयस्य निवृत्तः
प्राध्यापकः

मैसूरु
22–12–1979

क्रियासारोऽयं संग्राहात्मक आगमग्रन्थः श्रीमता वासुदेवसोमयाजि महाशयेन यथामति संस्कृत्य प्रकाश्यते। एतत्संम्पादने सोमयाजिना विद्वद्वरेण चतस्रृणां मातृकाणां तुळुलिप्यां लिखितानां कृतस्तूपयोगः। अध्येतृणां संशोधकानां च कृते तत्र तत्र टिप्पणिर्लघुर्लिखिता च। अस्य ग्रन्थस्योपरि विस्तृता नारायणेन लिखिता व्याख्या परं ग्रन्थविस्तारभयादत्र संपादकेन न प्रकाशिता।

ग्रन्थोऽयं परशुरामक्षेत्रदेवालयसम्प्रदायानुसारी विशेषतः तुळुकेरल-प्रान्तीयदेवालयप्रतिष्ठादिपद्धतिं प्रमाणीकृत्य संगृहीतो वर्तते। अत्र सप्तानां देवतानां शिव-विष्णु–हरीश-दुर्गा–स्कन्द–विघ्नेश्वर–शास्तृणां प्रतिष्ठादिक्रमो वर्ण्यते। शास्ताऽयं भूतनाथः केरळेषु केवलं लब्धप्रचारः।

आन्ध्रद्राविडकर्नाटकेषु यः सम्प्रदायः परंपरागतो देवालयनिर्माणवेर-प्रतिष्ठाद्यायत्तोऽनुस्रियते स हि शैव-वैखानस-पञ्चरात्रागमानामन्यतमं प्रमाणी-करोति। तुळुकेरलप्रान्तेषु परं अद्यापि यः सम्प्रदायोऽनुच्छिन्नः प्रचरति तस्य सम्यगध्ययनं विमर्शकाः सत्यान्वेषिणः कर्तुमर्हन्ति। समयाभावादयं विषयो मयाऽत्र न स्पृश्यते।

सोमयाजिमहाशयः सर्वदा स्वाध्याययज्ञे व्यापृतो भवति। अनुष्ठान-पद्धत्याख्यो ग्रन्थो यः पूर्वं प्रकाशितो विदुषाऽनेन क्षेत्रमिदमेवाधितिष्ठति। धर्मशास्त्रे अन्यत्र च विषये बहुकृतपरिश्रमोऽयं विद्वद्वरः समेषां संस्कृताभि-मानिनां प्रशंसामर्हत्येव।

इति बी. आर्. शर्मा

विषयानुक्रमणिका

पटल:	विषय:	पृष्ठम्
	शैवभाग:	
१	वरणादि	१
२	लिङ्गनिर्माणादि	१०
३	मण्टपसंस्कारादि	१९
४	अधिवास:	२४
५	प्रतिष्ठाविधि:	२९
६	अर्चनाविधि:	३४
७	प्रायश्चित्तम्	३९
८	जीर्णोद्धार:	४४
९	स्नपनम्	५०
१०	उत्सव:	६१
	वैष्णवभाग:	
१	भूपरिग्रहादि	७३
२	अङ्कुरादि	८१
३	मण्डपसंस्कारादि	८७
४	अधिवासादि	९७
५	प्रतिष्ठाविधि:	१०५
६	बलिपीठिकाप्रतिष्ठा	११४
७	अर्चना	१२०
८	प्रायश्चितम्	१२५
९	स्नपनम्	१३२
१०	उत्सव.	१३९
	शांकरनारायणभाग:	
१	वरणेष्टकाधानादि	१४८
२	दीक्षाविधि:	१५१
३	अङ्कुरादि	१५५
४	अधिवास:	१६३
५	प्रतिष्ठा	१६५
६	मन्त्रोद्धार:	१६७
७	स्नपनम्	१७१
८	उत्सव:	१७९
	दुर्गाभाग:	
१	भूपरिग्रहादि	१८५
२	प्रासादशुद्धि:	१९०
३	अधिवास:	१९७
४	प्रतिष्ठा	२०४
५	पूजाविधि:	२०९
६	स्नपनम्	२१५
७	प्रायश्चित्तम्	२१८
८	उत्सव:	२२०
	स्कन्दभाग:	
१	मन्त्रोद्धार:	२२३
२	पूजाविधि:	२२६
३	अग्निजननम्	२२९
४	भूपरिग्रहादि	२३१
५	इष्टकाधानम्	२३३
६	निधिकलश:	२३४
७	अङ्कुरारोपणम्	२३६
८	प्रतिमापरिग्रहादि	२३७
९	रत्नाधिवासादि	२४४
१०	प्रतिष्ठा	२४६
११	स्नपनम्	२५१
१२	उत्सव:	२५८
१३	प्रायश्चित्तम्	२६४
१४	जीर्णोद्धार:	२६८
	विनायकभाग:	
१	प्रतिमानिर्माणादि	२७३
२	प्रतिष्ठाकलाप:	२७५
३	मन्त्रोद्धारादि	२८४
४	प्रायश्चित्तम्	२८६
५	उत्सव:	२८७
	शास्तृभाग:	
१	प्रासादनिर्माणादि	२९०
२	रत्नन्यासादि	२९७
३	पूजाविधि:	२९९
४	मन्त्रोद्धारादि	३०१
५	उत्सव:	३०५
६	प्रायश्चित्तम्	३०९

श्रीः

महागणपतये नमः

क्रियासारः

प्रथमः पटलः

गणेशानं[1] नमस्कृत्य शिवं नारायणं प्रभुम् ।
क्रियासारं[2] प्रवक्ष्यामि समासाच्च[3] समाहितः ॥ १

प्रतिष्ठां कर्तुकामो यः स पूर्वं वरयेद्गुरुम् ।
तन्त्रज्ञं[4] दीक्षितं भक्तमभिषिक्तं समूर्तिपम् ॥ २

सर्वलक्षणसम्पन्नं निर्दोषं सत्यवादिनम् ।
स्वच्छं प्रसन्नं सन्तुष्टं श्रीमन्तं रोगवर्जितम् ॥ ३

दशबाहुं विघ्नहरं देव्यालिङ्गितपार्श्वकम् ।
महागणपतिं वन्दे निर्मलज्ञानसम्पदे ॥
भागीरथीनृसिंहाख्यौ पितरौ स्तौमि स्वर्गतौ ।
यत्प्रसादान्मयाऽवाप्तं विद्या ज्ञानं धनं यशः ॥
पितुर्गुरोर्मयाऽवाप्तो वेदागमनिधिः शुभः ।
व्याख्यास्यामि क्रियासारं मद्बुद्धिविशदीकरम् ॥

1 स्वाभीष्टसिद्धये इष्टदेवतां नमस्करोति गणेशानमिति ।
2 व्याख्याकारेण क्रियासारसंहितेति ग पुस्तके क्रियासारतन्त्रमिति च निर्दिष्टम् ।
4 आचार्यं वरयितुमाचार्यलक्षणमाह – तन्त्रज्ञमिति ।

---

3 समासतः ग

देवागारे गृहे वाऽपि मार्जनालेपनादिभिः ।
संशोध्य[1] [2] भूमिं विन्यस्येत्साम्बराण्यासनानि च ॥ ४

सन्दर्भैरुपवेश्यैनं[3] प्रार्थितं मूर्तिभिः सह ।
प्रक्षाळ्य पादौ हस्तावप्याचम्य सकलीकृतः ॥ ५

शार्वे[4] दर्भान्विकीर्येषु यजमानोऽथ सादयेत् ।
पात्राणि प्रणवेनैव सकूर्चानि यथाक्रमम् ॥ ६

उत्तानीकृत्य पात्राणि प्रोक्षण्यां[5] संस्कृतैर्जलैः ।
प्रोक्ष्य पात्रेषु कूर्चांश्च विन्यसेत्प्रणवेन तु[6] ॥ ७

पाद्यमर्घ्यं[7] तथाचामं योजयित्वाऽभिमन्त्रयेत् ।
मूलेन मूर्तिमन्त्रैश्च,[8] ततो दद्यात्[9] [10] क्रमेण तु ॥ ८

पाद्यार्घ्याचमनं वस्त्रयुगळं चाङ्गुलीयकम् ।
मूलेन गुरवे सर्वं मूर्तिपेभ्यः स्वमन्त्रकैः ॥ ९

दद्यादुगन्धादिभिः सर्वानाराध्यार्घ्यं निवेद्य च ।
पायसं भोजयेत्साज्यं भुक्त्वाऽऽचान्तेषु शक्तितः ॥ १०

दद्याच्च दक्षिणां भक्त्या प्रणिपत्याभिवाद्य च[11] ।
दत्वाऽर्घ्यं वरयेद्भूयः पाणावालम्ब्य पाणिना ॥ ११

"मया सम्पूजितैरत्र दक्षिणाभिश्च तोषितैः ।
क्रियतां शिवयागो मे प्रार्थयामि प्रसीदतु" ॥ १२

ओं तथेति गुरुर्ब्रूयाद्वरयेन्मूर्तिपानपि ।
मन्त्रैरेभिर्नमस्कृत्य दत्वार्घ्यमभिवाद्य च ॥ १३

---

1 पूर्वमेव । 4 ऐशान्यां । 7 पाद्यादि द्रव्याणि ।
8 शर्वाय क्षित्यात्मने नमः इत्यादयो मूर्तिमन्त्राः ।
9 पात्रान्तरे पाद्यादि गृहीत्वा । 11 नमः शिवाय साम्बायेत्यादिना ।

---

2 सम्पाद्य ग 3 धूपविश्यैनं ख
5 प्रोक्षिण्या ख 6 यजमानोऽथ सादयेत् ग 10 दर्भान् ग

क्षमाग्नियजमानार्कवारीरणनिशाकराः ।
व्योमान्ता मूर्तयस्त्वेताः[1] शर्वाद्याख्याभिरीरिताः[2] ॥ १४
शर्वो रुद्रः पशुपतिरीशानो भव एव च ।
तथैवोग्रमहादेवौ भीमान्ताः कथिताः क्रमात् ॥ १५
क्षितिर्वै[3] धार्यते लोकान् लोकाः क्षितिमयाः स्मृताः ।
सर्वगं[4] क्षितिरूपं ते क्षितिमूर्ते नमोऽस्तु ते ॥ १६
अग्निर्वै धार्यते लोकान् लोका अग्निमयाः स्मृताः ।
सर्वगं चाग्निरूपं ते अग्निमूर्ते नमोऽस्तु ते ॥ १७
यज्ञो धारयते लोकान् लोका यज्ञमयाः स्मृताः ।
सर्वगं यज्ञरूपं ते यज्ञमूर्ते नमोऽस्तु ते ॥ १८
सूर्यो वै धार्यते लोकान् लोकाः सूर्यमयाः स्मृताः ।
सर्वगं सूर्यरूपं ते सूर्यमूर्ते नमोऽस्तु ते ॥ १९
जलं वै धार्यते लोकान् लोका जलमयाः स्मृताः ।
सर्वगं जलरूपं ते जलमूर्ते नमोऽस्तु ते ॥ २०
वायुर्वै धार्यते लोकान् लोका वायुमयाः स्मृताः ।
सर्वगं वायुरूपं ते वायुमूर्ते नमोऽस्तु ते ॥ २१
सोमो धारयते लोकान् लोकाः सोममयाः स्मृताः ।
सर्वगं सोमरूपं ते सोममूर्ते नमोऽस्तु ते ॥ २२
आकाशो धार्यते लोकान् लोकाकाशमयाः[5] स्मृताः ।
आकाशं सर्वरूपं ते मूर्त्याकाश[6] नमोस्तु ते ॥ २३
नमस्कृत्य प्रसाद्यैभि[7]र्मूर्तिपानितरानपि ।
वरये[8]द्यजमानस्तानाचार्यवचने स्थितान् ॥ २४

---

1 शर्वाय क्षितिमूर्तये नमः रुद्रायाग्निमूर्तये नम इत्याद्यो नमस्कार मन्त्राः ।
3 आगमोक्ता नमस्कारमन्त्राः उच्यन्ते । 8 भृत्यादीनामपि वरणमाह ।

---

2 शर्वाख्याद्याभिः ग 4 सर्वाङ्गं क., ग 5 व्योममयाः ख
6 सर्वगं व्योमरूपं ते व्योममूर्ते । 7 द्यैवं ख

शिववत्पूजयेद्भक्त्या[1] गुरुमूर्तिधरानपि ।
तैः कर्म कारयेद्यत्नात् वित्तशाठ्यविवर्जित ॥ २५

वृतो यो यजमानेन गुरुमूर्तिधरैस्सह[2] ।
कर्म कुर्याद्यथा न्यायं तीर्थस्नानावसानकम् ॥ २६

ज्ञात्वा परीक्ष्य निर्दोषामुर्वी गुणसमन्विताम् ।
प्राकारान्तां[3] प्रकल्प्यात्र भूतकूरबलिं[4] हरेत् ॥ २७

मध्ये दिशासु परितो मन्त्रेणानेन देशिकः ।
गन्धादिभिरथाभ्यर्च्य श्रद्धाभक्तिसमन्वितः ॥ २८

"देवताभ्यः पितृभ्योऽथ भूतेभ्यः सह जङ्गमैः ।
एतत्स्थाननिवासिभ्यः प्रयच्छामि बलिं नमः" ॥ २९

मध्यतः प्राङ्मुखः स्थित्वा कृतरक्षः समाहितः ।
अमुना प्रार्थ्य गुल्मादी[5] नस्त्रेणाथ विशोधयेत् ॥ ३०

भूतानि राक्षसा वापि येऽत्र तिष्ठन्ति केचन ।
ते सर्वेऽप्यप[6]गच्छन्तु स्थानं कुर्यां कपर्दिनः ॥ ३१

यस्यै[7] यस्यै क्रिया कार्या तस्यै मन्त्रं[8] समूहयेत् ।
शोधितां बहुशः कृष्टां[9] मात्वा ज्ञात्वा दिशः[10] पुनः ॥ ३२

दिक्षु संस्थापयेच्छङ्कूनस्त्रेणाराधितान्[11] क्रमात् ।
सूत्रं प्रसार्य चास्त्रेण कुर्याद्भूमिपरिग्रहम् ॥ ३३

स्नात्वा नवाम्बरधरो यष्टियुग[12]हलैर्नवैः ।
सद्येन[13] कृष्ट्वा वामेन[14] बीजानि निवपेत्पुनः ॥ ३४

---

1 दर्शने वन्दनाविना । 7 षष्ठचर्थे चतुर्थी । 8 स्थानं कुर्यामहं हरेः इत्यादि । 11 पाशुपतेनेति व्याख्यायां । 13 सद्योजातमन्त्रेण । 14 वामदेवमन्त्रेण ।

---

2 रपि ग 3 प्राकारान्तं ख 4 क्रूरबलिं ग 5 गुर्वादीन् ख
6 प्यव ख 9 कृत्वा ग 10 दिशं म 12 यष्ट्वा युग्म ख

भीमेन[1] सिक्त्वा परितो वृतिमीशेन[2] कल्पयेत् ।
वक्त्रेण[3] फलिते गोभिर्भक्षयित्वा निवासयेत् ॥ ३५

सुमुहूर्ते खनेद्भूमिमश्मान्तं वा[4] जङ्घान्तिकम् ।
वेदिं कृत्वा यजेद्वास्तुं पदानीशे[5] प्रकल्पयेत्[6] ॥ ३६

मध्येऽत्र नवकं दिक्षु षट्कं द्वे द्वे द्विकेऽन्यतः ।
द्वात्रिंशद्बहिरभ्यर्च्यास्त्रिपञ्चाशत्तु देवताः ॥ ३७

ईशानं चैव पर्जन्यं जयन्तेन्द्रौ दिवाकरम् ।
सत्यं भृशान्तरिक्षौ च वह्निं पूषणमेव च ॥ ३८

वितथं ग्रहक्षतयमौ गन्धर्वं भृङ्गराजकम् ।
मृगं पितृन्[7] दौवारिकं सुग्रीवं पुष्पदन्तकम् ॥ ३९

वरुणासुरशापांश्च[8] रोगं वाय्वहि[9]मुख्यकान् ।
भल्लाटेन्द्रर्गळांस्तद्व[10]द्दितिं चादितिमर्च येत्[11] ॥ ४०

बाह्ये[12]ऽन्तर्द्विकयोरीशे आपं चैवापवत्सकम् ।
आर्यकं चैव सावित्रं[13] सवितारं हुताशने ॥ ४१

दक्षिणे च विवस्वन्तमिन्द्रमिन्द्रजयं पुनः ।
मित्रं रुद्रं रुद्रजयं महीधरपितामहौ ॥ ४२

दिग्विदिक्षु बहिस्त्वेतान्[14] क्रमेणाभ्यर्च्य येद्ग्रहान् ।
शर्वस्कन्दं चार्यमणं जम्भकं पिलिपिञ्छकम् ॥ ४३

चरकीं च विदारीं च पूतनां पापराक्षसीम् ।
शर्वादि कोणेष्विष्ट्वैतां[15] श्चतस्रस्तद्बहिः पुनः ॥ ४४

---

1 अघोरेण । 2 ईशानेन । 3 तत्पुरुषेण ।
4 वा शब्दात्पुरुषप्रमाणान्तं । 5 ईशे एकाशीति पदानि ।
12 मण्डलाद् बाह्ये पूर्वेणान्वयः 13 सावित्रस्य प्राथम्यं चिन्त्यम् ।

---

6 प्रकल्प्य तु ख 7 पित्र्यं ग 8 शेषाश्च ग
9 वाय्वभि ख 10 स्तत्र ख 11 मुच्चरेत् ख
14 बिशि दिक्षु बहिष्वेतान् ख 15 ष्विज्यैता ख

देवांश्चैवासुरांश्चैव[1] गन्धर्वान् यक्षसंज्ञकान् ।
पितॄंश्चैवा[2]थ नागांश्च राक्षसांश्च पिशाचकान् ।। ४५
पाद्यार्घैर्नामभिः पूजां कृत्वा तेभ्यो बलिं हरेत् ।
कुशपुष्पाक्षतान्नाद्भिस्तत्र[3] सर्वान् क्षमापयेत् ।। ४६
एवं वास्तुबलिं कृत्वा संशोध्यात्र विधि[4] न्यसेत् ।
मध्ये रत्नादि निक्षिप्य मूलेनैव यथाविधि ।। ४७
तत्राक्षराम्बुजं[5] ध्यात्वा तस्मिन् शक्तिं[6] तु विन्यसेत् ।
गन्धपुष्पैः समाराध्य भक्त्या विज्ञापयेत्तु ताम्[7] ।। ४८
"त्वमेव परमा शक्तिस्त्वमेवासनधारिका ।
देवाज्ञया त्वया देवि स्थातव्यमिह सर्वदा" ।। ४९
विज्ञप्यैवं तदूर्ध्वं तु कल्पयेदक्षराम्बुजम् ।
तस्मिन् कूर्मशिलां न्यस्येद्गन्धाद्यैरभि[8] पूजिताम् ।। ५०
राजतं विन्यसेत्कूर्मं सौवर्णं तद्वदेव तु ।
अकूपाराय नत्यन्तस्तारादिः पूजने मनुः[9] ।। ५१
एवं कूर्मशिलां न्यस्य प्रार्थ येन्मनुनाऽमुना ।। ५२
"नमस्ते कूर्मरूपाय विष्णवे विश्वधारिणे ।
करिष्यमाणं प्रासादमिह त्वं धर्तु[10]मर्हसि" ।। ५३
दक्षिणे विघ्नमाराध्य द्वारदेशे शिवं यजेत् ।
पूरयेदश्मभिर्मृद्भिर्गर्तं समतलं यथा ।। ५४
द्वारस्य दक्षिणे पार्श्वे विन्यसेत्प्रथमेष्टकाम्[11] ।
तत्रोत्तरेऽग्निं निक्षिप्य कुर्यादग्निमुखं ततः ।। ५५

5 तत्र गर्तेऽक्षराम्बुजम् । 6 ओं ह्रीमाधारशक्त्यै नमः इति ।

1 श्चापि ग 2 पितरश्च ग 3 स्ततः ख 4 निधि ग
7 तान् ख 8 रपि ख 9 येत् मनुम् ख
10 स्थातु ख 11 काः ख

पञ्चार्णेन[1] हुनेदिध्मं तारेणा[2]धारचक्षुषी ।
व्यस्तैः[3] पञ्चाक्षरैराज्यं पक्वं वक्त्रेण होमयेत् ।। ५६
ब्रह्मभिश्च[4] [5] घृतं हुत्वा वक्त्रेण समिदादिकम् ।
समित्सर्पिश्चरुघृतं हुनेदष्टोत्तरं शतम् ।। ५७
पूर्णां द्रव्यान्तरे दद्याद्यथावद्व्योमविद्यया ।
आदित्रिदीर्घविन्द्वन्त[6]व्योमव्यापि पदं पुनः ।। ५८
नेऽन्त[7]प्रणवयोर्मध्ये व्योमव्यापि दशाक्षरः ।
व्याहृतिभिर्दिशापालै[8]रग्नयेऽतः परं क्रमात् ।। ५९
सोमाय च ग्रहेभ्यश्च नक्षत्रेभ्यश्च होमयेत् ।
भूतेभ्यश्चैव नागेभ्यः सर्वाभ्यः[9] सर्पिषा क्रमात् ।। ६०
देवताभ्यश्च विश्वेभ्यो देवेभ्यो मूलविद्यया ।
व्याहृत्यन्तं ततो हुत्वा हुनेत् स्विष्टकृदादिकम् ।। ६१
इष्टकानु च[10] सम्पातं सिक्त्वा मूलं जपेत् स्थितः ।
एकादश परं [11] [12] देवं प्रणम्याग्निं विसर्जयेत् ।। ६२
इष्टका[13] [14] विन्यसेद्भूयः सद्योजातकलाष्टभिः ।
इन्द्रादीशानपर्यन्तं विन्यसेत् पुनरिष्टकाः ।। ६३
कलशे पूरितैरद्भिः पूरयेद्[15]गर्तमञ्जसा ।
पुष्पाक्षतानि तारेण निक्षिप्या[16]वर्तमीक्षयेत् ।। ६४
वामावर्ते हुनेदष्टशतमस्त्रेण वै घृतम् ।
धान्यैर्वृद्धिस्ततो गर्तं पूरयेत् स्वप्नमीक्षयेत्[17] ।। ६५

---

1 पञ्चाक्षरसहितेन स्वमन्त्रेण । 2 तारसहितेन स्वस्वमन्त्रेणाधारचक्षुषी च हुनेत् । सहार्थे तृतीयेति व्याख्यायां । 3 पृथग्भूतैः । 5 ईशानादिभिः । 6 आं ईं ऊं 8 अष्टाभिर्दशभिर्वा । 9 सर्वाभ्यो देवताभ्य इति नाममन्त्रहोमे प्रणवादि स्वाहान्तत्व । 10 चकारात् कलशेऽपि । 11 एकादशवारं । 14 उपरि चतस्र इष्टकाः 17 दर्भशय्यायां शयितः

---

4 पञ्चभिश्च ख 7 ङेन्तं ख 12 वरं ग
13 कां ग 15 पूजयेत् ख 16 संक्षिप्य ग

स्थपतीन्[1] पूजयित्वा तु न्यसेद्गर्भं यथाविधि ।
गर्भपात्रं प्रमाणेन कुर्यात् ताम्रमयं दृढम् ।। ६६

गुणैः स्तम्भस्य[2] विस्तारं भक्त्वा भाग[3]द्वयान्वितम् ।
तुर्याश्रं तु[4] तदर्धोच्चं[5] पादहीनोत्तरच्छदम् ।। ६७

पञ्चगव्येन संशोध्य धारणाभिश्च यत्नतः ।
अक्षतोपरि विन्यस्य तेन सागरमृद्वृतिम्[6] [7] ।। ६८

भूमण्डलमनन्तस्थं ध्यात्वा द्रव्याणि विन्यसेत् ।
दिग्विदिक्षु च मध्ये च गायत्र्या विन्यसेन्मृदः ।। ६९

गिरितीर्थनदीभ्यश्च ह्रदात्कर्कटकालयात् ।
वल्मीकखलदन्त्युक्षशृङ्गेभ्यश्चाहृता मृदः ।। ७०

मूलं पद्मस्योत्पलस्य कुमुदस्य तथैव च ।
दिक्षु लोहितकस्या[8]पि चत्वार्येवं क्रमात् न्यसेत्[9] ।। ७१

मनःशिलां हरीताळमञ्जनं श्यामसीसके ।
सौराष्ट्रीं रोचनां चैव गैरिकं[10] पारदं न्यसेत् ।। ७२

पूर्वादीशानपर्यन्तं पारदं मध्यमे न्यसेत् ।
रत्नानि नव विन्यस्येदेवमेव यथाक्रमम्[11] ।। ७३

वज्रमौक्तिकवैडूर्यशङ्खस्फटिकपुष्यकान् ।
चन्द्रकान्तं शक्रनीलं पद्मरागं यथाक्रमम् ।। ७४

शालिनीवारकश्यामकङ्कुमाषकुलुत्थकान् ।
निष्पावतिलमुद्गांश्च विन्यसेत्पूर्ववत्क्रमात् ।। ७५

---

2 भित्तिस्तम्भस्य । 6 सागरमृदा नवखण्डवतीं वृतिं ।
8 रक्तोत्पलस्या ।

---

1 स्थपतिं ख 3 भागं ख 4 तत् ख 5 च्चात् ग
7 मृद्वतीं ग 9 चत्वार्येतान्यथाक्रमम् ग 10 अञ्जनं ख
11 मेवं क्रमेण तु ख

सौवर्णं राजतं ताम्रमायसं त्रपुकं तथा ।
कूर्मं पद्मं च शूलं च दिग्विदिक्षु च विन्यसेत् ॥ ७६

खट्वाङ्गं बाल[1]चन्द्रं च वृषं चापं परश्वधम् ।
एतत्सर्वं समानीय ब्रह्मस्थाने निवेशयेत् ॥ ७७

गायत्र्या न्यस्य सम्प्रोक्ष्य वह्नेर्दक्षिणतो न्यसेत् ।
पञ्चाक्षरेण गव्येन प्रोक्ष्य होमं पुरोक्तवत् ॥ ७८

कृत्वा पञ्चाक्षरेणाऽत्र[2] कुर्यादेकादशाहुतीः[3] ।
ताराद्यैः स्वाहया युक्तैरेभिश्चाज्येन होमयेत् ॥ ७९

इमे मन्त्राः समाख्याता लोकपालाश्च[4] शङ्कराः ।
बीजानि सर्वधातूनि[5] सर्वलोहाश्च[6] पर्वताः ॥ ८०

समुद्राः सर्वतीर्थानि नद्यश्चाथ ह्रदास्तथा ।
पातालाश्चै[7]व नागाश्च दिग्गजा वृषभास्तथा ॥ ८१

व्याहृत्यन्तं ततो हुत्वा सम्पातविधिनैव तु ।
समाप्य होमं सम्पातं गर्भपात्रे निषिच्य च ॥ ८२

पिधाय पात्रं सङ्गृह्य जपेत्पञ्चाक्षरं पुनः ।
ध्यात्वा महीमिमां सर्वां जपेन्मन्त्रमिमं गुरुः ॥ ८३

"सर्वभूतधरे कान्ते पर्वतस्तनमण्डिते ।
समुद्रपरिधाने त्वं देवि गर्भं समाश्रय" ॥ ८४

असकृन्मन्त्रमुच्चार्य ध्यात्वा कृत्स्नां वसुन्धराम् ।
शक्तिं ध्यात्वा न्यसेद्गर्भं गोमूत्रेणाप्लुतेऽवटे ॥ ८५

गर्भाधानमिदं रात्रौ ध्यात्वा प्रासादमञ्जसा ।
कुशलैः कारयेत्सम्यक् शास्त्रोक्तविधिनैव तु ॥ ८६

---

1 फाल ग 2 ज्यं ग 4 इन्द्रादि ब्रह्मान्ताः ।

3 हुतिम् ख 5 भूतानि ख 6 लोकाश्च ख 7 पातालञ्चै ख

पूजामण्डप-संयुक्तं प्राकारैरुपशोभितम् ।
गोपुरादिसमायुक्तं बलिपीठसमन्वितम् ॥ ८७

इति क्रियासारे शैवे प्रथमः पटलः

द्वितीयः पटलः

कृत्वैवं मन्दिरं भूयो लिङ्गमस्यानु[1]रूपतः ।
कुशलैः कारयेद्विद्वान् शिल्पिभिः शास्त्रकोविदैः ॥ १

व्रजेच्छिलार्थमाचार्यः कृत्वैवं शिल्पिभिः सह ।
देवमाराध्य विधिवत् साङ्गं सावरणं क्रमात्[2] ॥ २

कृत्वाऽस्त्रयागं शस्त्राणि तक्ष्णामस्त्रेण[3] [4] पूज्य च ।
ब्राह्मणान् भोजयित्वा[5] तैः स्वस्ति वाच्य शुभे दिने ॥ ३

परीक्ष्य शकुनादीनि रक्षामङ्गलपूर्वकम् ।
शिलागारं[6] समासाद्य मन्त्रेणान्वेषयेच्छिलाम् ॥ ४

त्रिणेत्राय च रुद्राय भूतानां पतये नमः ।
शिलां दर्शय देवेश प्रसन्नो मे वृषध्वज ॥ ५

अमुना लक्षणोपेतां शिलां प्रक्षाळ्य वारिभिः ।
गन्धतोयैश्च संक्षाळ्य तत्र सम्पूजयेच्छिवम्[7] ॥ ६

साङ्गं सावरणं सम्यक् म्रूं ज्रूं क्ष्रूमिति[8] चार्चयेत् ।
ततः क्षुरिकया तद्वन्मृत्युञ्जयसमन्वितम् ॥ ७

---

3 पाशुपतास्त्रेणेत्याह नारायणः । 8 म्रूं ज्रूं क्ष्रूमिति बीजमुक्त्वा मनुः

---

1 लिङ्गस्यैवा क 2 सपरिवारकम् ख 4 कृत्वास्त्रयागमस्त्रेण तीक्ष्णान्यस्त्राणि ख 5 पूजयित्वा ख 6 शिलाकारं ख 7 च्छिलाम् ग

चिच्छिखे छिदिति प्रोक्ता क्षुरिकान्ते क्षिकृद्युता[1] ।
ताराद्या[2] तारपूर्वं जूं सोन्तोऽयं[3] मृत्युजिन्मनुः[4] ॥ ८

अङ्गैश्चैव दिशापालैः पाद्यार्घ्यै[5] रखिलैः क्रमात् ।
शिलायाः पश्चिमे चाग्नि निक्षिप्याष्टोत्तरं शतम् ॥ ९

आज्यं पाशुपतास्त्रेण सम्पातविधिना हुनेत् ।
तारं श्रीं[6] पशु हुं फट् स्यान्मन्त्रः पाशुपतस्त्वयम् ॥ १०

नामजातियुतै[7] र्बिन्दुयुक्तै[8] रेभिः षडक्षरैः ।
अङ्गानि कल्पयेदत्र यत्राङ्गैश्च क्रियोदिता ॥ ११

भूतकूरबलिं दत्त्वा स्वपेद्वर्मेतु देशिकः ।
स्वप्नमाणवकं[9] जप्त्वा यावन्निद्रावशं गतः ॥ १२

नमः शम्भो त्रिणेत्राय[10] रुद्राय वरदाय च ।
विश्वाय विश्वरूपाय स्वप्नाधिपतये नमः ॥ १३

आचक्ष्व देवदेवेश प्रपन्नोऽस्मि तवान्तिकम् ।
स्वप्ने सर्वाणि कार्याणि हृदयस्थानि यानि वै ॥ १४

ओं हिलि हिलि शूलपाणये स्वाहा ।
सुस्वप्ने लाञ्छयेत्तस्यां कृत्वा पुष्पाञ्जलिं ततः ।
दुःस्वप्ने कारयेच्छान्तिमस्त्रेणाष्टोतरं शतम् ॥ १५

वक्त्रे पृष्ठे च शिरसि मूले[11] चोद्बुध्य मन्त्रतः[12] ।
शिल्पिभिः कारयित्वा[13] तां रेखा[14] मण्डलवर्जिताम् ॥ १६

---

1 ओं चिच्छिखे छिदिक्षिकृत् इति क्षुरिकामन्त्रोऽन्यत्र । चिच्छिख च्छिदिक्षुरिके क्षिकृत् इति तु अत्र । 2 पूर्वशेषः । 3 सः अन्ते एवं च ओं जूं सः इति । 7 नाम हृदयादि, जातिः नमः स्वाहादि षट् । 9 मन्त्रं – नमः शम्भो इत्यादि । 11 लाञ्छनस्थानानि । 12 उद्बुद्धयस्वेति लाञ्छनमन्त्रः ।

---

4 मनुम् ख 5 पाद्यार्घ्यै ख 6 श्रीं ख 8 युतै ग
10 त्रिनेत्राय ग 13 ग्राहयित्वा ग 14 रेखां ग

नीत्वा रथे समारोप्य मन्दिरस्योत्तरे न्यसेत् ।
प्रासादयुक्त्या च तया लिङ्गं सम्यक् प्रकल्पयेत् ॥ १७

गर्भालये नवभि[1]र्भक्ते कुर्याल्लिङ्गं गुणांशकैः ।
उत्तमं नवभिर्भक्ते भूतांशैर्मध्यमं भवेत् ॥ १८

गर्भगेहार्धमधमं त्रितयं विभजेत्त्रिधा ।
एकस्य द्वितयं चैकमेकस्यैकं[2] नवोदितम् ॥ १९

गर्भे तु नवधा भक्ते पीठं मध्यांशसंमितम् ।
पीठे तु नवधा भक्ते लिङ्गं तद्वत्प्रकीर्तितम् ॥ २०

चतुरश्रसमा पादशिलाऽष्टाश्रोच्छ्रितं परम् ।
पीठं स्त्रीशिलया कार्यं लिंगं पुंशिलया तथा ॥ २१

गेहाल्लब्धं तु[3] यद्दीर्घं विभजेत्तत्समं त्रिधा ।
चतुरश्रमथाष्टाश्रं वृत्तं मूलाद्भवेत् क्रमात् ॥ २२

एतत्सर्वं समं प्रोक्तं समांशं नोच्यतेऽधुना ।
चतुर्विंशतिधा भक्त्वा सप्ताष्टनवभागकैः ॥ २३

चतुरश्रादिकं कुर्यात् वृद्ध्यचुत्तरमिदं भवेत् ।
दशधा विभजेद्दीर्घं मूलं मध्यं त्रिभिस्त्रिभिः ॥ २४

शिष्टं चतुर्भागयुतं शिवाधिक्यमिदं भवेत् ।
चतुरश्रं भवेद्ब्राह्ममष्टाश्रं वैष्णवं भवेत् ॥ २५

वृत्तं शैवं तथा रेखा[4] सव्या वामा च मध्यमा ।
वर्णानां ब्राह्मणादीनामेते भेदाः क्रमोदिताः ॥ २६

शिरोवर्तनमप्येषां वक्ष्ये संक्षेपतोऽधुना ।
विस्तारं नवधा भक्त्वा बाह्यभागं विशोधयेत् ॥ २७

---

4 रेखा अपि ब्रह्मादि देवताकाः ।

---

1 ष्टभिः ख 2 स्यैवं ग 3 च ख,

आयामं शिवभागस्य समं भक्त्वाऽष्टधान्तिकम् ।
वेदैर्विभज्य वर्णानामेकैकं च विशोधयेत् ॥ २८

सुस्निग्धं निर्व्रणं रम्यं लिङ्गं कृत्वा मनोरमम्[1] ।
आचार्यः कर्म कुर्वीत पुण्यर्क्षे चोत्तरायणे ॥ २९

दीक्षितस्य प्रतिष्ठायामधिकारो यतस्ततः ।
दीक्षयेत्त[2] यथा न्यायं भक्तमिष्टं सुसंयतम् ॥ ३०

हेमपुष्पाक्षतैर्गन्ध[3] रत्नकूर्चयुतैर्जलैः ।
कलशं पूरयित्वा तमभिषिञ्चेद्गुरुः स्वयम् ३१

अष्टमेऽह्नि[4] प्रतिष्ठायाः प्राक्कुर्यादङ्कुरार्पणम्
तस्य संक्षेपतो वक्ष्ये विधानं शास्त्रचोदितम् ॥ ३२

त्रिविधं पात्रमुद्दिष्टं मङ्गलाङ्कुरकर्मणि ।
पालिका घटिकाश्चैव शरावाश्चेति भेदतः[5] ॥ ३३

प्रत्येकं द्वादश ग्राह्याः पालिकाः षोडशैव वा
विष्णुब्रह्मशिवाधीशाः क्षाळयेदस्त्रमन्त्रतः ॥ ३४

मृद्बालुकाकरीषैस्तु[6] पूरयित्वोत्तरोत्तरम्
अग्न्यादीशानपर्यन्तं[7] स्थाप्यं पङ्क्तित्रयेण वै ॥ ३५

तिलाश्चापि तथा मुद्गाः सर्षपाः शालयस्तथा
प्रियङ्गुशिम्बनिष्पावमाषश्यामकुलत्थकाः ॥ ३६

बीजान्येतानि गायत्र्या पयोभिः क्षाळयेत्ततः ।
पुण्याहं वाचयित्वाऽत्र मन्त्रेणानेन वापयेत् ॥ ३७

त्र्यम्बकाय च[8] शर्वाय शङ्कराय शिवाय च ।

---

4 अहोरात्र विवक्षितं रात्रौ कर्तव्यत्वात् क्वचित्तु दिवाप्यङ्कुरारोपणमुक्तम् ।
7 प्रागग्राण्युदगग्राणि च सप्त सप्त सूत्राण्यास्फाल्य षट्त्रिंशत्पदानि सम्पाद्य व्रीहिभिः पीठं सम्पाद्य ।

---

1 हरम् ख 2 दीक्षयित्वा ख 3 गन्धैः ख 5 भेदितः ग
6 श्च ग 8 त्रियम्बकाय ग

सर्वलोकप्रधानाय शाश्वताय नमो नमः ।। ३८

निशागन्धोदकैः प्रोक्ष्य तेन सन्ध्यात्रयेऽर्चयेत् ।
पात्राणां[1] देवतास्तद्बीजानां देवता[2] अपि ।। ३९

रात्रीशेभ्यो बलिं दद्यात् तारहन्नाममन्त्रकैः[3]।
ब्रह्मभूतेन्द्रगन्धर्वयक्षरक्षः[4]पिशाचकाः ।। ४०

एते बलिभुजस्तत्र ग्रहाः सप्तविधाः स्मृताः ।
ब्राह्मं पूर्वदिने[5]दद्यात् सपुष्पान्नं कुशोदकम् ।। ४१

द्वितीयं भूतकूरं तु भूतेभ्यो दिक्षु दापयेत् ।
इन्द्रवल्लीरसे सिद्धमन्नं सक्तुविमिश्रितम् ।। ४२

दध्ना च पयसा युक्तमैन्द्रं दद्याद्बलिं बुधः[6] ।
वेणुतण्डुलसंसिद्धं पायसं तु[7] समन्त्रकम् ।। ४३

चतुर्थेऽहनि दद्यात्तु बलिं गन्धर्वमुत्तमम् ।
जलपुष्पाज्यसंयुक्तं यक्षेभ्यो[8]ऽन्नं तु पञ्चमम् ।। ४४

रक्तान्नं पुष्पसंयुक्तं राक्षसं च[9] तुषोदकम् ।
माषान्नं मत्स्यमांसं च कृसरं[10] मधुतैलकम् ।। ४५

हारिद्रचूर्णलाजाढ्यं दद्यात्पैशाचमन्ततः ।
गायत्र्या प्रोक्ष्य सिक्तान्नं गन्धहारिद्रवारिभिः ।। ४६

भूतकूरबलिं दद्यात्सर्वरात्रिषु वा गुरुः ।
ध्वजं संस्थापयेदग्रे बलिपीठस्य बाह्यतः ।। ४७

दशद्वारायतं[11] घण्टापताकावाहनान्वितम् ।

---

2 पात्राणां देवता उक्ताः बीजानां तु यमविष्णुरुद्रसूर्यस्कन्दलक्ष्मीवायुशक्रशशिवह्नयः । 3 ओं ब्रह्मग्रहेभ्यो नमः इत्याद्यो मन्त्राः ।
11 प्रासादद्वारस्य दशगुणितायाम् ।

---

1 पात्राणि ग 4 रक्ष यक्ष ग 5 स पुष्पाणां ख 6 ततः ख
7 च ख 8 यक्षोभ्यो ग 9 तु ग 10 तु कुसुमम् ख

तन्मूले वेदिकां कुर्यात् द्वारपादोन्नतां शुभाम् ॥ ४८

द्वारे त्रिभक्ते द्वाभ्यां तद्विस्तारोऽत्र प्रकीर्तितः ।
त्रिणेत्राय च रुद्राय ध्वजाधिपतये नमः ॥ ४९

नन्दिने तु नमस्तुभ्यमुत्सवस्य प्रसिद्धये ।
अनुना केतुमाराध्य भूयो बीजाङ्कुरोदितम्[1] ॥ ५०

पञ्चमेऽह्नि[2] प्रतिष्ठायाः प्राग्गेहेऽलङ्कृते[3] शुभे ।
शय्यामास्तीर्य[4] विधिवत् तस्यां लिङ्गं निवेशयेत्[5] ॥ ५१

आचम्य सकलीकृत्य मूर्तिपैः सहितो गुरुः ।
पायसेन बलिं दत्वा घृतसिद्धार्थसंयुतम् ॥ ५२

लिङ्गस्य मूर्ध्नि कुसुमं सितं विन्यस्य लक्षणम् ।
उद्धरेद्विधिना सूत्रं पातयित्वाऽमुना ततः ॥ ५३

ओं नमो भगवते रुद्राय हिरण्यरेतसे महात्मने ।
शिवाय शिवरूपाय उमाप्रियाय नमो नमः ॥ ५४

पूजाभागं समं भङ्क्त्वा[6] चतुर्धोर्ध्वं विमुच्य च ।
भागत्रयं तु नवधा भङ्क्त्वोर्ध्वे[7] लक्षणं लिखेत् ॥ ५५

लिङ्गाकारं[8] मणिमयीं रेखां मध्ये समा[9]लिखेत् ।
अधो भागद्वयं त्यक्त्वा पार्श्वरेखे समा[10]लिखेत् ॥ ५६

---

1 बीजाङ्कुरोक्तमार्गेण त्रिकालपूजाबलिदानादि शेषकर्म कुर्यात् ।

2 दिवसे न तु रात्रौ ।

4 महाबलिपीठस्योत्तरभागे ।

5 गेहे पूर्वमुखे पूर्वशिरस्कं पश्चिममुखे पश्चिमशिरस्कम् ।

6 वृत्तभागंचतुर्धा भङ्क्त्वा ऊर्ध्वं भागं त्यक्त्वा अवशिष्टं भागत्रयं त्रिधा भङ्क्त्वा ऊर्ध्वभागेलक्षणं लिखेदित्यर्थः ।

8 लिङ्गाकारमिति लक्षणमित्यनेनान्वेति ।

---

3 च कृते ग 7 भागार्धे ग 9, 10 समं ग

वेदार्धांशगते[1] [2] सम्यक् भ्रामयेत् पृष्ठतो यथा ।
रूपांशोपरियोगः[3] स्यात्तथा संलिख्य यत्नतः ॥ ५७
शिल्पिना कारयित्वैवं गृहीत्वा प्रोक्षयेज्जलैः ।
भीमेन योजयेत्सर्वं मधुना हेमपात्रके ॥ ५८
मधुवातेति सञ्जप्य तेन हेमशलाकया ।
पूरये[4] त्सकला रेखा शिल्पिने सकलं ददेत् ॥ ५९
अत्रोपयुक्तमाज्येन लिम्पेत्तु मधुना युतम् ।
प्रक्षाळ्य वालैः सङ्घृष्य क्षाळयेदस्त्रमन्त्रतः ॥ ६०
मधूकाश्वत्थपनसशिरीषाम्रवटोद्भवैः ।
पालाशोदुम्बरयुतैरेभिरेव कषायकम् ॥ ६१
करीषसहितैरेभिर्दग्धं भस्म निगद्यते ।
मृद्भिश्च भस्मना चूर्णैर्गन्धोदैः क्षाळयेत्तथा[5] ॥ ६२
वल्मीकचत्वरगिरिनदीतीर्थाग्निवेश्मजाः ।
वृषकुञ्जरयोः शृङ्गादाहृता मृत्तिकाः स्मृताः ॥ ६३
यवगोधूममुद्गैश्च शालिहैमनिशान्वितैः ।
चूर्णैर्लिङ्गं[6] विशोध्यैवमस्त्रमन्त्रेण देशिकः ॥ ६४
गन्धपुष्पैरलङ्कृत्य वस्त्राभ्यां परिवेष्ट्य च ।
भेरीपटहताळाद्यैर्ध्वजच्छत्रसमाकुलम्[7] ॥ ६५
शाकुनेन नयेल्लिङ्गं जलतीरे निधाय तत् ।
शोधयित्वा जलं तस्मिन् योगपीठं समर्च्य[8] च ॥ ६६

---

2 अर्धस्थचतुर्भागयुतपञ्चमभागार्धे इत्यर्थः ।
3 पृष्ठतः एकांशोपरि सम्बन्धः यथा भवति ।

---

1 वेदाङ्गांशगते ख 4 पूजयेत् ग 5 ततः ख
6 लिङ्गे ख 7 कुलः ग 8 प्रकल्प्य ख

ततः संहृत्य तत्त्वानि लिङ्गं वह्निमयं जले ।
शाययेत्[1] प्रणवेनैव पञ्चमन्त्रांस्ततो जपेत् ॥ ६७
रक्षोघ्नमस्त्रेण कृत्वाऽस्त्र लोकपालान् स्मरेद्बहिः ।
दीपमप्यहतं न्यस्य[2] जागरूकान् प्रकल्प्य च ॥ ६८
त्रिरात्र[3]मेवं वस्तव्यं जलवासं विशुद्धये ।
प्रासादं परिगृह्याथ सूत्रैः संवेष्टयेत् त्रिधा ॥ ६९
एकधा दर्भदाम्ना च तारार्णैस्तेन[4] च क्रमात् ।
प्रविश्य मूर्तिपैः सार्धमाचार्यो मन्त्रविग्रहः ॥ ७०
पलाशशाखादर्भैश्च मार्जयित्वा समन्ततः[5] ।
अस्त्रजप्तोदकैः प्रोक्ष्य सर्षपानस्त्रमन्त्रतः ॥ ७१
विकीर्य भूयः[6] संमृज्य [शकृता] गन्धवारिभिः[7] ।
विलिप्य विकिरेद्धान्यान्यथ धूपादिकान् न्यसेत् ॥ ७२
धूपदीपं पूर्णकुम्भं मूलेनास्त्रेण च क्रमात् ।
रक्षो[8] घ्नसूक्तमसकृज्जप्त्वाऽस्त्रं च समाहितः ॥ ७३
तालत्रयं दिशाबन्धमग्निप्राकारमेव च ।
कृत्वा बहिर्विनिर्गत्य राक्षोघ्नम् होममाचरेत् ॥ ७४
आग्नेय्यां स्थण्डिले वह्निं निक्षिप्याग्निमुखादिकम् ।
कृत्वा पक्वं तु[9] जुहुयात् यथावत्साधकोत्तमः ॥ ७५
रक्षोहणादिमन्त्राभ्यां कृणुष्वाष्टादशैर्घृतम् ।
ये देवाद्यैश्च दुर्गाभिर्व्याहृतीभिः क्रमेण तु[10] ॥ ७६
अपामार्गसमित्सर्पिरन्नमाज्यं च होमयेत् ।

---

1 शमयेत् ग 2 प्यगतं त्यक्त्वा ग 3 त्रिरात्रि ख
4 तारेणास्त्रेण क 5 तु सर्वतः ख 6 भूमिं ग
7 गन्धोदैर्गोमयाम्बुभिः ख 8 राक्षो ग 9 च ग 10 क्रमाद्धुनेत् ग

अघोरास्त्रेण मन्त्रेण चाष्टोत्तरशतं पृथक्[1] ॥ ७७
होमशेषं समाप्याथ सम्पातमभिमन्त्रयेत् ।
अपामार्गरसोपेतं हुतभस्मसमायुतम् ॥ ७८
अपामार्गस्य शाखाभिस्तेन सम्प्रोक्ष्य मन्दिरम् ।
कृणुष्वेत्यादिभिश्चास्त्रमन्त्रेण च समन्ततः ॥ ७९
तमग्निमीशे निक्षिप्य वास्तुहोमं समाचरेत् ।
तदग्रे स्थण्डिले व्रीहिपीठे वस्त्रं प्रसार्य च ॥ ८०
तण्डुलस्थण्डिलं कृत्वा तस्मिन्नास्तीर्य चाम्बरम् ।
कुशदूर्वाशमीपर्णकूर्चस्थं कलशं न्यसेत् ॥ ८१
तण्डुलाढ्यं जलाढ्यं च शन्नो देवीरिति ब्रुवन् ।
तेन शान्तिं समाराध्य कृत्वा चाग्निमुखान्तिकम् ॥ ८२
वास्तोष्पतेति मन्त्राभ्यां द्वाभ्यां पक्वं च होमयेत् ।
षड्भिराज्याहुतीर्हुत्वा वास्तोष्पते ध्रुवादिभिः ॥ ८३
पञ्चब्रह्मभिराज्येन शन्नवर्गैश्च होमयेत् ।
शमीमर्याश्च समिधो घृतमन्नं पुनर्घृतम् ॥ ८४
दूर्वाश्च पञ्चगव्याक्ताः शन्नो देवीरिति ब्रुवन् ।
शतमष्टोत्तरं हुत्वा होमशेषं समापयेत्[2] ॥ ८५
हुतशेषं ततो दद्यादग्रो चाग्निं[3] कुशेषु च ।
नमो रुद्रेति तोयाज्यैस्त्वं विप्र यजुषोक्षणम् ॥ ८६
अथो वास्तुबलिं दत्वा[4] पुण्याहं वाचयेत्ततः ।
कृत्वैवं वेश्म संस्कारं मण्डपं कारयेत्ततः ॥ ८७
उत्तिष्ठेति समुद्धृत्य स्थिरो भव इति क्षिपेत् ।
ओषधीरिति मन्त्रेण भूषयेत् कुशपल्लवैः ।

---

1 पुनः ग 2 समर्पयेत् ख 3 ग्नेणाग्नि ख 4 कुर्यात् ख

बृहस्पतेति मन्त्रैस्तु नामभिः पूजयेत् क्रमात्[1] ॥ ८८

इति क्रियासारे शैवे द्वितीयः पटलः

तृतीयः पटलः

प्रासादस्याग्रतः कुर्यान्मण्डपं च यथाविधि ।
चतुर्द्वारयुतं रम्यं[2] वितानादिविभूषितम् ॥ १

सूत्रेण वेष्टयित्वाऽथ दर्भदाम्ना[3] समन्ततः ।
तोरणानि चतुर्दिक्षु स्थापयेत् द्वारदेशतः ॥ २

प्लाक्षमौदुम्बरं चैव वाटजं पिप्पलोद्भवम् ।
योजयेत्तानि पादैश्च योगे योगेति मन्त्रतः ॥ ३

देवस्यत्वेति शूलानि स्थापयेच्छिरसि क्रमात् ।
उत्तिष्ठेति च संस्थाप्य पूजयेत्तेषु देवताः ॥ ४

प्रमोदाभयशान्ताख्यमहान्तस्तोरणेश्वराः ।
तदन्तरे ध्वजाः स्थाप्यास्तेषु तद्देवता[4] यजेत् ॥ ५

भृङ्गीशः कार्तिकेयश्च वृषो नन्दीश्वरस्तथा ।
महाकालस्ततो ज्ञेयः कुम्भोदरमहोदरौ ॥ ६

वीरभद्रेश्वरो मध्ये ध्वजो[5] ब्रह्माधिदैवतः ।
अष्टदिक्ष्वष्टकुण्डानि कारयेद्दैशिकोत्तमः ॥ ७

चतुरश्रं[6] भगाकारं धनुर्वैकं त्रिकोणकम् ।
वृत्तं षडश्रं पद्माभमष्टकोणं यथाक्रमम् ॥ ८

---

1 सार्वश्लोकः क पुस्तके अधिक इति आभाति न व्याख्यातश्च ।
उत्तरपटले चतुर्थश्लोकादुपरि कथंचिद्योजयितुं शक्यम् ।

2 समायुक्तं ख 3 मालां ख 4 तां देवतां ख
5 ध्वजो ख 6 चतुरस्रं एवमुत्तरत्रापि ख

चतुरश्रं ततोऽन्यच्च कृत्वालङ्कृत्य सर्वतः ।
संशोध्य द्वारदेशेषु[1] कलशेष्वर्चयेदिमान् ॥ ९

महोदरमहाकायौ[2] पूर्वद्वारे निवेशितौ ।
महाकण्ठमहोरस्कौ दक्षिणद्वारपालकौ ॥ १०

अग्निजिह्वाग्निनेत्रौ च पश्चिमद्वारपालकौ ।
उत्तरस्यां विरूपाक्षविशालाक्षौ च संस्थितौ ॥ ११

सहस्रवीची विमला शतधारा प्रमोदिनी ।
नद्यस्तोरण[3]मूलेषु स्थाप्य कुम्भेष्वनुक्रमात् ॥ १२

कुम्भकर्णो भद्रकर्णः श्वेतकर्णस्तथैव च ।
गोकर्णश्चेति निर्दिष्टाः क्रमात्तद्द्वारदेवताः[4] ॥ १३

पलाशशाखादर्भैश्च भूमिं संमार्ज्य वायुना ।
गायत्र्याऽथ समालिप्य किरेदस्त्रेण सर्षपान् ॥ १४

संमृज्य पूर्ववल्लिम्पेच्छक्तिरूपञ्च मण्डपम् ।
ध्यात्वा मूलेन विकिरान् जप्त्वा गव्यं तु साधयेत् ॥ १५

अस्त्रेण तेन संप्रोक्ष्य विकिरान् मूलतः किरेत् ।
संमृज्यास्त्रेण गन्धोदैर्लिप्त्वा[5]ऽथापः पुनन्त्विति ॥ १६

भूयोऽपि ताभिः संप्रोक्ष्य दर्भांश्च कुसुमाक्षतान् ।
इषेत्वेति विकीर्याथ मध्ये मूलेन दिक्ष्वथ ॥ १७

लोकेशनाममिर्भूयो गन्धाद्यैरभिपूजयेत् ।
धूपदीपौ च विन्यस्य कुर्यात्तालत्रयादिकम् ॥ १८

स्थलशुद्धिं विधायैवमैशान्यां पङ्कजे गुरुः ।
कुम्भेशं पूजयेत्पार्श्वे[6] वर्धनीं च विधानतः ॥ १९

---

4 तन्त्रसमुच्चये शङ्करनारायणे प्रोक्ताः ।

---

1 तु ग 2 कालौ क 3 स्तारेण ख 5 प्या ख 6 बीशे ख

सहेमरत्नगन्धाद्यैस्तस्मिन् सम्पूजयेच्छिवम् ।
आत्मतत्त्वमथोऽभ्यर्च्य विद्यातत्त्वं च मध्यतः ॥ २०

शिवतत्त्वं तदूर्ध्वे तु सर्वतत्त्वसमन्वितम् ।
ध्यात्वास्त्रेण समाराध्य वर्धनीं तेन सर्वतः ॥ २१

अच्छिन्नधारया सिञ्चेत् कुड्यश्लेषं प्रदक्षिणम् ।
तन्मार्गेण घटं नीत्वा स्थापयेद्विकिरोपरि ॥ २२

कुम्भेशं वस्त्रयुग्मेन वेष्टयेच्च ततो गुरुः ।
एकेन चेतरं[1] पश्चादग्निं सञ्जनयेद्गुरुः ॥ २३

उपलिप्य विशोध्योर्वीं[2] संप्रोक्ष्य परिशोष्य च ।
शोधयेच्च[3] क्रमाद्बीजैस्तत्र दर्भैः समाधिना ॥ २४

उल्लिख्यास्त्रेण वज्राख्या[4]मादौ रेखामुदग्गताम् ।
क्रमात्तिस्रस्तु पूर्वाग्राः समित्काष्ठेन चाग्रतः ॥ २५

वर्मणा प्रोक्ष्य शकलं निरस्य प्रणवेन तु ।
विष्टरं कल्पयेत् कूर्चं कुसुमाक्षतवारिभिः ॥ २६

अभ्यर्च्य देवीं सन्ध्यायेत् हृदा नीलोत्पलप्रभाम् ।
गन्धाद्यैरभिपूज्याग्निमस्त्रेणादाय वर्मणा ॥ २७

अवकुण्ठ्य हृदा तस्य योन्यामग्निं विनिक्षिपेत् ।
गन्धाद्यैरभिपूज्याथ गर्भाधानादि कल्पयेत् ॥ २८

गर्भाधानं पुंसवनं सीमन्तं जातनामनी ।
पञ्चब्रह्मभिरष्टाष्ट हुत्वाज्यं कल्पयेत् क्रमात् ॥ २९

उपनिष्क्रमणं[5] पुंसा प्राशनं चेशमन्त्रतः ।
चौलोपनयने चाभ्यां व्रतानि ब्रह्मभिः क्रमात् ॥ ३०

---

4 वज्रदेवताकां ।

---

1 वेतरं ख 2 ध्यास्मिन् ग 3 वापयेच्च ग 5 निष्क्रामणं ग

ईशेनैव समावर्तं विवाहं व्योमविद्यया ।
अग्न्याधानं हृदा पूर्णां सर्वत्र व्योमविद्यया ॥ ३१

एवं कृत्वाग्निसंस्कारं शयनं परिकल्पयेत् ।
वेद्यां स्वस्तिकमालिख्य पूर्वे वा दक्षिणेऽपि वा ॥ ३२

धान्यानि प्रविकीर्यास्मिन् शय्यां तत्र समास्तरेत् ।
शिरोपधानसंयुक्तां सकपोलस्थलद्वयाम् ॥ ३३

दुकूलपट्ट[1]सञ्छन्नामूर्णायां पूरितां शुभाम् ।
शय्यां सम्पूज्य विधिवत् परितो मङ्गलान्[2] न्यसेत् ॥ ३४

शङ्खं चक्रं ध्वजादर्शौ वृषमङ्कुश[3]चामरे ।
मत्स्ययुग्ममिह प्रोक्तं[4] मङ्गलाष्टकमुत्तमम् ॥ ३५

पूर्वादिदिक्षु विन्यस्य कलशान् विन्यसेत्तथा ।
तेषु[5] विद्येश्वरान् सम्यगन्धपुष्पैः समर्चयेत् ॥ ३६

महत् [।] कुम्भं शिरस्थाने न्यसेत्सम्पूजयेत्तथा ।
आपोहिष्ठादिमन्त्रेण अर्घ्यपाद्ये च पादयोः ॥ ३७

पार्श्वयोर्विन्यसेत्क्षीरं मधु दीपांश्च[6] विन्यसेत् ।
गौरसिद्धार्थकान् बाह्ये मध्वाज्यान्तान् निषेदिह ॥ ३८

न्यसेदङ्कुरपात्राणि दिक्षु कोणेषु सर्वतः ।
शय्याया उत्तरे कुर्यात् मण्डलं लक्षणान्वितम्[7] ॥ ३९

कृत्वैवं मण्डपं[8] चान्यदीशान्यां च प्रकल्पयेत् ।
वेदिकां मध्यतः कृत्वा कलशान् पूरयेदथ ॥ ४०

एकोनार्धशतं दिक्षु[9] कषायं गव्यमेव च ।

---

2 मङ्गलपदार्थान् । 4 एते यज्ञियवृक्षकृताः । 5 दिक्षु अनन्ताद्यः ईशानादिविदिक्षु एकरुद्राद्यः इति सम्यगित्यनेन सूचितम् । 6 दिक्षु 9 नवपुटे दिक्षु षट्कं कोणेषु चतुष्कं मध्ये नवकम् ।

---

1 वस्त्र ख 3 मङ्कुर ख 7 मण्डले लक्षणान्विते ग 8 मडलं ख

भस्ममृत् कोणदेशेषु[1] गोमूत्रञ्च पयो दधि ॥ ४१

कौशं गन्धोदकं मध्ये शिष्टान् शुद्धजलैः क्रमात् ।
पुरुषाघोरसद्यैस्तु वामाङ्गैश्[2]र्यथाक्रमम् ॥ ४२

पूरयित्वा समाराध्य हुनेदष्टोत्तरं शतम् ।
आज्यं मूलेन सम्पातं कलशे सेचयेदथ ॥ ४३

सम्पूज्य भूयः संमन्त्र्य कलशान् स्नानमण्डपे[3] ।
स्वस्तिकोपरि विन्यस्य पीठमन्यत् समाहरेत् ॥ ४४

त्वग्गोमयमृदं भस्म गन्धपुष्पाक्षतादिकम् ।
छत्रत्रा[illegible]स्ततो दीपैर्वाद्यैः सार्धं जलं व्रजेत् ॥ ४५

गन्धं पुष्पं ततो यानमादाय वसनद्वयम् ।
मन्त्रान् संहृत्य विधिवत् लिङ्गं तोयात्समुद्धरेत् ॥ ४६

विसृज्य वासः सङ्गृह्य लिङ्गं संक्षाळ्य वारिभिः ।
गन्धादिभिरलङ्कृत्य वस्त्राभ्यां परिवेष्टय च ॥ ४७

समस्तवाद्यैः सहितो नयेत् तत्स्नानमण्डपम् ।
स्नानपीठेऽथ विन्यस्य स्नापयेत् विधिवत्क्रमात् ॥ ४८

परिघृष्य कषायेण[4] गोमयेनाथ मृद्गणैः ।
भस्मनाऽथ समालिप्य स्नापयेत्सलिलैः शुभैः ॥ ४९

स्नापयेत्कलशैर्भूयः कषायैर्यथाक्रमम् ।
मन्त्रैः पूर्वोदितैः सम्यगभिषिच्य विधानतः ॥ ५०

ध्यात्वा तस्मिन् महादेवं शाश्वतं ध्रुवमव्ययम् ।
भीमेन गन्धमालिप्य वस्त्रं वामेन वेदयेत् ॥ ५१

---

2 दिक्षु पुरुषाघोरसद्यवामैः अग्न्यादिकोणेषु पञ्चब्रह्महृदयशिखाकवच-शिरोमन्त्रैर्मध्ये ईशानेनेत्यर्थः ।

---

1 तु ग 3 मण्डले ग 4 येन ग

ईशेन पुष्पैः सम्भूज्य धूपमर्घ्यं च वक्त्रतः ।
नमस्कृत्य प्रसाद्येशं गन्धाढ्येन[1] करेण तु ॥ ५२
स्वकीययाऽथ गायत्र्या त्रिषु भागेषु संस्पृशेत् ।
चतुर्दिशं यथान्यायं ताः समासेन लिख्यते[2] ॥ ५३
तत्पुरुषाय विद्महे पितामहाय धीमहे[3] तन्नो ब्रह्म प्रचोदयात् ॥ ५४
तत्पुरुषाय विद्महे जनार्दनाय धीमहे[3] तन्नो विष्णुः प्रचोदयात् ॥ ५५
तत्पुरुषाय विद्महे महादेवाय धीमहे[3] तन्नो रुद्रः प्रचोदयात् ॥ ५६
सितमाल्यानि निक्षिप्य मूर्ध्नि देवस्य भक्तितः[4] ।
नीराजनादिकं कृत्वा पुण्याहं मूर्तिपैः सह ॥ ५७
कृत्वोत्तिष्ठेति मन्त्रेण पीठालिङ्गं समुद्धरेत्[5] ।
रथे तिष्ठेति मन्त्रेण रथमारोप्य यत्नतः ॥ ५८
मण्डपं तन्नयेद्यत्नात् द्वारि चार्घ्यं प्रदाय च ।
अवतार्य रथात्तस्मादुदुत्यं जातवेदसम् ॥ ५९
आकृष्णेन रजसेति द्वाभ्यां तन्मण्डपं[6] नयेत् ।
प्रदक्षिणं नयित्वाऽथ[7] प्रासादाभिमुखं यथा ॥ ६०
शय्यायां वामदेवेन न्यस्त्वा तच्छाययेद्गुरुः ॥ ६१

इति क्रियासारे शैवे तृतीयः पटलः

चतुर्थः पटलः

अथाधिवासनं[8] कुर्याद्यथावत्साधकोत्तमः ।

---

8 अधिवासो नाम देवस्य लिङ्गसान्निध्यहेतुर्ध्यानन्यासहोमादि कर्म ।

---

1 गन्धाक्तेन ग 2 कथ्यते ग 3 धीमहि इति ख धीमहे इति ग पाठः । एवमुत्तरत्रापि 4 मूर्तिदेहस्य शक्तितः ख 5 समुत्क्षिपेत् ग 6 मण्डलं ख 7 तु ग

प्रक्षाळ्य पादौ हस्तावप्याचम्य विधिवद्गुरुः ॥ १

कृत्वोपवीतवद्वस्त्रमुत्तरं वाग्यतः शुचिः ।
आसीनोदङ्मुखः[1] पश्चादात्मशुद्धिं समाचरेत् ॥ २

तत्त्वानि[2] संहरेद्भूयो धारणा धारयेत्ततः ।
तत्त्वान्युत्पाद्य[3] विन्यस्य मन्त्रन्यासं स[4]माचरेत् ॥ ३

ध्यात्वाऽऽत्मानं शिवं साक्षात्सर्वज्ञं सर्वगं प्रभुम्[5] ।
एवं ध्यानसमायुक्तो लिङ्गस्थं जीवमात्मनि ॥ ४

तारेण योजयित्वाऽऽदौ[6] ततस्तत्त्वानि संहरेत् ।
घ्राणोपस्थसमायुक्तामुर्वीं भूतगुणान्विताम् ॥ ५

संहरेत्कारणे[7] तच्च तोये तोयं स्वकारणे ।
जिह्वापायुयुतं वर्णगुणोपेतं च पावके ॥ ६

पादाक्षित्रिगुणोपेतं वह्निं तद्वत्स्वकारणे ।
तच्च वायौ तथा वायुं स्पर्शं त्वक्पाणिसंयुतम्[8] ॥ ७

गुणद्वययुतं व्योम्नि स्पर्शं व्योम स्वकारणे ।
श्रोत्रं वाक्संयुतं चैकगुणं शब्दाख्यमातृके ॥ ८

तच्चित्ते तदहङ्कारे तं बुद्धौ तां गुणे तदा ।
अव्यक्ते[9] तत्तथा रागे विद्यादिषु[10] यथाक्रमम् ॥ ९

ह्रां ह्रीं ह्रूं ह्रैं तथा ह्रौमित्येतैर्हुं फट् समन्वितैः ।
कारणे च यथान्यायं संहरेत्परमे शिवे ॥ १०

---

1 उदङ्मुख आसीनः, सन्धिरार्षः ।
2 तत्त्वसंहारसृष्टिप्राणायाममन्त्रन्यासाः मत्कृतानुष्ठानपद्धतौ द्रष्टव्याः ।
9 अव्यक्तोपाधिके पुरुषे । 10 अशुद्धविद्याविषु ।

---

3 तत्त्वान्युत्पाद्य ख 4 समन्त्रं न्यासं ग
5 सर्वतः शुभं 6 तु ग 7 करणे ख. 8 पाणिना युते ग

वायुनाशोषयेल्लिङ्गं वह्निना सन्दहेच्च तत्[1] ।
प्लावयेद्वारुणेनैव ध्यायेत्तोयमयं जगत् ॥ ११

तस्मिन् शक्तिं न्यसेत्पश्चात्पार्थिवीं बीजसंज्ञिकीम् ।
तस्यां[2] बुद्बुदमुत्पन्नं ध्यात्वालिङ्गं च तन्मयम् ॥ १२

योजयेज्जीवमात्मस्थं लिङ्गे तत्वानि भावयेत् ।
देवः शक्त्या नभक्षोभं कुर्वन्नादमजीजनत् ॥ १३

नादाद्बिन्दुस्ततो बिन्दोर्जातोऽस्माच्च सदाशिवः ।
ततस्तत्वानि च कला भुवनानि[3] यथाक्रमम् ॥ १४

जातानि स्युस्ततो वर्णपदमन्त्राश्च नादतः ।
षडध्वानः क्रमात्प्रोक्ताः शिवभेदा न संशयः ॥ १५

न्यस्तव्यास्ते यथा न्यायं लिङ्गे देशिकसत्तमैः ।
आवाह्य सकलीकृत्य[4] ब्रह्मभिश्चाङ्गमन्त्रकैः ॥ १६

व्योमव्यापि शिवेनापि तस्यांगैश्च समर्चयेत् ।
षडक्षरेण देवेशं नादेन ब्रह्मभिस्तु वा ॥ १७

षडक्षरमथो[5] वक्ष्ये धर्मकामार्थ मोक्षदम् ।
तारः शून्यं विसं सर्गी[6] वान्तं सूक्ष्मसमन्वितम् ॥ १८

कुम्भानन्तौ मरुत्[7] साक्षाद्वेदसारसमन्वितम् ।

---

4 ध्यानं–चतुर्भुजमुदाराङ्गं सुमुखं चन्द्रशेखरम् । जटामण्डलसंयुक्तं पञ्चब्रह्ममयं शिवम् । अक्षसूत्रकपालेऽधः शूलं खट्वाङ्गमूर्ध्वतः । वहन्तं दक्षिणेवामे हस्तैर्देवं हरं स्मरेत् ।

7 तारः – प्रणवः । शून्यं – नकारः । विसं – मकारः । सर्गी – विसर्गः वान्तं – शकारः । सूक्ष्मं – इकारः । कुम्भः – वकारः । अनन्तो – दीर्घः मरुत् – यकारः ।

---

1 त्तु तम् ग 2 यस्यां ग 3 भवनानि ख
5 मतो ख 6 निशं सङ्गी ख

नाद्यर्णैर्बिन्दुसंयुक्तै[1] रीशानादीनि विन्यसेत्[2] ॥ १९

मूर्ध्न्यास्ये हृदये गुह्यपादयोस्तानि विन्यसेत् ।
वक्त्रेष्वपि[3] यथान्यायमङ्गानि प्रणवादिभिः[4] ॥ २०

बिन्दुनाम[5] युतैर्जातियुक्तैः षड्भिः प्रकल्पयेत् ।
विनान्त्यं सविसर्गान्तमस्त्रं[6] विद्याच्च साधकः ॥ २१

नादं चापि प्रवक्ष्येऽहमनुस्वर[7]युताम्बरम्[8]।
उद्धरेद्बिन्दुसंयुक्तं मूलमन्त्रमिदं परम् ॥ २२

सुषिर[9]स्वरभूताग्निरूप[10]बिन्दुयुतं[11] नभः ।
तेनेशानादिसद्यान्तं न्यसेद्ब्रह्माणि[12] पूर्ववत्[13] ॥ २३

वक्त्राण्यपि तथा पश्चादङ्गानि क्रमशो न्यसेत् ।
दीर्घबिन्दुयुतव्योम्ना नामजातियुतेन च ॥ २४

अनेन चार्चयेद्देवं ब्रह्मभिर्नात्र वक्ष्यते ।
पाद्यार्घैर्विधिवद्देवं गन्धद्वाराभिमन्त्रितैः ॥ २५

गन्धैश्च बहुशोऽभ्यर्च्य पुष्पैर्गन्धसमुच्छ्रितैः ।
धूपैर्दीपैर्निवेद्यैश्च पायसाद्यैर्यथाविधि ॥ २६

एवं सम्पूज्य देवेशं विप्रान् शान्तांश्च भोजयेत् ।
देया च दक्षिणा तेभ्यो बहुहेममयीतदा[14] ॥ २७

---

1 नं ईशानमूर्ध्ननमः इत्यादि । 3 ईशानायोर्ध्ववक्त्रायेत्यादि ।
4 ओं हृदयायेत्यादि । 6 यः अस्त्रायेति 7 अनुस्वरः – औकारः । अम्बरं – हकारः । बिन्दुयुतः एवं च हौमिति । 11 सुषिरः – नवमः । स्वरः – सप्तमः । भूतं – पञ्चमः । अग्निः –तृतीयः । रूपं प्रथमः । स्वर इत्यर्थः । क्रमादेतैः स्वरैर्युतेन बिन्दुयुतेन हकारेण । 13 मूर्धादिषु वक्त्रेषु च ।

---

2 कल्पयेत् ग 5 नाद ग 8 युतात्परं ख
9 सुशिर ख 10 रूपं ग 12 ब्रह्मणि ख 14 तथा ख

रत्नान्योषधयस्तत्र[1] विन्यसेत्सितचामरे[2] ।
लाजापूपजलैः सक्तुतिलघान्यैश्च पायसैः ॥ २८

हारिद्र[3]चूर्णैरमुना दिक्ष्वष्टासु[4]बलिं हरेत् ।
देवं रुद्रं पुरस्कृत्य इमं बलिं प्रतिगृह्णन्तु पैशाचान्तं यजामहे
देवं रुद्रं पुरस्कृत्य सर्वभूतानि पैशाचान्तं इमं बलिं प्रतिगृह्णन्तु
यजामहे

दत्वाऽनेन बलिं भूयो मण्डलेऽभ्यर्चितं[5] शिवम् ।
पीठं संशोधयेत्पश्चान्नपुंसकशिलामपि ॥ ३०

त्वग्भिर्मृद्भिस्ततो दर्भैः संघृष्य क्षालयेज्जलैः[6] ।
संक्षाळ्य वारुणैर्मन्त्रैर्धारणाभिर्विधानवित् ॥ ३१

शोधयित्वा यथान्यायं देवीं पीठात्मिकां यजेत् ।
वस्त्रेणाच्छाद्य दर्भांश्च[7] अक्षतान् विकिरेत्तथा ॥ ३२

जप्त्वा मन्त्रांस्ततो रक्षां विधायास्माद्बहिर्व्रजेत् ।
लिङ्गं संस्पृश्य वेदांश्च जपेयुरभितो द्विजाः ॥ ३३

लिङ्गस्य शिरसोऽभ्याशे कुण्डेऽग्नौ जनिते गुरुः ।
व्याहृतीभिस्ततस्तस्मिन् पृथगष्टसहस्रकम् ॥ ३४

पालाशौदुम्बराश्वत्थाः क्षीराज्यमधुसंयुताः[8] ।
जुहुयात्समिधस्तद्वत्[9] तिलान् सर्पिरतः परम् ॥ ३५

---

1 अत्रैव रत्नादीनामधिवासः कार्यः । अत्र क्रमव्यत्ययः समाधेयः बलिदानानन्तरं भोजनदक्षिणादयो ज्ञेयाः ।

9 तिसृभिर्व्याहृतिभिः क्रमात्तिस्रस्तिस्रमध्वाप्लुताः समिधः, चतुर्थ्या त्रिमध्वाप्लुततिलान् अष्टोत्तरसहस्रं, मूलेन सर्पिरेकाष्टशवारं ओं शर्वाय स्वाहा इत्याद्यष्टमूर्तिमन्त्रैः पूजामन्त्रैश्च सकृत्सकृद्धुनेत् ।

---

2 चामरैः ख 3 हरिद्रा ख 4 अर्धं ख पुस्तके अधिकं ।
5 पेम्यर्च्यं तं ख 6 ततः ख 7 दर्भैश्च ख 8 मधुराप्लुताः ख

सकृत्सकृद्धुनेदेभिः स्वाहान्तैः प्रणवादिकैः ।
मन्त्रैरथाष्टमूर्तीनां पूजामन्त्रैः समापयेत् ॥ ३६

सम्पाताज्येन संस्पृश्य[1]गन्धादिभिरथार्चयेत् ।
विहृत्य वह्निं तं भूयो वक्त्राद्यैर्दिक्षु निक्षिपेत्[2] ॥ ३७

कोणेष्वङ्गैर्विहृत्याग्निं कृत्वा चाग्निमुखान्तिकम्[3] ।
वक्त्रेण जुहुयुः पक्वं वक्त्राद्यैरङ्गमन्त्रकैः[4] ॥ ३८

पृथगष्टशतं सर्वे जुहुयुः समिदादिकम् ।
समिदाज्यचरून् लाजान् सर्षपांश्च तिलान् यवान्[5] ॥ ३९

व्रीहीन् सक्तून् पुनश्चाज्यमीशानेन हुनेद्गुरुः ।
दधिक्षौद्रघृतैरन्ते शांतिं मृत्युजिता तथा ॥ ४०

हुत्वा[6] होमं समाप्याथ स्पृष्ट्वा सम्पातमर्चयेत् ।
जपेयुरभितो विप्राः स्पृष्ट्वा लिङ्गं निजान् मनून् ॥ ४१

ततः सम्पूज्य देवेशं निवेद्य विधिवद्बुधः ।
भोजयित्वा ततो विप्रान् विकिरेत्परितो बलिम् ॥ ४२

नृत्तं गीतं बहिः कृत्वा जाग्रदेव निशां नयेत् ॥ ४३

इति क्रियासारे शैवे चतुर्थः पटलः

पञ्चमः पटलः

स्नात्वा प्रभाते विधिवत् पूजयित्वा महेश्वरम् ।
दध्याज्यमधुसंयुक्तं पायसं च[7] निवेदयेत् ॥ १

---

1 मूलाधारहृदयभ्रूमध्यमूर्धसु क्रमात् । 2 तत्पुरुषहृदयाघोरशिखा-सद्योजातकवचवामदेवशिरोमन्त्रैरष्टदिक्षु । 4 स्वस्वमन्त्रैः ।

3 विकं ग 5 यवांस्तिलान् ग 6 हुतं क ग 7 तु ख ग

देवभूतपिशाचाश्च गन्धर्वा यक्षसंज्ञकाः ।
पिशिताशाश्च नागाश्च कांक्षन्ते मातरो बलिम् ॥ २

तेभ्यस्तत्र बलिं दत्वा रत्नन्यासं समारभेत् ।
सम्मार्ज्यान्तर्बहिस्तद्वत् गोमयेन विलिप्य च[1] ॥ ३

गव्यैर्गन्धोदकैः प्रोक्ष्य मात्वा[2] स्थानं प्रकल्पयेत् ।
पञ्चोत्तरशतांशं यत् गर्भगेहस्य मध्यतः ॥ ४

नीत्वा तावत् पृष्ठतोऽत्र सूत्रपातं प्रकल्पयेत्[3] ।
भुवं[4] गमस्य षड्विंशच्छतांशं चोत्तरं नयेत् ॥ ५

तत्रैशान्यां यवं नीत्वा विन्यसेत्कोणसूत्रतः[5] ।
नपुंसकशिलां सम्यगर्चितां मनुनाऽमुना ॥ ६

स्थितं चराचरं यस्यां रत्नानां निधिरव्ययः ।
सा त्वं ब्रह्मशिलारूपा तिष्ठात्र धरणी स्थिरा ॥ ७

त्वमेव परमाशक्तिस्त्वमेवासनधारिका ।
शिवाज्ञया त्वया देवि स्थातव्यमिह सर्वदा ॥ ८

प्रार्थैवं[6] शोधयेद्भूतं गन्धाद्यैश्च प्रयत्नतः ।
रत्नन्यासं ततः कुर्यात् हुत्वा गायत्रिया[7] घृतम् ॥ ९

अष्टोत्तरशतं भूयस्तया तान्यभिमन्त्रयेत् ।
सद्योजातकलाभिस्तानैन्द्रादिक्रमयोगतः ॥ १०

वज्रं मुक्ताफलं पुष्यरागं नीलं शतक्रतोः ।
स्फटिकं चैव वैडूर्यं गारुडं नीलमेव च ॥ ११

---

3 इतः परं क, ग पुस्तकयोः प्रोक्ष्यार्घ्यमित्यारभ्य नागा यक्षाः सगन्धर्वा इत्यर्धश्लोकानन्तरं सूत्रपातं प्रकल्पयेत् इत्युक्त्वा भुवंगमस्येत्याद्युक्तम् ।

---

1 तु ख ग 2 मातृ क ग 4 वावं क 5 तत्र कोणस्थसूत्रेशे यवं न नीत्वाऽत्र विन्यसेत् ख 6 ध्यात्वैवं क 7 गायथ्या क, ग

पद्मरागं न्यसेन्मध्ये सद्योजातेन मन्त्रवित् ।
मनःशिलां हरीतालं सौराष्ट्रीं विद्रुमं न्यसेत् ॥ १२

गोरोचनं प्रवालं च अञ्जनं माक्षिकं[1] तथा ।
कलाभिर्वामदेवस्य ततो बीजानि विन्यसेत् ॥ १३

शालीभिर्यवगोधूमप्रियङ्गुमाषतिलांस्तथा ।
नीवारांश्चैव निष्पावान्न्यस्य भीमकलाष्टभिः[2] ॥ १४

वृषं परशुरुद्राक्षशूलान् हैमान् दिशासु च[3 4] ।
पौरुषीभिः कलाभिश्च चतुर्भिर्विन्यसेदथ[5] ॥ १५

पुण्याहं वाचयित्वैवं रत्नन्यासं विधाय च ।
पटेन छादयित्वाऽथ रक्षां कृत्वा बहिर्व्रजेत् ॥ १६

ततो मण्डपमासाद्य वह्निस्थं मण्डप[6]स्थितम् ।
उद्धास्य देवे[7] संयोज्य विद्येश्वरघटोदकैः ॥ १७

प्रोक्ष्यार्घ्यं विधिवद्दत्वा प्रणिपत्य समाहितः ।
उत्थाप्य वामदेवेन यानमारोप्य मूर्तिपैः ॥ १८

नयेत्प्रदक्षिणीकृत्य लिङ्गं देवालयं प्रति ।
अर्घ्यहस्तोऽग्रतो गच्छेत् नववस्त्रधरो गुरुः ॥ १९

सन्तुष्टः पृष्ठतो गच्छेत् कर्ता बन्धुजनैः सह ।
गानैः क्ष्वेळैस्तथा नृत्तैर्जयशब्दरवैस्सह[8] ॥ २०

आस्फोटनैस्तथा वाद्यैर्बहुभिः पूरयन् दिशः ।

---

2 मध्ये भीमेन निष्पावान् । 3 च शब्दात् मध्ये सौवर्णपद्मं तत्पुरुषेण । 5 अथशब्दात् कोणेषु रौप्यायस्त्रपुताम्राणि ईशानकलाभिः, मध्ये ईशानेन सुवर्णं न्यसेत् ।

---

1 मौक्तिकं क, ग 4 रुद्रादौ शूलं हैममन्यान्यथ क, ग
6 मण्डल क, ग 7 देवं क, ग 8 रपि ख

द्वारदेशे प्रदायार्घ्यं यत्नाद्देवं [1] [2] प्रवेशयेत् ॥ २१

विन्यस्य तत्र विधिवत् षडध्वन्यासपूर्वकम् ।
आवाहयेत्परं तत्वं चिद्रूपममलं ध्रुवम् ॥ २२

आत्मानन्दमनौपम्यमनेकार्कयुतप्रभम्[3] ।
आदाय हृदयाम्भोजान्नादेन श्वाससंयुतम् ॥ २३

योजयेत्सकले लिङ्गे यथावत्साधकेश्वरः ।
ज्ञानानन्दमयं साक्षात्सर्वकारणकारणम् ॥ २४

ध्यात्वा लिङ्गं ततो न्यस्येन्मन्त्रान्यङ्गान्यपि[4]क्रमात् ।
ध्यायेत्तं सकलं देवं पद्मस्थं पञ्चवक्त्रकम् ॥ २५

दशबाहुं त्रिणेत्रं[5] च सर्वाभरणभूषितम् ।
जटामण्डलसंयुक्तं चन्द्रार्धकृतशेखरम् ॥ २६

सर्वतेजोमयं दिव्यमप्रमेयं सुरोत्तमम् ।
मूर्ति भिस्त्वङ्ग[6]विद्येशगणेश्वरदिगीश्वरैः ॥ २७

वज्रादिभिः परिवृतं सर्वदेवनमस्कृतम् ।
ध्यात्वैवं सकलं पश्चात् मन्त्रैःस्तोत्रपुरःसरैः ॥ २८

एभिरावाहयेद्विद्वान् प्रणिपत्य पुरः स्थितः ।
यस्य सिंहा रथे युक्ता व्याघ्रभूतास्तथानुगाः[7] ॥ २९

ऋषयो लोकपालाश्च देवः स्कन्दस्तथा वृषः ।
प्रिया गणा[8] मातरश्च सोमो विष्णुः पितामहः ॥ ३०

नागा यक्षाश्च[9] गन्धर्वा ये च दिव्या नभश्चराः ।
तमहं त्र्यक्षमीशानं शिवं रुद्रमुमापतिम् ॥ ३१

---

1 पावपूर्वं, जीर्णोद्धारे शिरः पूर्वं बहिर्नयेत् ।

2 पावदेवं क, ग
3 तं प्रभुम् ख
4 नपि क, ग
5 नेत्रं ख
6 स्वङ्ग ख
7 मृगाः ख
8 गणो ख
9 क्षाः स ख

आवाहयामि सगणं सपत्नीकं वृषध्वजम् ।
आगच्छतु भवानुग्र शिवो भव नमोऽस्तु ते[1] ॥ ३२

ओं जूं सः शिवं सर्व[2]दात्र सान्निध्यं कुरु[3] अधिष्ठाय तिष्ठ स्वाहा ।
निरोधनं च नो भव पूजां प्रतिगृह्णातु मन्त्रपूतमिद[4]मर्घ्यं पाद्य-
माचमनीयं चैतदासनं ब्रह्मणा विहितं स्वयं स्वाहा ॥ ३४

सद्येनावाह्य तल्लिङ्गं वामेन स्थाप्य यत्नतः ।
निरोधनं च भीमेन सान्निध्यं मुखविद्यया ॥ ३५

प्रार्थयित्वा यथा न्यायं हेम[5] विन्यस्य मूर्धनि ।
द्रोणकुम्भोदकैर्देवमभिषिच्य विधानतः ॥ ३६

घृतगन्धपयोभिस्तं लिङ्ग[6]मालिप्य सर्वतः ।
अभ्यर्च्य गन्धपुष्पाद्यैर्हस्तं विन्यस्य मूर्धनि ॥ ३७

व्योमव्यापि शिवं साङ्गं जपेदष्टोत्तरं शतम् ।
पञ्च ब्रह्माणि चाङ्गानि मृत्युञ्जयमतः परम् ॥ ३८

मन्त्रं पाशुपतं रुद्रं जपेदावृत्य[7] यत्नतः ।
यत्नात् [8]पीठं निधायाऽत्र तदिष्ट्वा देवमर्चयेत् ॥ ३९

क्षिप्त्वा[9]ऽष्टबन्धमचलमङ्गैरावरणैः सह ।
पूजयित्वाऽथ वस्त्राभ्यां वे यित्वा प्रयत्नतः[10] ॥ ४०

निर्गत्य भूयः स्वैर्मन्त्रैः परिवारान् प्रकल्पयेत् ।
द्वाःस्थौ विघ्नं शिवं द्वाःस्थौ दिगीशान् वाहनं तथा ॥ ४१

मातृः शास्तारमार्यां च गुहं चण्डेश्वरं पुनः ।
द्वाःस्थौ नन्द्यादिकान् पश्चात् भूतिदादीन् यथाक्रमम् ॥ ४२

---

1 आगच्छतु ह भगवाननुग्रहाय शिवो भव ध्रुवो भव नमोस्तु ते ख
2 शिव शर्व क 3 कुरु कुरु क, ख 4 मेतमिदं ग 5 हेमं ख
6 स्तल्लिङ्गं क 7 दावर्त्य ख 8 रत्नात् क, ग 9 कृत्वा ग
10 निर्गत्य परिवारांस्तान् स्थाप्य सम्पूजयेत्तन्मात् । क, ग पुस्तकयोः अधिकः ।

श्रीरुद्रपार्षदान्[1] सर्वान् स्वेषु स्थानेषु कल्पयेत् ।
कल्पयित्वा समाराध्य बलिं दत्वा प्रयत्नतः ॥ ४३

नमस्कृत्य प्रविश्यान्तर्मूलं मन्त्रं जपेद्गुरुः[2] ।
स्तुत्वा स्तोत्रैश्च विविधैर्भक्त्या देवं क्षमापयेत् ॥ ४४

दिशाहोमांश्च विधिवत् कृत्वा सर्वान् समर्चयेत् ।
धनधान्यादिभिर्वस्त्रैरन्नपानैश्च[3] पुष्कलैः ॥ ४५

गुरुं सम्पूजयेत्पश्चात् मूर्तिपैश्च समन्वितम् ।
दक्षिणां शक्तितस्तस्मै दद्यात्तेभ्यश्च शक्तितः ॥ ४६

त्रिरात्रं होमदानैर्नीत्वा तुर्येऽहनि क्रमात् ।
स्नानं सप्तदशद्रव्यैः शक्त्या देवस्य कल्पयेत् ॥ ४७

एषा प्रतिष्ठा कथिता पूजाद्यमुपरि क्रमात् ।
वदिष्येऽहं[4] समासेन संशोध्यैषा मनीषिभिः ॥ ४८

इति क्रियासारे शैवे पञ्चमः पटलः

षष्ठः पटलः

अथ वक्ष्ये समासेन पूजां सर्वार्थसिद्धिदाम् ।
स्नात्वा विधानतः कृत्वा देवर्षि-पितृतर्पणम् ॥ १

पूजनार्थं पुनर्गच्छेत् वाग्यतोऽन्तः शिवं स्मरन् ।
प्रक्षाळ्याचम्य विधिवत् द्वाःस्थाभ्यर्च्य संविशेत्[5] २

करशुद्धिं ततोऽस्त्रेण कृत्वा तालत्रयादिकम् ।
दिग्बन्धं तेन कृ वाऽथ ध्यात्वा दिक्षु दिगीश्वरान् ॥ ३

---

5 प्रविशेत् ।

---

1 रुद्रपारिषदान् ख 2 मूलमन्त्रं यथाविधि ख 3 रत्नदानैश्च ख
4 तत् ख

आत्मशुद्धिं ततः कुर्यादासीनो दर्भविष्टरे ।
रेचयेत्प्रथमं वायुं पूरयेत्कुम्भयेत्पुनः ॥ ४

रेचयित्वाथ भूतानि शोधयेत्संहृतिक्रमात् ।
पादाग्रे नाभिमूले च हृदि कण्ठे च तालुके ॥ ५

हृदयाद्यन्वितैर्बीजैः स्वैः स्वैर्मण्डलगैः क्रमात् ।
पञ्चभिश्च चतुर्भिश्च त्रिभिर्द्वाभ्यां सकृत्तथा ॥ ६

उद्घातावृत्तिभिस्तानि शोधयित्वा यथाविधि ।
आत्मानं योगमार्गेण व्योमस्थं परिकल्पयेत् ॥ ७

प्राणशक्त्यो[1]र्ध्वयायिन्या देहे सञ्चलिते सति ।
हन्त्यूर्ध्वं पीडितेऽपाने उद्घातस्तेन कीर्त्यते ॥ ८

नादेन[2] शोधनं[3] व्योम्नो वायुना शोधये[4]त्तनुम् ।
दग्ध्वाऽथ वह्निना भूयः सेचयेदमृतेन तु ॥ ९

दिव्यं देहं समुत्पन्नं ध्यात्वाऽऽत्मानं तु योजयेत् ।
कृत्वैवं देहशुद्धिं तु मन्त्रन्यासमथा[5]चरेत् ॥ १०

तले पृष्ठौ[6] च[7] करयोरस्त्रमन्त्रेण शोधयेत् ।
मूलेन व्यापकं न्यस्येदुभयोः करयोः पुनः ॥ ११

ब्रह्माणि पञ्च विन्यस्येत् कनिष्ठाद्यङ्गुलीषु च ।
तथैवाङ्गानि विन्यस्य शस्त्रं हस्त[8]तलद्वये ॥ १२

तथैव मूलं विन्यस्य व्यापकं च पुनर्न्यसेत् ।
कृत्वैवमन्तःकरणविन्यासं पुनरारभेत् १३

के वक्त्रे हृदि गुह्ये च पादयोर्विन्यसेत् क्रमात् ।
ब्रह्माणि पञ्च सद्यान्तं स्वे स्वे च वदने[9] न्यसेत् ॥ १४

---

2 नादः – आकाशः साम्यात् । 7 चकारात् तलद्वये पृष्ठद्वये पार्श्वद्वये

---

1 त्यो ख 3 शोधणं ख 4 शोधयेत् ख, 5 सं समा ख
6 तले पृष्ठे ख 8 हस्ते ख 9 पदगे ख

हृदयादीनि चाङ्गानि स्वेषु स्थानेषु विन्यसेत्[1] ।
न्यस्त्वैवं हृदि देवेशं ध्यात्वाऽभ्यर्च्य यथाविधि ॥ १५

ध्यात्वा[2] मन्त्रं ततः पूजामारभेत समाहितः ।
अस्त्रेण क्षाळयेत् पात्रं[3] कवचेनावगुण्ठयेत् ॥ १६

मूलेन पूरयित्वाम्भस्तत्र मन्त्रान् पुनर्न्यसेत् ।
तत्पयः शिवसन्तप्तं[4] कृत्वा संप्रोक्षयेत् पुनः ॥ १७

आत्मानं स्थण्डिलं चैव पात्राणि कुसुमानि च ।
आत्मानमर्चयेत्तत्र सकलीकृतविग्रहः[5] ॥ १८

आधारशक्तिं चानन्तं स्थण्डिले विन्यसेत् पुनः ।
धर्मं ज्ञानं च वैराग्यमैश्वर्यं च यथाक्रमम् ॥ १९

आग्नेयादिषु कोणेषु दिक्ष्वधर्मादिकान् न्यसेत् ।
सत्वं रजस्तमश्चैव मायाविद्ये सरोरुहम् ॥ २०

केसरेषु न्यसेच्छक्तिं [क्तीः] मण्डलात्मत्रयं क्रमात् ।
वामा ज्येष्ठा च रौद्री च काळी शक्तिस्तथैव च ॥ २१

कलविकलिनी चैव बलविकलिनी[6] तथा ।
बलप्रमथिनी चैव सर्वभूतदमन्यपि ॥ २२

मनोन्मनीति सम्प्रोक्ता केसरेषु[7] च मध्यतः ।
तारार्णैः सूर्यसोमाग्निमण्डलानि दलादिषु ॥ २३

आत्मानमन्तरात्मानं परमात्मानमित्यपि ।
मण्डलानामभेदेन[8] कल्पयेच्च यथाक्रमम् ॥ २४

---

3 शङ्खपूरणस्थानीयम् ।
5 सकलः – शिवः शिवीकृतविग्रहः, नारुद्रो रुद्रमर्चयेदित्युक्तेः ।
7 दलेष्विति शेषः । 8 मण्डलानामात्मत्रयाऽभेदेन – सूर्यमण्डलाभिन्नात्मने इत्यादयः ।

---

1 योजयेत् ख 2 जप्त्वा ख 4 सञ्जप्तं ख
6 कलाविकरिणी चैव वलाविकरिणी तथा ख

कल्पयित्वा ततो देवं कर्णिकोपरि संस्थितम् ।
चतुर्भुजमुदाराङ्गं सुमुखं प्रियदर्शनम् ॥ २५
जटामण्डलसंयुक्तं चन्द्रार्धकृतशेखरम् ।
श्वेतवर्णं त्रिणेत्रं[1] च सर्वाभरणभूषितम् ॥ २६
अक्षसूत्रकपालेऽधः[2] शूलं खट्वाङ्गमूर्ध्वतः ।
वहन्तं दक्षिणे वामे ध्यात्वा हस्तैः सदाशिवम् ॥ २७
अन्तःकरणविन्यासं देवमूर्तौ च विन्यसेत्[3] ।
चिद्रूपं हृदयाम्भोजात् ज्योतिरावाह्य पूजयेत्[4] ॥ २८
मन्त्र[5]न्यासं ततः कृत्वा मुद्राः सन्दर्शयेदथ ।
पाद्यमर्घ्यं तथाचामं स्नानं वस्त्रोपवीतके ॥ २९
पुनराचमनं दद्यात् भूषणं गन्धपुष्पके ।
एवं कृत्वा ततस्तस्मिन् शम्भुवक्षः[6] समर्चयेत् ॥ ३०
मूर्ध्न्यास्ये हृदि गुह्ये पत्सु[7] ईशानादीनि पूजयेत् ।
हृदयादीनि चाङ्गानि स्वेषु स्थानेषु पूजयेत् ॥ ३१
इष्ट्वैवं विधिना पश्चात् मूर्तिवक्षः[8] समर्चयेत् ।
पश्चिमोदग्यमैन्द्रोर्ध्वेष्वर्चयाः[9] सद्यादयः क्रमात् ॥ ३२
अग्नीशरक्षोवाय्वग्रे दिक्ष्वङ्गानि समर्चयेत् ।
दिक्ष्वनन्तं च सूक्ष्मं च शिवोक्तं [त्तमैकनेत्रके] चैकनेत्रकम् ३३
एकरुद्रं[10]त्रिमूर्तिं च श्रीकण्ठं च शिखण्डिनम् ।
ईशादिकोणेष्विष्ट्वैवमुमाद्याश्चोत्तरादिषु ॥ ३४
उमा चण्डेश्वरो नन्दी महाकालो गणेश्वरः ।

---

7 ऊर्ध्वं प्राग्याम्यसौम्यपश्चिमेष्विति व्याख्यातृसम्मतम् ।
10 ईशानादि कोणेष्वित्यनेनान्वयः ।

---

1 त्रिनेत्रं क 2 च ख 3 समाचरेत् ख 4 विन्यसेत् क, ग
5 मनु ग 6–8 पक्षं क, ग 9 ष्विज्याः क, ग

वृषो भृङ्गिरिटिः स्कन्दो बाह्ये लोकेश्वरान् यजेत् ॥ ३५
अनन्तं नैऋतेभ्यर्च्य शार्वेऽजं पूजयेदथ ।
वज्रं शक्तिं च दण्डं च खड्गं पाशं तथाङ्कुशम् ॥ ३६
गदां त्रिशूलं चक्रं च पद्मं तद्बाह्यतोऽर्चयेत् ।
गन्धैः पुष्पैस्तथा धूपैर्दीपैश्चैव निवेद्यकैः[1] । ३७
इष्ट्वैवं जुहुयात् पश्चाद्भूतेभ्योऽथ बलिं हरेत् ।
आचम्याचमनीयं च दत्वाऽन्नं च विसर्जयेत् ॥ ३८
तोयमाचमनं दत्वा मुखवासादिभिस्तथा ।
ततो गन्धैश्च पुष्पैश्च[2] पूजयच्च पुनः क्रमात् ॥ ३९
अभ्यर्च्य नत्वा[3] स्तुत्वैशमर्घ्यं दत्वा विसर्जयेत् ।
षडक्षरेण वा देवं यजेत विधिनाऽमुना ॥ ४०
न्यासेऽर्चने मनाग्भेदः स इदानीं निगद्यते ।
क्रमेण पुरुषाघोरसद्यवामेशमन्त्रकान् ॥ ४१
मन्त्रार्हबिन्दुसंयुक्तानङ्गुलीषूभयोर्न्यसेत् ।
करयोस्तर्जनीमध्यकनिष्ठाऽनामिकासु च ॥ ४२
अङ्गुष्ठयोश्च क्रमशः अङ्गान्यत्रापि पूर्ववत् ।
प्राग्दक्षिणाप्यसौम्योर्ध्वेष्विज्यास्तत्पुरुषादयः ॥ ४३
अङ्गादीनि यथा न्यायं पूर्ववत् पूजयेत् क्रमात् ।
इति संक्षेपतः प्रोक्तमर्चनं शास्त्रचोदितम् ॥ ४४
एतन्नित्यं क्रमात् कुर्यात् स्थापितेषु विशेषतः ।
अनिमित्ते न लुप्येत निमित्तं सं[4]भवेद्यदि ॥ ४५
कृत्वैवं निष्कृतिं योग्यां ततो देवं समर्चयेत् ॥ ४६

इति क्रियासारे शैवे षष्ठः पटलः

---

1 नैवेद्यकैस्तथा क, ग 2 ततस्तु गन्धपुष्पैश्च क, ग
3 दत्वा ख 4 च क ग

सप्तमः पटलः

निमित्ता बहवः प्रोक्ता पतनाद्याः शिवागमे ।
तेषु जातेषु तच्छांतिं कुर्याद्देशिकसत्तमः ॥ १

स्थाने दुष्टे भुवः शुद्धिं लिङ्गशुद्धिं तु कारयेत् ।
लिङ्गे दुष्टेऽथ लिङ्गस्य शुद्धया शुद्धिर्भविष्यति ॥ २

स्थानशुद्धिः पुरा कार्या लिङ्गशुद्धिस्ततो भवेत् ।
शुद्धौ कृतायां विधिवत् होमादिकमथाचरेत् ॥ ३

खननं हरणं दाहं[1] पूरणं गोनिवासनम् ।
विप्रोच्छिष्टं पञ्चगव्यं[2] सप्तताः स्थानशुद्धयः ॥ ४

खानयेद्दलिमात्रं वा पुरुषमात्रमथापि वा[3] ।
खदिराख्येन चास्त्रेण पांसूंस्त्यक्त्वा कुशैर्दहेत्[4] ॥ ५

गोमूत्रैः पूरयित्वाऽथ[5] विप्रपादोदकैस्तथा ।
ब्रह्मभिः पञ्चगव्यैश्च[6] प्रोक्ष्य सर्वत्र तत्र तु ॥ ६

गोभिराक्रमणं कृत्वा दशमृद्भिः प्रपूरयेत् ।
नदीवेदि[7]कुशक्षेत्रवल्मीकान्यद्रि[8]कादिभिः[9] ॥ ७

एवं कृत्वा यथा न्यायं दृढीकृत्य च मण्डपम् ।
कवचेन समालिप्य गव्याघोरास्त्रशोधिते ॥ ८

ब्राह्मणान् भोजयित्वाऽथ शांतिहोमादि[10] कारयेत्[11] ।

---

9 नदी, तत्तीरद्वयमृदः, वेदीमृत्, कुशस्थानमृत्, केदारमृत्, वल्मीकमृत्, अद्रिकं-तीर्थमृत् आदि पदात् चत्वरमृत् इति व्याख्यायाम् एवमपि दशसंख्या न पूर्यते ।

10 शङ्करप्रोक्तः शान्तिहोमः । आदिपदेन कलशाभिषेचनमुक्तम् ।

---

1 दाहः ख 2 च गव्यं च क ग 3 त्तदर्धकम् ख
4 पांसुं त्यक्त्वा दहेत्कुशैः ग 5 तु ख 6 पञ्चभिश्चैव क
7 तीर ख 8 ग्न्यादि ख 11 होमं समाचरेत् ख

लिङ्गं संशोध्य विधिवत् क्षाळनाद्यैर्यथाविधि[1] ॥ ९

क्षाळनं प्लावनं चैव स्नानं मार्जनमेव च ।
धारावगाहसेकांश्च कुर्याल्लिङ्गस्य शुद्धये[2] ॥ १०

क्षाळनं दर्भमृत्वम्भिस्तूष्णीं तोयैश्च शोधनम् ।
गन्धपुष्पाक्षतोपेतैरमन्त्रैः प्लावनं जलैः ॥ ११

सकूर्चैर्द्रव्यसंयुक्तै[3]र्मन्त्रवत् स्नानमम्बुभिः ।
पात्रे यथोक्तमापूर्य गन्धपुष्पाक्षतान्वितम् ॥ १२

कूर्चाग्रैर्मार्जनं कुर्यात् स्नानाङ्गं मार्जनं परम्[4] ।
संस्थाप्य धान्यराशिस्थमैशान्यां लोहसम्भवम् ॥ १३

वारुणं पात्रमापूर्य सकूर्चैः सलिलैः शुभैः ।
मत्स्य[5]कूर्मौ च सौवर्णौ राजतौ चात्र निक्षिपेत् ॥ १४

समृणाळां सपुष्पां च पद्मिनीं क्षाळितां तथा ।
वरुणं तत्र सम्पूज्य तीर्थमा[6]वाह्य मन्त्रतः ॥ १५

पालाशादि त्रिपादस्थं धारापात्रं तु लोहजम् ।
सहेमच्छिद्रमापूर्य सकूर्चं प्रतिमोपरि ॥ १६

धाराऽच्छिद्रा तु कर्तव्या याममात्रं दिने दिने ।
समन्त्र वारुणात् पात्रात् तोयं हृत्वात्र पूरयेत् ॥ १७

पञ्चमन्त्राः क्रमाज्जप्त्वा वाग्यतैर्दर्भपाणिभिः ।
स्पृशद्भिः पात्रमव्यग्रैर्ध्यायद्भिर्देवमव्ययम् ॥ १८

वैदिकास्तान्त्रिका मन्त्राश्चागमोक्ता यथाक्रमम् ।
धारान्ते पूजयेद्देवमुद्वास्य वरुणं पुनः ॥ १९

अवगाहं ततः कुर्यात् पात्रं कृत्वा प्रमाणतः ।
सञ्छाद्य वासो दर्भैश्च लिङ्गं संस्थाप्य तत्[7] पुनः ॥ २०

---

1 क्रमम् ख 2 सेकाभ्यामभिषेकोऽत्र सप्तमः क ग 3 यत्तैस्तै ख
4 मार्जयेल्लिङ्गं मन्त्रैस्तदिह मार्जनम् क ग 5 मत्स्यौ ख
6 ञ्चा क ख 7 तं ख

निच्छिद्रं पूरयेद्द्रव्यैर्व्यस्तैश्चैव[1] समस्तकैः[2] ।
पञ्चब्रह्मशिवाङ्गानि[3] व्योमव्यापि शिवं तथा ॥ २१

दशाक्षरं च नादं च महापाशुपतं तथा ।
महा[4]पाशुपताङ्गानि क्षुरिकां बीजमुख्यकम् ॥ २२

तारं[5] पञ्चाक्षरं चैव मृत्युञ्जयसमन्वितम् ।
श्रीकण्ठं पवमानं च रुद्रमन्यच्च शोभनम् ॥ २३

गव्यादि[7]रणे चैता[8]नपेयुरभितो द्विजाः ।
पञ्चकुम्भांश्च संपूर्य गन्धपुष्पाक्षतादिभिः ॥ २४

सम्पूज्य देवं गन्धाद्यैर्ब्रह्मभिश्चाभि[6]मन्त्रयेत् ।
ताभिस्तैः स्नापयेद्देवमभिषेकविधिः स्मृतः ॥ २५

एवं संशोध्य सम्पूज्य प्रायश्चित्तं समाचरेत् ।
ततः पारायणं[7] कुर्यात् निमित्तार्थानुसारतः ॥ २६

गेहस्य[8] दक्षिणे पार्श्वे कुण्डं खण्डेन्दुसन्निभम् ।
कृत्वा संशोध्य चोल्लिख्य वज्रेणास्त्रेण[9] चोक्षयेत् ॥ २७

विष्टरे कल्पयेत् कूर्चं कुसुमाक्षतवारिभिः ।
विष्टरे कल्पयेद्देवीं वामेन च[10] हृदार्चयेत् ॥ २८

सद्येनाग्निं समादाय शिवं जप्त्वा समर्चयेत् ।
अघोरेणाथ सद्येन निक्षिप्याग्निं हृदार्चयेत् ॥ २९

शिवेन[11] वर्मणा[12]ऽघोरपुरुषाभ्यां शिवेन[13] च ।
गर्भाधानादि कर्माणि कृत्वा चाग्निमुखान्तिकम् ॥ ३०

---

7 पारतीरकर्मसमाप्तौ इति धातोर्निष्पन्नः समाप्तिं ब्रूते एवं च आवित आरभ्यान्तं पठनं पारायणम् । 9 वज्रेण– पञ्चब्रह्मकवचेन, अस्त्रेण– पञ्चब्रह्मास्त्रेण । 10 च कारात् भुवनेश्वर्या च ।
11–13 ईशानेन । 12 तत्पुरुषेण ।

---

1 वस्त्रै ख 2 समन्ततः ग 3 शिवाङ्गैश्च ख
4 तथा ग 5 नादं ग 6 स्त्वभि ग 8 दैवस्य ग

वक्त्रेण[1] जुहुयात्पक्वं मन्त्रैरेभिः क्रमाद्गुनेत् ।
अघोरसद्यवामास्यै[2]रष्टोत्तरसहस्रकम् ॥ ३१

औदुम्बरोत्थाः समिधोऽपामार्गजाश्च घृतं हविः ।
अष्टोत्तरशतं पश्चादेभिरास्येन[3] होमयेत् ॥ ३२

तिलसर्षपमुद्गैश्च शालीभिश्च यवैरपि ।
दूर्वाभिर्वक्त्रमन्त्रेण सहस्रं जुहुयादथ ॥ ३३

दधिक्षौद्रघृतैरष्टशतं मृत्युजिता हुनेत् ।
ततः स्विष्टकृदादीनि होमशेषं[4] समापयेत् ॥ ३४

एषा च निष्कृतिः प्रोक्ता मरणादिषु मन्दिरे ।
मण्डपे शोधिते वह्निं संस्थाप्य गुरुमूर्तिपाः ॥ ३५

कृत्वा चाग्निमुखं पक्वं गायत्र्या जुहुयुः[5] क्रमात् ।
पञ्चभिस्त्रिसहस्राज्यं[6] ततः पञ्चाक्षरेण तु ॥ ३६

समित्सर्पिर्व्रीहितिलला जानां च सहस्रकम् ।
द्वादशोर्ध्वशतं साज्यं व्याहृतीभिः[7] पलाशजम् ॥ ३७

समित्सावित्रिया पश्चादष्टोत्तरशतं पृथक् ।
क्षीरं दधि तथा क्षौद्रं घृतं पूर्णां पृथक्पृथक्[8] ॥ ३८

एवं सर्वे तथा हुत्वा होमशेषं समाप्य च ।
सम्पातकलशाम्भोभिरभिषिञ्चेद्गुरुः स्वयम् ॥ ३९

ततः स्नानादिकं[9] कर्म कुर्यादुत्सवपश्चिमम् ।
पतनादिषु दोषेषु प्रायश्चित्तमिदं भवेत् ॥ ४०

---

1 पञ्च तारान् पुरोऽनूच्य ।
5 बोषबाहुल्ये पञ्चसप्त नव त्रयोदश वा होमाः कार्याः ।
6 पञ्च तत्वैः ६०० × ५ = ३००० आहुतयः । 7 २८ × ४ = ११२
8 पृथक् पूर्णाहुतिः । 9 अभिषेकादिकम् ।

---

2 वामाद्यैः ग 3 राज्येन 4 हुतशेषं ख

लिङ्गं स्वेदादिसम्भूते श्वचण्डालादिदूषिते ।
लिङ्गशुद्धिं क्रमात् कृत्वा शान्तिहोमं च कल्पयेत् ॥ ४१

कुण्डेऽग्निं च शिवीकृत्य[1] कुर्यादग्निमुखान्तिकम् ।
पक्वहोमात्पुरा पीठमन्त्रैराज्येन होमयेत् ॥ ४२

वक्त्रेण पक्वं ब्रह्मादिपूजामन्त्रैः[2] सकृद्घृतम्[3] ।
प्लक्षौदुम्बरवटजाः पैप्पलाः समिधो हुनेत् ॥ ४३

अष्टोत्तरशतं चाज्यमन्नं दूर्वाश्च होमयेत् ।
क्षीराज्यमधुसंसिक्ता लाजादीना[4]स्य विद्यया ॥ ४४

ततः स्विष्टकृतं हुत्वा[5] होमशेषं समापयेत् ।
शान्तिहोमः समुद्दिष्टः सर्वदोषप्रणाशनः ॥ ४५

भिन्ने तु कलशे पूर्णे स्नपनायाधिवासिते ।
पूरयित्वाऽपरे पात्रे शतमस्त्रेण होमयेत् ॥ ४६

सम्पाताज्येन संस्पृश्य जपेत्तावदनन्तरम् ।
एषा[6] निष्कृतिरुद्दिष्टा कलशेषु मनीषिभिः ॥ ४७

मन्त्रोत्पाते[7] तु विद्येशा होम्या वामोऽन्यवस्तुनि ।
अदक्षिणे चाङ्गहीने[8] वस्त्रदाहेऽसिनाऽयुतम्[9] ॥ ४८

प्रायश्चित्तानि कतिचित् प्रोक्तानीह समासतः ।
निमित्तार्थानुसारेण कुर्यादन्यान्यपि क्रमात् ॥ ४९

इति क्रियासारे शैवे सप्तमः पटलः

---

2 आवरणमन्त्रैरित्यर्थः । 4 अधिवासोक्तान् एवञ्च चतुर्दशद्रव्याणि
7 द्रव्यव्यत्यासे वामेन होतव्यः । 9 दक्षिणाहीने ब्राह्मणभोजनाद्यङ्गहीने
कलशादीनां वस्त्रदाहे च क्षुरिकामन्त्रेण चास्त्रेणायुतं हुनेदित्यर्थः ।

---

1 शमीकृत्य ख 3 सकृच्छनम् क 5 ततः स्विष्टकृदादीनि ख
6 एका ख 8 नचोत्पन्ने ख

अष्टमः पटलः

जीर्णोद्धारं वदिष्येऽत्र प्रतिष्ठा स्थैर्यसिद्धये ।
विधिना स्थापितं लिङ्गं गेहं वा जीर्यते यदि ॥ १
तदैव[1] विधिना चैवमुद्धरेत् तत्प्रयत्नतः ।
इन्द्रेशान[2]विभागे वा सोमेशानान्तरेपि वा ॥ २
कृत्वा काष्ठमयं गेह[3]मल्पं प्राकारबाह्यतः ।
नागे शोधेऽथ वा मूलप्रासादस्यानुरूपतः ॥ ३
प्रासादाभिमुखद्वारं[4] तदग्रे मण्डपं भवेत्[5] ।
चतुरश्रं यथान्यायं तन्मध्ये वेदिकान्वितम् ॥ ४
शोधयित्वाऽथ विधिवत् गेहं मण्डपमेव च ।
राक्षोघ्नादिविधिं कृत्वा संशोध्याभ्यर्चयेच्छिवम् ॥ ५
सम्पूज्य पार्षदांस्तत्र बलिं तेभ्यः प्रदापयेत्[6] ।
मण्डपे[7] स्वस्तिकं कृत्वा शय्यां तत्र समास्तरेत् ॥ ६
लिङ्गं कृत्वा विधानेन संशोध्य कलशादिभिः ।
शय्यामारोप्य[8] यत्नेन कलशं लोहसम्भवम् ॥ ७
शोधितं[9] सादयेदग्रे यथावत्साधकोत्तमः ।
कूर्चाक्षतांश्च रत्नानि लोहदूर्वाकुशान्वितम् ॥ ८
निक्षिप्य पूरयेदद्भिर्गालितैर्मूलमन्त्रतः ।
एवं कृत्वा बहिर्गत्वा लिङ्गं संशोधयेत्क्रमात्[10] ॥ ९
संशोध्य न्यस्य तत्वानि रक्षां कृत्वा बहिर्व्रजेत् ।
तत्तत्[11]कालावधिं पृच्छेत् तैरुक्तं तं निवेदयेत् ॥ १०

---

2 गेहे जीर्णे विधिमाह इन्द्रेति । 7 लिङ्गे जीर्णे आह– मण्डप इति ।

---

1 तदेवं ग 3 देह ख 4 प्राकारादिर्भवेद्द्वारि क ग
5 शुभम् ग 6 प्रदाय च ख 8 माराध्य ग
9 कलशं ख 10 ततः ख 11 कर्तॄन् ग

भगवन् वास्त्वभिनवं लिङ्गं वा नव शोभनम् ।
कारयिष्यन्ति ते भक्तास्तदनुज्ञातुमर्हसि ॥ ११

इति विज्ञाप्य देवेशं ब्राह्मणानामनुज्ञया ।
हेमवस्त्रादिकं दत्वा तेभ्यः शक्त्या प्रयत्नतः ॥ १२

ततस्तत्वानि संहृत्य देवताभिः समन्वितम् ।
लिङ्गं निवेश्य सकलं लिङ्गस्थं परमेश्वरम् ॥ १३

प्रणवाद्यन्तरुद्धैस्तु बिन्दुनादान्त[1]दीपितैः[2] ।
पञ्चब्रह्मभिरेवैवं[3] आवाहनविधिं नयेत् ॥ १४

आवाह्य कलशे[4] न्यस्य सकलीकृत्य पूजयेत् ।
ततः संवेष्टय वस्त्राभ्यां लिङ्गं सञ्छाद्य वाससा ॥ १५

गुरुः कलशमादाय वाद्यैः सर्वैः समन्वितम्[5] ।
मन्दिरात्तु बहिर्गच्छेत् वाग्यतः संस्मरञ्छिवम् ॥ १६

गेहं प्रदक्षिणीकृत्य शय्यायां तन्निवेशयेत् ।
ततः सम्पूज्य देवेशं लिङ्गे च कलशे क्रमात् ॥ १७

परितो जुहुयुः सर्वे मूर्तिपाश्चाधिवासनम् ।
अल्पगेहं तु संशोध्य विधिवत् होमसंयुतम् ॥ १८

पुण्याहान्तं विधायाथ तस्मिन् देवं प्रवेशयेत् ।
मुहूर्ते स्थापयेल्लिङ्गम् कलशस्थं नियोजयेत् ॥ १९

तस्मिन् लिङ्गे ततो मन्त्रं न्यासं कृत्वा समर्चयेत्[6] ।
परिवारान् यथान्यायं स्वेषु स्थानेषु कल्पयेत्[7] ॥ २०

बलिं दत्वा चतुर्थेऽह्नि स्नपनं च समाचरेत् ।

---

1 भूवनेशीप्रासादौ बिन्दुनादौ 4 शङ्खजले
6 मूललिङ्गं नित्यं दीपस्थापनेन निवेद्य दर्शनेन चार्चयेत् ।

---

2 भूषितैः क ग 3 रेभिर्वै ख 5 समन्वितः ग, तैः ख
7 क, ग पुस्तके अर्धं नास्ति ।

उत्सवाद्यखिलं कार्यं प्रतिष्ठाविधिनैव तु ॥ २१
गेहं कृत्वा यथान्यायं शिल्पिभिर्मुक्तमात्रके ।
गेहे यत्नेन लिङ्गञ्च संशोध्य क्षाळनादिभिः[1] ॥ २२
अल्पमन्दिरगं देवमावाह्य कलशे क्रमात् ।
मण्डपे चाधिवास्याथ मूललिङ्गे नियोजयेत् ॥ २३
प्रायश्चित्तादिकं सर्वं कृत्वा स्नानं समाचरेत् ।
लिङ्गम् जीर्णं यदि भवेत् तत्राप्येवं विधाय च ॥ २४
सूत्रच्छेदविधानेन हुत्वा तत्वान्यपि क्रमात् ।
आवाह्यात्मनि[2] तत्तत्वं भूत्वा चण्डेश्वरः स्वयम्[3] ॥ २५
उत्पाट्य लिङ्गम् विधिवत् शकटे तन्निधाय च ।
नीत्वा वृषाभ्यां सलिलं तस्मिन् चण्डेश्वरं[4] स्मरन्[5] ॥ २६
तन्मन्त्रेण क्षिपेदप्सु स्नात्वा गेहं व्रजेदथ ।
रत्नानि तत्र विन्यस्तान्यादद्यात् स्वयमेव तु ॥ २७
कृत्वा पूर्वसमं लिङ्गं शोधयित्वा यथाविधि ।
शय्यायां शाययित्वा तमल्पमन्दिरगं शिवम्[6] ॥ २८
आवाहय कलशे तस्यां शय्यायां तन्निवेशयेत् ।
पूर्वोक्त[7]विधिना सर्वमधिवासं विधाय च ॥ २९
रत्नन्यासादिं तत् कृत्वा पूर्वोक्तविधिनैव तु ।
पूर्वोक्तविधिना लिङ्गं स्थापयित्वा प्रयत्नतः[8] ॥ ३०

---

2 आदित्ये वा ।
4 ओं धुनि चण्ड हुंफट् इति, धु, नि, च, ण्ड, हुं, फट् बीजैरङ्गानि ।
खट्वाङ्गं परशुं शूलं तर्जनीं दधतं करैः ।
त्रिणेत्रं धूम्रवर्णं च ध्यायेच्चण्डेश्वरं विभुम् ॥

---

1 गेहं संशोध्य यत्नेन लिङ्गं च क्षाळनादिभिः ख 3 –श्वरं स्मरन् क ग 5 अयं श्लोकः क, ग पुस्तके नास्ति । 6 तु तदल्पं मन्दिरं शिवम् क ग 7 पूर्वोक्तेत्यादि श्लोकः ख, ग पुस्तके नास्ति
8 उत्तरार्धं ख पुस्तके नास्ति ।

कलशस्थं ततो लिङ्गे योजयेद्देशिकोत्तमः[1] ।
प्रतिष्ठाविधिना[2] सर्वं शेषं कुर्यात् स्वयं गुरुः ॥ ३१
प्रायश्चित्तान्यशेषाणि कारयेत्तत्र यत्नतः ।
पीठे जीर्णे च तत्रस्थां शक्तिं देवे यथाविधि ॥ ३२
नियोज्य कलशे[3] देवमावाह्य परिपूज्य च ।
मण्डपे चाधिवास्यैतां[4] पीठं संस्थाप्य यत्नतः ॥ ३३
क्षाळनाद्यैस्ततो लिङ्गं शोधयित्वाभिषेचयेत् ।
तेन पीठगतां शक्तिं पीठे स्थाप्य यथाविधि ॥ ३४
अष्टबन्धं च निक्षिप्य पूजयेत् कल्पवर्त्मना ।
शान्तिहोमाभिषेकादि कृत्वा सर्वं यथाविधि ॥ ३५
ततः क्षमापयेद्देवं प्रणामप्रार्थनादिभिः ।
गेहे जीर्णे[5] च[6] देवेशे तत्वानि सकलान्यपि ॥ ३६
देवताश्च समायोज्य सङ्कोचं वा समाचरेत् ।
जीर्णोद्धृतिः समासेन कथितैषाऽल्पमन्दिरे ॥ ३७
स्थापितं निक्षिपेदप्सु शैलं चेत् दारवं दहेत् ।
गुरुं सम्पूजयेत् पश्चात्[7] कर्ता मूर्तिधरानपि ॥ ३८
सदस्यान् पूजयेत्सर्वान् वित्तशाठ्यविवर्जितः ।
एवं यः कारयेत् भक्त्या स रुद्रत्वमवाप्नुयात् ॥ ३९
अष्टबन्धे विशीर्णे तु देवेशं नार्चयेदिति ।
आगमो हि यतस्तस्मात् क्षिप्रं तन्निक्षिपेद्बुधः ॥ ४०
तद्विशीर्णे कृता पूजा[8] विफला सा भवेद्यतः[9] ।

---

3 तत्वसंकोचे पृथिव्यादि मायान्ततत्वानां नमोन्तत्वमिति, यात्राहोममात्रं कार्यं न वास्तोष्पति होमः स तु लिङ्गपरित्याग एवेति च व्याख्याकाराऽऽशयः । 5 गेहे जीर्णे पक्षान्तरमाह ।

---

1 पूर्वार्धं ख पुस्तके नास्ति । 2 पूर्वोक्त-विधिना ख 4 स्यैतत् ख
6 थ ख 7 द्यत्नात् ख 8 तु सा पूजा क ग 9 कृता यतः ग

तस्मिन् पिशाचरक्षांसि प्रविशन्ति न संशयः ॥ ४१

तस्मात्तत्रोचितेनैव गेहं संशोध्य चोदिता ? [कर्मणा] ।
राक्षोघ्नम् वास्तुहोमं च बलिं वास्तोः समाचरेत् ॥ ४२

पुण्याहान्तं विधायाथ लिङ्गं संशोध्य चोदितः ? [यत्नतः] ।
नालं संशोध्य यत्नेन होमकर्म समाचरेत् ॥ ४३

कृत्वा चाग्निमुखं पक्वं गायत्र्या चात्र[1] होमयेत् ।
शक्तिभिः[2] सर्पिषा भूयो हुनेदष्टाष्ट संख्यया ॥ ४४

पूर्णाहुतिं पृथग्दत्वा मूलेन समिदादिकम् ।
जुहुयात् समिदाज्यान्नं धृतमष्टोत्तरं शतम् ॥ ४५

सम्पातविधिना हुत्वा हुनेत् स्विष्टकृदादिकम् ।
पीठमाराध्य विधिवत् गन्धपुष्पादिभिः क्रमात् ॥ ४६

आवाह्य सकलीकृत्य स्नानान्तं[3] देवमर्चयेत् ।
कृत्वा नान्दीमुखं शक्त्या ततः पुण्याहमाचरेत् ॥ ४७

अष्टबन्धं च सिकतं वसनाद्यं निधाय च ।
गन्धैर्विलिप्य मूलेन लिङ्गम् पीठं च सादरम् ॥ ४८

वस्त्राभ्यां वेष्टयेद्देवं पीठं चाहतवाससा ।
नालं सम्पूर्य सिकतैः मूलेन च सुवर्णकैः[4] ॥ ४९

शङ्खसर्जाऽभया लाक्षाः षट्चतुर्द्व्येकभागिकाः ।
एकैकं लाक्षया तुल्या कार्पासोपलवालुकाः ॥ ५०

लाक्षाभागमिता धात्री सर्वं तैलेन पेषयेत्[5] ।
सिकतोपलकार्पासलाक्षाचूर्णं विदुर्बुधाः ॥ ५१

---

2 गुर्वादिपद्मान्तैः सकृत् सकृत् नवशक्तिभिरष्टाष्टसंख्यया हुत्वाऽवशिष्ट-मण्डलात्मत्रयेण सकृत् सकृत् समष्टिमन्त्रेणाष्टवारं च जुहुयात् इति ।

---

1 वात्र ख 3 स्नाने तं ग 4 साष्टपत्रकैः क, ग
5 वेष्टयेत् क, ग

एषामेकाद्विहञ्जन्तु ! हरीतक्यास्तु चूर्णकम् ।
हरीतकी द्विभागं तु चूर्णं सर्जरसस्य तु ॥ ५२

शङ्खानां त्रिगुणं चूर्णं किञ्चिदामलकान्वितम् ।
तैलपिष्टमिदं चूर्णं बन्धानामुत्तमं विदुः[1] ॥ ५३

नवशक्तिमयं विद्यात् एतत् सम्पातसंयुतम् ।
शक्तिभिर्मूलमन्त्रेण ध्यात्वा जप्त्वा[2] यथाविधि ॥ ५४

देवं देवीं तथात्मानं कृत्वा दानं च शक्तितः ।
सुलग्ने निक्षिपेदेतद्देवं देवी[3] धिया स्मरन् ॥ ५५

कुर्यात्तत् सुदृढं श्लक्ष्णं ध्रुवाद्यौरिति कीर्तयन् ।
ततः सम्पूजयेद्देवं परिषद्भिः समन्वितम् ॥ ५६

ब्राह्मणान् भोजयेत् पश्चात्[4] [5] अन्नाद्यं सार्वकामिकम्[6] ।
प्रायश्चित्तादिकं कृत्वा स्नपनं च समाचरेत् ॥ ५७

एतद्यत्नेन कर्तव्यं विशीर्णे क्षिप्रमञ्जसा ।
कुण्डानां लक्षणं चापि तथा स्रुक्स्रुवयोरपि ॥ ५८

मुद्राणां लक्षणं नोक्तं मया गौरवभीरुणा ।
तत्सर्वं यत्नतो ज्ञात्वा कर्म कुर्याद्विचक्षणः ॥ ५९

अष्टबन्धमिदं प्रोक्तं गोप्यमेतत् सदा बुधैः[7] ।
अप्रकाश्यं च मूर्खाणां नास्तिकानां च यत्नतः ॥ ६०

इति क्रियासारे शैवे अष्टमः पटलः

---

1 एतत् श्लोकद्वयं अधिकमिति भाति नास्ति च ख पुस्तके ।
5 पश्चादिति पाठे कलशक्षेत्रात् पश्चिमे ।

---

2 ब्रत्वा, ध्यात्वा क, ग 3 देवीं ख 4 सर्वान् ख
6 ससुवर्णकम् ग, सार्ववर्णिकम् क 7 ख पुस्तके नास्ति ।

नवमः पटलः

अथ स्नानं प्रवक्ष्यामि देवदेवस्य शूलिनः ।
स्थापितस्य चतुर्थेऽह्नि कुर्यात् स्नानं यथाविधि ॥ १

शक्त्या सप्तदशद्रव्यैः क्रमात् संशोध्य मण्डपम् ।
पदानि परिकल्प्यैषु धान्यं पीठं प्रकल्प्य च ॥ २

अन्तर्बहिस्तथा मध्ये क्रमात् सम्पूरये[1]द्घटान् ।
द्रव्यांश्चास्त्रेण संशोध्य संसाद्य कलशानपि ॥ ३

यदा सप्तदशद्रव्यैः स्नानं देवस्य कल्पयेत् ।
पदानि वक्ष्ये द्रव्याणि मन्त्रान् स्नानक्रमं[2] तथा ४

पञ्चविंशत् पदै:[3] मध्ये नवकं चाष्टकं तथा ।
निधाय दिक्षु[4] शिष्टानि मार्जयेत् परितः क्रमात् ॥ ५

व्रीहिभिः पीठिकास्तेषु कृत्वा दर्भांश्च विन्यसेत् ।
पूजयेत् कलशान् पश्चात् क्षालितान् सूत्रवेष्टितान् ॥ ६

धूपितान् न्यञ्चिलानेव सादयेत् प्रणवेन तु ।
दर्भांस्तेनोपरि न्यस्य प्रोक्षयेत् गन्धवारिभिः ॥ ७

अघोरेणाक्षतैर्भूयः पञ्चार्णेन[5] विकीर्य तु ।
उत्तानीकृत्य वामेन आस्येनोत्थापयेत् पृथक् ॥ ८

तारेण न्यस्य सम्प्रोक्ष्य तेन कूर्चान् न्यसेत् क्रमात् ।
ततः सम्पूरयेत् द्रव्याण्यानाय्यानाय्य मूर्तिपैः ॥ ९

ऐशान्यां स्थापयेत्[6] पात्रं क्षालितं धूपितं महत् ।
तस्मिन्नरोमवस्त्रेण दीक्षितै[7]र्गालयेज्जलम् ॥ १०

---

4 कोणेष्वैकैकम् ।

---

1 सम्पूजयेत् ख 2 मन्त्रस्नानक्रमम् क, ग 3 पुटे ख
5 वर्णे ग 6 स्थापितम् क 7 दीक्षितो क, ग

गन्धपुष्पाक्षतान् न्यस्य तस्मिन्नभ्यर्च्य मन्त्रयेत् ।
तेन सम्पूरयेत् कुम्भान् वारिणोक्तमनुं जपन् ॥ ११

पूरितान् पूरितान् सद्यः पल्लवैरुपशोभयेत् ।
अस्त्रेण तेन विन्यस्य चक्रिकांश्च सतण्डुलान् ॥ १२

अलङ्कृत्यास्त्रमन्त्रेण वस्त्रैराच्छाद्य पूजयेत् ।
मध्यं सम्पूरयेत् पूर्वं[1] सर्वमन्त्रात्मकं परम् ॥ १३

पञ्चविंशतिभिर्दर्भैर्ग्रथितं कूर्चमुत्तमम्[2] ।
विन्यस्य हेममणिभिर्गन्धोदैश्च यथाविधि ॥ १४

योगपीठादिकं तस्मिन्[3] देवदेवं[4] समर्चयेत् ।
गन्धैः पुष्पैस्तथा धूपैर्दीपैर्नैवेद्यकैः क्रमात् ॥ १५

जप्त्वाऽनुज्ञाप्य देवेशमितरान् पूरयेत् क्रमात् ।
पञ्चगव्यं पयः पश्चाद्घिसर्पि-र्मधूनि च ॥ १६

रत्नोदं कुशतोयं च गन्धोदं बाह्यतः[5] क्रमात् ।
अन्तर्दलेषु जलधीन् क्षारादीन् पूरयेत् क्रमात् ॥ १७

क्षारं गौळम् सुरासर्पि-र्दधिदुग्धाच्छकोदधीन् ।
गर्भोदधिं[6] च सङ्कल्प्य क्रमात् सम्पूर्य पूजयेत् ॥ १८

ततो वीथीं च सम्मृज्य[7] गन्धोदैः प्रविलिप्य च ।
पुष्पाणि न्यस्य परितो न्यसेदङ्कुरपात्रकान् ॥ १९

ततो होमांश्च विधिवत् मूर्तिपैः कारयेद्गुरुः ।

---

2 उत्तममित्युक्तेरन्ये पक्षाः सूचिताः तथाहि प्रयोगदीपिकायां – नाडीकूर्चः सप्तभिर्वा चतुर्दशभिरेव वा । पञ्चविंशद्भिरथवा षट्त्रिंशद्भिरथापि वा ॥ इति । 5 बाह्ये पूर्वादिषु गव्यादीन् अन्तर्दलेषु पूर्वादि दिक्षु क्षारादीन् सङ्कल्प्य शुद्धजलैः पूरयेत् ।

---

1 कुम्भम् क, ग 3 तस्मात् क 4 देवे देवे क, ग
6 दर्भोदधिं ख 7 ततः पृथ्वीं च सम्पूज्य ख

राष्ट्रिय संस्कृत संस्थान जयपुर परिसर, जयपुर पुस्तकालय क्रमांक...152991

दिक्षु तत्पुरुषाद्यैश्च कोणेषु हृदयादिभिः ॥ २०
ईशानेन स्वयं कुर्यात् कृत्वा चाग्निमुखं क्रमात्[1] ।
पूजाक्रमेण मन्त्राणां दिग्व्यवस्थाः प्रकीर्तिताः[2] ॥ २१
पक्वं गायत्रिया हुत्वा तत एभिः क्रमात् हुनेत् ।
समिदाज्यचरून् लाजान् सर्षपांश्च तिलान् यवान् ॥ २२
व्रीहीन् सक्तून् पुनश्चाज्यं दश द्रव्याणि होमयेत् ।
पलाशखदिराश्वत्थप्लक्षन्यग्रोधबिल्वजाः ॥ २३
औदुम्बराश्च[3] कार्ष्म्यः समिधस्तु प्रकीर्तिताः[4] ।
अष्टोत्तरशतं कुर्यात् पृथक् पूर्णाहुतिं हुनेत्[5] ॥ २४
व्योमव्यापिदशार्णेन स्रुचा सा परिकीर्तिता ।
कलशानां तु बाहुल्ये होमबाहुल्यमिष्यते ॥ २५
अत्रैकमेव कुर्वीत कलशे पञ्चविंशतौ[6] ।
सम्पाताज्येन संस्पृश्य सम्प्रोक्ष्या[7]न्तर्बहिः पुनः ॥ २६
विज्ञापयेत्ततो देवं प्रणम्याञ्जलिमुद्रया ।
अधिवासः कृतो देव स्नपनाय मया तव ॥ २७
क्षणेन मे प्रसादोऽस्य क्रियतां परमेश्वर ।
इति विज्ञाप्य देवेशमनुज्ञाप्य द्विजानपि ॥ २८
मूर्ति-पैः सहितो विद्वान् स्नपनाय समारभेत् ।
अन्तः प्रविश्य देवेशं निर्माल्यमपकृष्य[8] च ॥ २९
प्रक्षाळ्याभ्यर्च्य विधिवत् तत्वानि न्यस्य सादरम् ।
मन्त्रन्यासं क्रमात् कृत्वा पाद्यार्घ्ये विनिवेदयेत् ॥ ३०

---

1 तथा ख 2 स्थाऽत्र कीर्तिता क 3 चोत्थाः ख
4 समुबाहृताः क, ग 5 बदेत् क, ग 6 के क, ख
7 सम्पूज्या 8 अवकृष्य क

ततश्चाचमनं दत्वा न्यस्य दूर्वाक्षतानपि ।
पादयोर्मूर्ध्नि तारेण नीराज्यास्त्रेण सादरम् ॥ ३१

स्नापयेत् कलशैः पश्चात् पञ्चगव्यादिभिः क्रमात्[1] ।
पञ्चभिर्ब्रह्मभिः पूर्वमाप्यायस्वेति वै पयः ॥ ३२

दधिक्राव्णश्च तेजोसि मधुवाता ऋताय ते ।
आकृष्णेनेति रत्नाम्भो देवस्यत्वा कुशोदकम् ॥ ३३

गन्धद्वारेति गन्धाम्भो जलधीन् स्नापयेत्ततः ।
समुद्रज्येष्ठा वर्गेण[2] मध्यमं व्योमविद्यया[3] ॥ ३३ (अ)

खण्डशः पूरयित्वा च नीराज्य स्नापयेत् परैः[4] ।
अवस्तुतेन सम्प्रोक्ष्य देवस्य परिचारकान्[5] ॥ ३४

ततः सम्पूजयेद्देवं भक्त्या तु परमेश्वरम् ।
आचार्यं पूजयेत्पश्चात् मूर्तिपांश्च सदस्यकान् ॥ ३४ (अ)

पञ्चविंशतिभिर्वात्र स्नानं देवस्य कल्पयेत् ।
उक्तद्रव्यैश्च मन्त्रैश्च वक्ष्ये तत्र पदान्यहम् ॥ ३५

क्षेत्रे सप्तपुटे मध्ये नवकेऽब्जं समालिखेत् ।
त्रिकं दिक्षु विदिक्ष्वेकं शिष्टानि परिमार्जयेत् ॥ ३६

पूर्ववत् पूरणं प्रोक्तं स्नानं पूर्ववदेव हि ।
वक्ष्ये शतार्धैरेकोनैः पदमात्रेण भिद्यते ॥ ३७

षट् दिक्षु मध्ये नवकं कोणेषु च चतुष्टयम् ।
पञ्चाशत्येकहीने तु क्षेत्रे नवपुटे नयेत् ॥ ३८

एकाशीतिघटैर्वात्र स्नानं देवस्य कल्पयेत् ।

---

1 अत्र व्याख्यायां द्रव्यदेवता वाचकः श्लोकः अधिकतया उक्तः — ईशानश्चैव सावित्री सीमो रुद्रो हुताशनः । स्कन्दश्च धनदः पद्मसम्भवो जम्भकान्तकः । इति । 2 एकैककलशस्नपने सम्पूर्णवर्गः ।

3–4 इदं अर्धद्वयं क, ग पुस्तकयोः नास्ति । 5 वारकान् घ

एकादशपुटे क्षेत्रे नवानां नवकं नयेत् ॥ ३९

पूर्ववत् पूरणं स्नाने[1] शतेनाष्टोत्तरेण वा ।
द्रव्यैरमीभिर्मन्त्रैश्च पदमात्रं निगद्यते ॥ ४०

मध्ये च नवकं दिक्षु कोणे षोडशकं तथा ।
त्रयोदशपुटे क्षेत्रे पदान्येवं प्रकल्पयेत् ॥ ४१

क्षेत्रे साज्यपुटे[2] वीथीं लुम्पेत्[3] पञ्चपुटान्तरे ।
मध्य[4]खण्डेन कमलमष्टपत्रं समालिखेत् ॥ ४२

कृत्वैवं तु पदान्येभिर्द्विशतैर्वा नवोत्तरैः ।
स्नानं कुर्यादशक्तो यो भक्तो विस्तारकामुकः ॥ ४३

इदं चतुर्थदिवसे स्नानमागमचोदितम् ।
अन्यत्रापि समुद्दिष्टं शक्त्या कुर्याद्विचक्षणः ॥ ४४

अथापरं प्रवक्ष्यामि स्नपनं शास्त्रचोदितम् ।
पञ्चविंशतिभिर्द्रव्यैरधमादिक्रमेण तु ॥ ४५

पञ्चविंशतिभिर्वाऽत्र शतार्धैरेकहीनकैः ।
एकषष्टिघटैः प्रोक्तैरेका[5]शीतिभिरेव वा ॥ ४६

अष्टोत्तरशतैर्वाथ तदिदानीं निगद्यते[6] ।
षोडशैन्द्रोत्तराग्राणि सूत्रान्यास्फाल्य मध्यतः ॥ ४७

पद्मार्धं नववीथीश्च चतस्रो दिक्षु मार्जयेत् ।
त्रिकं दिक्षु विदिक्ष्वेकं ततो वीथीश्च कल्पयेत् ॥ ४८

नव दिक्ष्वष्ट कोणेषु त्रिकाण्यष्टौ[7] भृशादिषु ।

---

2 सप्तदशपुटे । 6 कलशेषु पद्मकल्पित्तिरनुष्ठानपद्धत्या स्फुटी भवतीति तत एव ज्ञेया ।

---

1 स्नानम् ख 3 वीथीर्लुम्पेत् ख 4 मध्ये ख
5 क्त एका क, ग 7 ष्ट ख

एवं कृत्वा यथा न्यायं शिवकुम्भं तु पूरयेत् ॥ ४९

पूर्ववत् पूरयित्वा तदितरान् पूरयेत्ततः ।
पाद्यमाचमनं चार्घ्यं पञ्चगव्यं घृतं मधु ॥ ५०

क्षीरं दधि च दिक्कोणेष्वथ बाह्ये प्रपूरयेत् ।
इक्षूदकं फलोदं च कषायं सक्तुमिश्रितम्[1] ॥ ५१

गन्धं पुष्पं हिरण्यं च रत्नं मौक्तिकविद्रुमौ ।
यवोदतिलदूर्वोदं[2] चोत्पलं[3] कुशशालिजे[4] [5] ॥ ५२

पूरयेद्दिक्षु कोणेषु भृशादिषु यथाविधि ।
ईशानः पितरः स्वाहा वाक्सावित्री हुताशनः ॥ ५३

स्कन्देन्दुरुद्रदुर्गाश्च विघ्नो विघ्नेश्वरोऽग्रजा[6] [7] ।
इन्द्रविष्णुविरिञ्चाश्च कुबेरो वरुणो रविः ॥ ५४

वायुर्यमः[8] श्रीर्भूमिश्च ऋषयो[9] विश्वदेवताः ।
मध्यमादि क्रमात्प्रोक्ताः कलश[10]द्रव्यदेवताः ॥ ५५

दूर्वासिद्धार्थकतिलगिरिमृत् पाद्यमुच्यते ।
जातीलवङ्गतक्कोलमाचामं परिकीर्तितम् ॥ ५६

अक्षतं तिलसिद्धार्थौ यवस्तोयं[11] पयोदधि ।
कुशाग्रं चार्घ्यमुद्दिष्टं फलतोयमथो ब्रुवे ॥ ५७

कदळीपनसं चाम्रं बिल्व[12]मामलकं तथा ।
बीजपूरं च भव्यं च नाळिकेरफलोदकम् ॥ ५८

मधुकाम्रवटाश्वत्थशिरीषपनसद्विजैः ।

---

1 सक्तूदकम् । 3 उत्पलोदकम् । 5 कुशतोयं शालितोयम् ।
7 ज्येष्ठा ।

---

2 दूर्वाश्च क 4 शालिजौ क, ग 6 राग्रजे क, ग 8 वागर्यमा क
9 मुनयो क 10 कमलं ख 11 यवतोयं ख 12 बिलं क, ग

सोदुम्बरैः कषायं च गन्धोदकमथो ब्रुवे ॥ ५९

उशीरं कुङ्कुमं चैव मांसीमलयजं तथा।
मुरवारि गदामांसि गन्धोदकमुदीरितम् ॥ ६०

पद्मं सौगन्धिकं जातीमल्लिकाबकुळं तथा ।
चम्पकं नन्दिकावर्तद्वयं च कुसुमोदकम् ॥ ६१

मणिमुक्तामरकतमिन्द्रनीलं तथैव च ।
वज्रं वैडूर्यकं पुष्यं गोमेदं रत्नमीरितम् ॥ ६२

एतैः सम्पूर्य सम्पूज्य वस्त्रैराच्छाद्य सर्वतः ।
हुत्वा पूर्वोक्तमार्गेण[1] पूजयित्वा महेश्वरम् ॥ ६३

विज्ञाप्य पूर्ववद्देवं विधिवत्[2] स्नानमाचरेत्[3] ।
इदं विष्णुरिति पाद्यमापः पुनन्त्वतः परम् ॥ ६४

आपोहिष्ठाग्निमीळे स्यादिषेत्वेति च पञ्चमम् ।
मधुवाताप्यायस्वेति दधिक्राव्णस्तथा ह्यथ ॥ ६५

उपत्वाग्न इति प्रोक्तं मानस्तोके फलोदकम् ।
अश्वत्थे वः सुमित्र्यान अग्न आयाह्यतः परम् ॥ ६६

पुष्पावती[4]ब्रह्मजज्ञानं हिरण्यवर्णास्त[5]थैव च ।
समुद्रज्येष्ठारक्षोहणं यवां हस्तौषधीरिति ? ६७

[समुद्रज्येष्ठा रक्षोहणं तथौषधय इत्यपि ।
पितरः पितामहाश्चैव श्रियेजा जातवेदसे ।
देवस्यत्वाऽऽशुः शिशानः व्योमव्यापि महामनुः][6]

---

1 पूर्वोक्ताधिवासहोमं कृत्वा । 2 खण्डशः पूजयित्वाऽन्तरान्तरा स्नानं कृत्वा नीराज्य खण्डान्तरेण स्नापयेत् । तन्महेशायेत्यन्तरा स्नानमन्त्रः ।
6 अत्र किञ्चित्सर्वग्रन्थेषु लुप्तमिति भाति तदर्थं मयार्धत्रयं विरच्य समाहितम् ।

---

3 मारभेत् ख 4 पुष्पावतीं ख, ग 5 हिरण्यवर्णाम् ग

एवं संस्नाप्य देवेशं पूजयेत्कल्पवर्त्मना ॥ ६८

एकाशीति घटैर्वाऽथ स्नापयेद्वा महेश्वरम् ।
त्रयोदशपुटैः[1] पद्मं पञ्चविंशतिभिर्लिखेत् ॥ ६९

कोणेषु नवकान्येषां मध्ये[2] त्रीणि त्रिकाणि तु ।
एकादशपुटे पद्मम् पञ्चविंशतिभिर्लिखेत् ॥ ७०

चतुष्कोणे चतुष्कं तु तेषां मध्ये द्विकत्रयम्[3] ।
शतार्धै-रेक[4]हीनैर्वा स्नानमेवं प्रकल्पयेत् ॥ ७१

पञ्चविंशतिकुम्भैर्वा स्नानं शुद्धाम्बुवर्जिते[5] ।
कुर्यात्कर्तुरशक्तिः स्यान्नान्यत्र विहितः क्वचित् ॥ ७२

विंशैः[6] सूत्रैर्बहिः षट्कं चतुष्काण्यन्तराष्टकम् ।
अष्टद्वादशका[7]न्यन्तर्नवकेऽब्ज[8]शतद्वये ॥ ७३

षट्चतुष्कद्विकोणेषु[9] ह्यन्तस्तद्बाह्यतः क्रमात् ।
द्विषट्कं चाष्टद्वितयं[10] दिग्विदिक्ष्वन्तराष्टकम् ॥ ७४

नवकान्येव तैः सूत्रैः पूर्वं सप्तदशाधिकम् ।
एकविंशत्पुटेऽष्टौ च नवकान्यन्तराम्बुजम् ॥ ७५

बहिश्च नवकोणेषु दिक्षु द्वादशकत्रयम्[11] ।
शतद्वयं द्विपञ्चाशदुत्तरं परिकीर्तितम् ॥ ७६

क्षेत्रे गोत्रपुटे[12] पद्मं पञ्चविंशतिभिर्लिखेत् ।
दशकं दिक्षु कोणेषु त्रिकं बाह्ये च दिक्ष्वथ ॥ ७७

---

2 दिक्षु अन्तराळेषु च त्रिकं त्रिकम् । 3 दिक्षु अन्तराळेषु च द्विकं द्विकम् उभयत्रापि मध्ये कोणमध्ये इत्यर्थः । 8 अब्जमिति च्छन्नो युक्तः । 9 चतुष्कं दिक्कोणेषु इति पाठोऽयुक्तः । 11 कोणयोर्मध्ये दिशि पार्श्वयोः (अन्तराळे) आहत्य द्वादशकत्रयम् । 12 त्रयोविंशतिपुटे ।

---

1 त्रयोदशपुटे क 4 रेव क ग 5 वर्जितैः क, तम् ग
6 विंशत् ग 7 न्यत्र न ग 10 दिक्ष्वत्र ग

पञ्चविंशति[1]कोणेषु सप्तद्वादशकान्तरा[2] । [सप्तदशदशान्तरा]
त्रिशते च पदान्येवं पूर्वोक्तैः स्नानमाचरेत् ॥ ७८
क्षेत्रे धीरपुटे[3] पद्मं पञ्चविंशतिभिर्लिखेत् ।
दिक्ष्वष्टास्वन्ततो बाह्ये कोणे सप्तदशानि वै ॥ ७९
पञ्चविंशतिकान्येषां मध्ये त्रीणि[4] प्रकल्पयेत् ।
पञ्चविंशतिभिर्द्रव्यैः एवं पञ्चशतं स्मृतम् ॥ ८०
द्रव्यैरन्यैश्च संयुक्तं स्नानं कुर्यादथापि वा ।
अष्टोत्तरशतं कृत्वा नवकानि च षोडश ॥ ८१
चतुर्विंशतिसूत्रैश्च तथा सम्पूर्य मध्यतः ।
बाह्ये तैलं गुळं चैव नाळिकेरपयोदकैः[5] [6] ॥ ८२
तीर्था[7]न्नद्यास्तटाकाच्च कूपादादाय वै जलम् ।
दिक्षु कोणेषु सम्पूर्य शर्वाद्यैर्विषमैः[8] समैः[9] ॥ ८३
शैलेक्षवेदिकाक्षेत्रखलनद्यङ्घितीर्थजाः ।
मृदो भृशादिषु न्यस्यान्मन्त्रै[10]र्वि द्येश्वरात्मभिः[11] ॥ ८४
स्नापयेच्च क्रमान्मन्त्रैर्यथोक्तै रेभिरेव तु ।
क्षेत्रे गोत्रपुटे मध्ये कृत्वा सनवकं शतम् ॥ ८५
तद्बाह्ये पञ्चदशकं नवकं दिग्विदिक्षु च ।
अष्टद्वादशकं कुर्याद्भृशादिषु यथाक्रमम् ॥ ८६
द्रव्यैरमीभिर्मन्त्रैश्च स्नापयेत् त्रिंशतैर्घटैः ।
कृत्वा विंशच्छतं[12] मध्ये कोणस्थनवकान्वितम् ॥ ८७

---

1 आर्षो विभक्तिलोपः । 2 विदिक्षु सप्तदशकं अन्तराळेषु दशकमिति भाव्यं तदर्थं मदीयपाठ आश्रयणीयः । 3 एकोनत्रिंशत्पुटे । 4 कोणयोर्मध्ये पञ्चविंशतित्रिकं एवं च पञ्चोत्तरपञ्चशतं भवति । 6 नाळिकेररसं तज्जलं च । 8 शर्वपशुपतिभवमहादेवैर्विषमैः रुद्रेशानोग्रभीमैः समैः । 11 अनन्तादिभिः ।

5 फलोदकैः ग 7 तीर्थं क 9 समः क 10 तन्त्रैः ख 12 च्छतैः ग

वृतं नवकविंशत्या कुर्यात् गन्धोदकान्वितैः ।
द्रव्यैर्मन्त्रैश्च मूलान्तैः स्नानं घटशतत्रये ॥ ८८
क्षेत्रे मित्रपुटे[1] मध्ये शतं द्वादशकोत्तरम् ।
कृत्वा द्वादशकं दिक्षु कोणे षोडशक बहिः ॥ ८९
चतुष्टयत्रिकं तेषां मध्ये कुर्याद्विचक्षणः ।
पूर्वोक्तैर्द्रव्यमन्त्रैश्च पूरयेद्वा यथाविधि ॥ ९०
चतुष्काणि मृदां पार्श्वे गन्धोदैर्मूलमन्त्रतः ।
पूरयित्वाऽभिषिञ्चेत्तैस्तेन देवं समाहितः ॥ ९१
विंशत्समेतमेतद्धि त्रिशतं परिकीर्तितम् ।
चतुर्भिः सहितं वक्ष्ये स्नानं पञ्चशतैर्घटैः ॥ ९२
क्षेत्रे कोलपुटे[2] मध्ये कुर्यादष्टोत्तरं शतम् ।
नवकान्यष्ट तन्मध्ये त्रीणि त्रीणि त्रिकानि च ॥ ९३
गन्धोदपूरितं कुर्यात् मृदां[3] पार्श्वे[4] च यत्त्रिकम्[5] ।
तद्बाह्ये नवकान्यष्टविंशतिं कल्पयेत् गुरुः ॥ ९४
कर्पूरवानरतटिन्मण्डलद्रुमाम्बुरुहायसा ।[6]
कर्दमतङ्कौ ![6] न्यस्य बहिरावरणे क्रमात् ॥ ९५
वैडूर्यमिन्द्रनीलं च मणिविद्रुमवज्रकम्[7] ।
मुक्ताफलं मरकतं दक्षिणस्यां प्रपूरयेत् ॥ ९६
वटाश्वत्थशिरीषेध्मा[8] बिल्वप्लक्षाम्रजत्वचः ।
पश्चिमे न्यस्य गोधूमशालिभिर्यवमुद्गकैः ॥ ९७
तिलप्रियङ्गुनिष्पावैरुत्तरस्यां प्रपूरयेत् ।
पुरुषाघोरसद्याख्यवामदेवैः प्रदक्षिणम् ॥ ९८

---

1 पञ्चविंशतिपुटे ।
2 एकत्रिंशत्पुटे । 4 मृदां पार्श्वद्वये त्रिकं गन्धोदपूरितं कुर्यात् ।
6 कर्पूरवानरपयोबपटीरवारिकुण्ठागरूणि इति युक्तम् । 8 पलाशः ।

---

3 मृदा क ग 5 पार्श्वं च यन्त्रिकम् ग 7 वज्रके क ग

पूरयित्वा समभ्यर्च्य भक्त्या तैः स्नापयेत् गुरुः ।
देवं सम्पूजयेद्भक्त्या गुरुमूर्तिधरैः सह ॥ ९९
पण्डितान् ब्राह्मणान् भक्तान् सर्वानन्नादिभिः क्रमात् ।
इति संक्षेपतः प्रोक्तं स्नानं सर्वार्थसाधकम् ॥ १००
एतद्वै साधकः कृत्वा सर्वान् कामानवाप्नुयात् ।
दिशाहोमं ततः कुर्यात् विधिदृष्टेन वर्त्मना ॥ १०१
अष्टदिक्षु निधायाग्निं कृत्वा चाग्निमुखान्तिकम् ।
अमीभिर्जुहुयान्मन्त्रैः पक्वं विधिवदृत्विजः ॥ १०२
इन्द्रक्रतु[1]मिति प्राच्यां अग्निं दूतं हुताशने ।
नाके सुपर्णं याम्यायां[2] नैर्ऋत्यां मोषुणः परा ॥ १०३
यं[3] रक्षन्तीति वारुण्यां तव वायो हि वायवे ।
सोमं राजानमित्येवं सौम्ये शार्वे त्रियम्बकम् ॥ १०४
पञ्चतारान्[4] पुरो[5]नूच्य प्रत्येकं पूर्वतः क्रमात् ।
पक्वानेवं ततो हुत्वा जुहुयात्पूर्वचोदितैः ॥ १०५
द्रव्यैश्चतुर्भिर्वा मन्त्रैरथेन्द्राद्यै[6]र्यथाक्रमम् ।
होमान् समाप्य कलशैः सम्पाताज्यसमन्वितैः ॥ १०६
पीठिकासु च[7] संस्थाप्य पूजयेद्विधिना क्रमात् ॥ १०७

इति क्रियासारे शैवे नवमः पटलः

---

6 इन्द्राय सुराधिपतये सायुधवाहनपरिवाराय स्वाहा इत्यादिभिः ।
7 इन्द्रादिपीठिकासु संस्थाप्याभिषिच्य पूजयेत् ।

---

1 केतु क ग 2 याम्यां तु क 3 यां क ग 4 धारान् क
5 पुरे क ग

दशमः पटलः

उत्सवं च ततः कुर्यात् नृत्तगीतसमन्वितम् ।
अन्नाद्यबलिभूयिष्ठं नानावादित्रसङ्कुलम् ॥ १

बीजाङ्कुरं क्रमात् कृत्वा ध्वजान् संस्थाप्य यत्नतः ।
पताकाश्च शुभा न्यस्य पूजयेत् गन्धपुष्पकैः ॥ २

नमस्तेऽस्तु पताकायै सर्वलोकस्य धात्रियै ।
उत्सवस्य शिवस्यास्य त्रायस्व च सदा नमः[1] ॥ ३

सम्मार्ज्यालिप्य सर्वत्र किकिरेत् कुसुमाक्षतैः ।
सन्धूप्यायः[2] पुराद्यैश्च ततः सम्पूजयेच्छिवम् ॥ ४

स्नपाप्य शुद्धतोयैश्च पयोदध्याज्यगव्यकैः ।
गन्धोदैर्नालिकेराद्भिः कलशैर्वि-धिवत् पुनः ॥ ५

गन्धैर्वि-लिप्य वासोभिः परिधाप्योज्वलं यथा ।
पूजयित्वा निवेद्यान्नं भक्ष्यभोज्यादिसंयुतम्[3] ॥ ६

ईशाद्यास्येषु च तथा पायसादि निवेदयेत् ।
ईशास्ये पायसं पुंसि हारिद्रं कृसरं पुनः ॥ ७

भीमे गौडं तथा वामे सद्यास्ये सर्वमेव तु ।
निवेद्यैवं ततो हुत्वा बलिं दत्वा स्वयं गुरुः[4] ॥ ८

आचम्याचमनीयं च दत्वाऽन्नं च विसर्जयेत्[5] ।
पानीयं मुखवासं च दत्वा सम्पूज्य भक्तितः ॥ ९

जप्त्वा[6] स्तुत्वा नमस्कृत्य क्षमस्वेति क्षमापयेत् ।
निशि भूतबलिं दद्यात् नृत्तगीतसमन्वितम् ॥ १०

---

1 मम ख 2 प्यायं क ग 3 भक्त्या क्षीरोपदंशकम् ख
4 स्वयं दत्वा बलिं गुरुः ख 5 विसृजेत्पुनः ख
6 नत्वा ख

कौतुके देवमाराध्य शिष्यस्य शिरसि न्यसेत् ।
स्वस्ति जप्त्वा बहिर्गत्वा द्वाःस्थादिभ्यो बलिं हरेत् ॥ ११
नन्दिनं च[1] महाकाळं गणेशं दक्षिणेश्वरम् ।
शूलपाणिं परशुपाणिं दिक्पान् वाहनमेव च ॥ १२
मातृः शास्तारमार्यां च स्कन्दं चण्डेश्वरं पुनः ।
तीक्ष्णदंष्ट्रमृगास्यौ च नन्द्यादीन् पूजयेत् क्रमात् ॥ १३
पाद्यार्घ्याचमनं गन्धं पुष्पं धूपं च दीपकम् ।
जलं बलिं ततो दद्यात् बलिमुद्रां च दर्शयेत् ॥ १४
नृत्तं गीतं च वाद्यं च कृत्वा कृत्वा यथाक्रमम्[2] ।
तेषां दत्वा बलिं पूर्वं पार्षदान् पार्श्वमण्डले ॥ १५
मालामन्त्रै[3]स्ततो दद्याद्दिक्षु कोणेषु चैव हि ।
दिक्पान् पूर्वमुत्थाप्य वाहनं च ततोऽर्चयेत् ॥ १६
आगमेषूद्धृतान् मन्त्रानहं लिख्ये समासतः ।
[4]स्फुर स्फोटय हुं व्यक्ष स्वाहा । ओं प्रों[5] ह्रीं कपालिन्[6]
हन्नमः । नन्दिने नमः महाकालाय नमः ॥ १७
तत्पार्षदेभ्यो नमः इति प्रधानानन्तरं ददेत् ।
ओं गं गणपतये नमः । तत्पार्षदेभ्यो नमः ।
ओं दं दक्षिणामूर्तये नमः[7] । तत्पार्षदेभ्यो नमः[8] ॥

---

3 एवं भूतबलिक्रमं विधायोत्सवबलिक्रममाह मालेति ।

4 अथ नन्दिमहाकाळावन्तर्द्वारस्य पालकौ । उपस्थाय च सम्पूज्य बलिं दद्यात्तयोरथ । नमोऽस्तु वेत्रहस्ताभ्यां द्वाःस्थाभ्यां वै पिनाकिनः । नन्दिने तु नमस्तुभ्यं महाकाळाय ते नमः ।। ओं स्फुर स्फोटय हुं व्यक्ष स्वाहा । नन्दिने नमः । ओं ह्रीं प्रों कपालिन् ह नमः । महाकाळाय नमः । ओं नमस्ते विघ्नराजाय दक्षिणामूर्तये नमः । इति च योज्यम् ।

---

1 नन्दि चैव क 2 सुयत्नतः ख
5 ह्रीं प्रों ख 6 लिं क 7–8 क, ग पुस्तकयोः नास्ति ।

नमस्ते द्वारि युक्ताय शूलहस्ताय धीमते ।
दृष्ट्या निहतदैत्याय शङ्कराय[1] नमो नमः ॥
शूलपाणये नमः । तत्पार्षदेभ्यो नमः[2] ॥
नमस्ते द्वारि युक्ताय परशुव्यग्रपाणये ।
दृष्ट्या निहतदैत्याय शङ्कराय नमो नमः ।
परशुपाणये नमः । तत्पार्षदेभ्यो नमः ॥ १८
दैत्यदर्पविनाशाय देवराजाय[3] धीमते ।
कुलिशव्यग्रहस्ताय नमस्तेऽस्तु शतक्रतो ॥ १९
इन्द्राय सुराधिपतये रुद्रपार्षदाय[4] नमः । तत्पार्षदेभ्यो नमः ॥
नमो भूतेभ्योऽरिष्टकृद्भ्यः सद्भ्योऽसद्भ्यः सदसद्भ्यः
सर्वगणेभ्यो नमो नमः । पूर्वस्यां दिशि शिवस्य भगवतो
ये गणा वज्रपाणयः श्वेताक्षाः[5] श्वेतलोहिता दिव्यन्तरिक्ष-
भौमाः पातालवासिनश्च तेभ्यो वै नमो नमः स्वाहा ।
ये भूताः पुरः सदो निशाचरा रौद्राः सन्तोऽसन्तः सदसन्तो
विरूपा विश्वरूपा महारूपा घोररूपा मृगास्याश्च[6]
विहगाननाः पुष्टिकृतोऽपुष्टिकृतः कामदाश्च बलिमिच्छन्ति
तेषां सर्वेषां[7] बलिं हरामि महद्भ्यः क्षुद्रकेभ्यश्च
सर्वभूतेभ्यस्तेभ्य[8]स्ताभ्यो नमो नमः स्वाहा ।
एवं दक्षिणसदः पश्चिमसदश्चोत्तरसदः ..... ।
मुखं यः सर्वदेवानां येन हव्यं च नीयते ।
येन प्रवर्तते सर्वं नमस्तस्मै हविर्भुजे ॥ २०

---

5 श्वेताक्षाः श्वेता इति भवितव्यम् उत्तरत्र तयोपक्रमादिति भाति । लेखकप्रमादात् लुप्तं स्यात् ।

---

1 शाङ्कराय ख 2 क, गयोः नास्ति । 3 सहस्राक्षाय ख
4 रुद्रपार्षदेभ्यो क 6 ख पुस्तके नास्ति ।
7 सर्वेषां वै ख 8 क पुस्तके नास्ति ।

अग्नये तेजोधिपतये .... नमो भूतेभ्यः ..... आग्नेय्यां
दिशि .... शक्तिपाणयः .... रक्ता रक्ताक्षा रक्तलोहिता .... ।
येन संह्रियते सर्वम् येन धर्मश्च रक्ष्यते ।
यस्मात् बिभेति लोकोऽयं प्रेतनाथ नमोऽस्तु ते ॥ २१
यमाय प्रेताधिपतये .... नमो भूतेभ्यः .... याम्यां[1] दिशि ....
दण्डपाणयः कृष्णाः कृष्णाक्षाः कृष्णलोहिता .. ये भूता दक्षिणसदः ..
राक्षसा यातुधानाश्च पिशाचाश्चाश्रयन्ति यम् ।
तस्मै निर्ऋतिरूपाय रक्षसां पतये नमः ॥ २२
निर्ऋतये रक्षोधिपतये ... नमो भूतेभ्यः ... नैर्ऋत्यां दिशि ....
खड्गपाणयः श्यामाः श्यामाक्षाः श्यामलोहिता .... ।
येन प्रसूयते[2] सर्वं यस्मिन् सर्वं प्रतिष्ठितम् ।
अमोघपाशहस्ताय तस्मैपां[3] पतये नमः ॥ २३
वरुणाय जलाधिपतये ... नमो भूतेभ्यः .... वारुण्यां दिशि....
पाशपाणयः शबलाः शबलाक्षाः शबललोहिताः ... ये भूताः
पश्चिमसदः .... ।
पूर्यन्ते च ह्रियन्ते च येन प्राणादयः क्रमात् ।
भूतानां पतये नित्यं नमस्तस्मै मरुत्वते ॥ २४
वायवे प्राणाधिपतये ... नमो भूतेभ्यः ... वायव्यां दिशि ....
अङ्कुशपाणयः पीताः पीताक्षाः पीतलोहिताः .... ।
यत्प्रसादाज्जगत्सर्वं धनेन परिपूर्यते ।
यक्षगुह्यकनाथाय धनदाय[4] नमोऽस्तु ते ॥ २५
वैश्रवणाय धनाधिपतये रुद्रपार्षदे नमः .... धनदाय नमः ।
महाबलाय नमः ... सोमाय नक्षत्राधिपतये ... सौम्यायां दिशि ....
गदापाणयः सिताः सिताक्षाः सितलोहिताः .. ये भूता उत्तरसदः .. ।

---

1 याम्यायां ख 2 संरक्ष्यते ख 3 हस्तायापां ख 4 नाथ क ग

येन कालाग्निना लोको युगान्तेष्वपि दह्यते ।
तस्मै ते ब्रह्मणः पुत्र विरूपाक्ष नमोऽस्तु ते ॥ २६

ईशानाय विद्याधिपतये .... नमो भूतेभ्यः .... ऐशान्यां[1] दिशि ....
शूलपाणयः कपिलाः कपिलाक्षाः कपिलालोहिताः .... ।
येन सृष्टं जगत्सर्वं सर्गादौ हरिशासनात् ।
तस्मै देवाधिदेवाय ब्रह्मणेऽनन्तशक्तये ॥ २७

ब्रह्मणे लोकाधिपतये .... नमो भूतेभ्यः .... ऊर्ध्वायां दिशि ....
पद्मपाणयः सूक्ष्माः सूक्ष्माक्षाः सूक्ष्मलोहिताः .... ।
येन भूमिः सहस्रेण फणानां लीलया धृता ।
तस्मै देवाधि[2]देवाय विष्णोः स्थैर्यात्मने नमः ॥ २८

अनन्ताय नागाधिपतये .... नमो भूतेभ्यः .... अधस्ताद्दिशि ....
विषपाणयः धूम्रा धूम्राक्षा धूम्रलोहिताः .... ।
वाहनाय महाशम्भोः शैलार्णव घनस्वन ।
वृषभाय[3] नमस्तेऽस्तु सर्वदुष्टप्रशान्तये ॥ २९

वृषभाय नमः हरवाहनाय नमः महाबलाय नमः[4] सौरभेयाय नमः वीरभद्राय नमः । वीरभद्राय विद्महे महाननाय[5] धीमहि[6] तन्नः शान्तः प्रचोदयात् ॥ ३०

गं गणपतये नमः । एकदंष्ट्राय विद्महे गजाननाय धीमहि ।
तन्नो दन्तिः प्रचोदयात् ॥ ३१

ब्यों ब्रह्माण्यै नमः । ब्रह्मभूतायै विद्महे कुशहस्तायै
धीमहि तन्नो ब्राह्मी प्रचोदयात् ॥ ३२

मं माहेश्वर्यै नमः । रुद्रभूतायै विद्महे शूलहस्तायै धीमहि
तन्नः शिवा[7] प्रचोदयात् ॥ ३३

---

1 ईशान्यां ख 2 देवादि क 3 ऋषभाय क. ख. ग
4 ख पुस्तके अनयोर्व्यत्यासः । 5 बलाय ख
6 सर्वत्र धीमहे इति पाठः क्वचित् । 7 शाङ्करी ख

मां कौमार्यै नमः । स्कन्दभूतायै विद्महे शक्तिहस्तायै
धीमहि तन्नः कौमारी प्रचोदयात् ॥ ३४
ह्रीं वैष्णव्यै नमः । विष्णुभूतायै विद्महे चक्रहस्तायै धीमहि
तन्नो वैष्णवी प्रचोदयात् ॥ ३५
हें वाराह्यै नमः । प्रजापतिभूतायै विद्महे गदाहस्तायै धीमहि
तन्नो वाराही प्रचोदयात् ॥ ३६
हों इन्द्राण्यै नमः । इन्द्रभूतायै विद्महे वज्रहस्तायै धीमहि
तन्न[1] इन्द्राणी प्रचोदयात् ॥ ३७
हुं चामुण्डायै[2] नमः । रुद्रभूतायै विद्महे शूलहस्तायै धीमहि
तन्नश्चामुण्डी प्रचोदयात् ॥ ३८

मातृभ्यो नमः लोकमातृभ्यो नमः सर्वमातृभ्यो नमः सर्वमातृगणेभ्यो नमः[3] । नानारूपा मातरः प्रतिदिशं व्यवस्थिताः दिव्यन्तरिक्षभौमाः पाताळवासिन्यश्चेहायान्तु । शिवाज्ञया मामनुगृह्णन्तु पूजां [4]सौम्य[5]धारिण्यस्ताभ्यो देवीभ्यो नमो नमः स्वाहा । शास्त्रे नमः शम्बरकुमाराय नमः । हस्त्यश्वाय नमः नीलाय नमः काळाय नमः कपर्दि-ने[6] नमः । उग्राय नमः रुद्रसुताय नमः भूतनाथाय नमः भूताधिपतये नमः[7] । भूतनाथाय विद्महे भवपुत्राय धीमहि तन्नः शास्ता प्रचोदयात् । ओं ह्रीं[8] दुर्गायै नमः तत्पार्ष .... । ओं वचद्भुवे नमः कार्तिकेयाय नमः सनत्कुमाराय नमः सनत्कुमाराय विद्महे षडाननाय धीमहि तन्नः स्कन्दः प्रचोदयात् ॥ ४० तत्पार्ष ... ओं धुनि चण्ड हुं फट् नमः[9] चण्डाय नमः चण्ड चण्डाय नमः चण्डेश्वराय नमः । चण्ड चण्डाय विद्महे चण्डेश्वराय धीमहि

---

1 न्नो ख 2 महाकाळ्यै ख 3 क पुस्तके नास्ति । 4 एतदन्तं क पुस्तके नास्ति । 5 नानारूप क 6 क पुस्तके नास्ति । 7 क पुस्तके नास्ति । 8 श्रीं ख 9 क पुस्तके नास्ति ।

तन्नश्चण्डः प्रचोदयात् ॥ ४१ तत्पार्ष्ण – । तीक्ष्णदंष्ट्राय नमः तत्पार्ष्ण – । मृगास्याय नमः तत्पार्ष्ण – । नन्दिने नमः । महाकाळाय । भूतनाथाय । महीधराय । पर्वतेषाय । गुहेशाय । कालपाशाय । कपालिने नमः[1] ।

नन्दी चैव महाकाळो भूतनाथो महीधरः ।
पर्वतेशो गुहेशश्च कालपाशकपालिनौ[2] ४२
एभ्यो दिक्षु बलिं दत्वा ततस्तत्पार्श्वमण्डले ।
विंशद्भूतगणानां तु[3] बलिं दद्याद्यथाविधि ४३
महाकाळो विधाता च वज्रपाणिः कृतप्रभः[4] ।
दक्षः शतक्रतुमूर्तिरप्रमेयोऽथ[5] वीर्यवान् ४४
नित्यो विद्युत् प्रभः[6] शूली शूलहस्तस्त्रिणेत्रवान्[7] ।
स्वाङ्गदीपस्तमो घातः सृष्टिकृद्धीर्यविक्रमः ४५
मान्धाता सृष्टिकृद्धीर्यो नित्ययोगः प्रसन्नवान् ।
एते विंशतिकोटीनां प्राक् स्थितानां नमो नमः ४६
अग्निरग्निसमानश्च ज्वाली विश्वभुगव्ययः ।
हुताशी मूर्तिमान् व्यापी कपिलो रक्तलोचनः ४७
उग्रो रक्तवपु[8]र्धूम्रः सप्तार्चिर्विश्वभेषजी ।
हुतभुक् सत्यवान् वेगी भस्मच्छन्नो मरुत्सखः ४८
योऽप्रियः सदाकांक्षी दारुजः स्यन्दनो जटी[9] ।
एते च कोटिगुणिता अग्निरूपा नमो नमः ४९
यमो वैवस्वतो धाता शत्रुघातः प्रजान्तकः ।
मृत्युः प्रेताधिपो धर्मो कृष्णः कृष्णाक्ष एव च ५०

---

1 क पुस्तके अष्ट नामानि न पठितानि । 2 अयं श्लोकः ख पुस्तके नास्ति । 3 च क 4 क्रतुः पुनः ख 5 यश्च क 6 विष्णुः प्रभुः ख विद्युत्प्रनेत्रवान् ग 7 त्रिशूलवान् ख 8 वधू क ग 9 इतः परं ख पुस्तके सार्धं श्लोकद्वयं लुप्तम् ।

नित्ययोगी सुहृत् क्षामी[1] आत्र ? धर्मी सदान्तकः ।
मायारूपी प्रजाकांक्षी सत्त्वासत्त्वप्रियः सुहृत् ५१
इत्येते कोटिगुणिता यमरूपा नमो[2] नमः ।
रक्षोऽसुरपिशाचाश्च निर्ऋतिर्वीर एव च ५२
तीक्ष्णचक्षुः पृथी[3] देही यज्ञहन्ता निशाचरः[4] ।
अतिमूर्तिरनेकाङ्गी क्रूरः क्रूरवपुर्महान् ५३
सूक्ष्मच्छिद्रो विरूपाक्षो भस्माङ्गी धूम्रलोचनः ।
इत्येते कोटिगुणिता निर्ऋतिरूपा नमो नमः ५४
वरुणः शबलो भृङ्गी निम्नाशा[5]धिपतिः क्षमः ।
श्रीमानप्रधनः[6] कान्तः आनन्दस्तत्वदर्शनः ५५
पाशहस्तः पशुर्वेगी आनन्दः श्यामलोचनः ।
कपर्दी प्राणदः श्यामः सत्यबुद्धिः सनातनः ५६
इत्येते कोटिगुणिता वरुणरूपा नमो नमः ।
वायुर्गन्धवहः सूक्ष्मस्तत्वात्मानन्द एव च ५७
प्राणोऽपानः समानश्च ज्ञानाक्षो ज्ञानिनोपमः[7] ।
कपाली शूलपाणिश्च व्यानोदानौ[8] सदा कविः[9] ५८
अमाली माल्य[10]वान् बिन्दुर्मलशाकी[11] विभावरी ।
इत्येते कोटिगुणिता वायुरूपा नमो नमः ५९
रक्षोध [यक्षोऽथ] रथिवान् ?[12] सोमः सूक्ष्मकालो निशाश्रयः ।
आलम्बो भैरवो भिक्षुर्विकारो[13] वाम एव च ६०
ज्येष्ठो मालाधरश्चण्डो मनश्चोन्मन एव च ।
रौद्रो बलधरः[14] कालः सर्वत्र बलवानपि ६१
इत्येते कोटिगुणिता यक्षरूपा नमो नमः ।

---

1 क्षेमी क 2 रूपाय ते ख 3 मृडी ख 4 भर्ता विनायकः ख
5 निम्नगा ख 6 न भूधमः ? ग 7 वरः ख 8 दानः क
9 कवी क ग 10 माल क माला ग 11 शाकली ख
12 यक्षोर्थं रथिवान् ख 13 विकिरो ख 14 बल्लिधरः ख

ईशान ईश्वरश्शम्भुः शूलहस्तस्त्रिणेत्रवान्[1] ६२
अनादिनिधनो रोगी[2] कपिलः कपिलाक्षधृक् ।
रुद्रो गणाधिपो योगी विश्वहस्तो[3] दिगम्बरः[4] ६३
धूम्राक्षो धूम्ररूपश्च नीलो विश्वभुजो हरः ।
इत्येते कोटिगुणिता रुद्ररूपा नमो नमः ६४
महाबलो महानादो मूर्ति मूर्तिपतिः शिवः ।
पवित्रो रञ्जनः स्थाणुरघोरो घोर एव च ६५
अरुणो[5] लाङ्गलोमन्युरङ्गारः शिखिभूषणः ।
जीमूतो मूर्तिकृत् वक्त्री[6] मन्त्रीशस्त्रिपुरान्तकः ६६
गणाधिपाः शिवस्यैते ऊर्ध्वरूपा नमो नमः ।
वुधः प्रमर्दनः शुद्धः कालरूपोग्रदंष्ट्रवान् ६७
दीर्घबाहुः प्रकारश्च[7] हर्ताऽहर्ता[8] विचक्षणः ।
कालाग्निरौरवो घोरो नरकः शर्व एव च ६८
नागश्चैवाथ घोरश्च किवुरुर्दारजः[9] [किंबुरुर्नारदः] क्षमी । ?
इत्येते कोटिगुणिता पाताळास्ते नमो नमः ६९
बलिपीठे बलिं दद्यात् भूतिदाद्यैर्द्विठान्तकैः ।
भूतिदो दुर्निरीक्षश्च भीमरूपः सुलोचनः ७०
सुमुखश्च महाबाहुस्त्रिभुजस्त्रिशिराः[10] क्रमात् ।
पिङ्गलो हरसेनश्च क्रमाद्दिक्ष्वध ऊर्ध्वतः ७१
महाबलाय नमः[11] हरसेनाय नमः[12] ।
हरसेनाय विद्महे महाबलाय धीमहि तन्नः शक्तिः प्रचोदयात् ॥
दशमूर्तिपार्षदेभ्यः सद्व्योऽसद्व्यः सदसद्व्यः सर्वगणेभ्यो नमो नमः

---

1 प्रतापवान् ख 2 रोगः ख 3 गस्तो ग 4 दिगीश्वरः ख
5 वरुणो ख 6 पाशी ख 7 प्रकाशश्च ख 8 भर्ताभर्तृ ख
9 किं बुरुर्दारजः ख पुस्तके नास्ति । 10 अनयोर्व्यत्यासः ख पुस्तके ।
11–12 ख पुस्तके नास्ति ।

असंख्यकोटिगणाश्च[1] भवन्तु सहिताः सर्वे तेभ्यस्ताभ्यो नमो नमः।
इत्येते पीठिकायां तु बलिं दत्वा बहिः क्रमात्।
एभिर्मन्त्रैर्बलिं दद्यात् ग्रहाणामपि तद्बहिः ७३
ये समस्तं जगद्व्याप्य तिष्ठन्ति बलिकांक्षिणः।
रुद्रपारिषदाः सर्वे गृह्णन्तु बलिमुत्तमम् ७४
ओं नमो भूतेभ्यो भूतकृद्भ्य सर्वेभ्योऽरिष्टकृद्भ्यः सद्भ्योऽसद्भ्यः
सदसद्भ्यस्तेभ्यः सर्वगणेभ्यस्ताभ्यो नमो नमः।
गृह्णन्तु बलिमेतत्तु बाह्यस्था विहगाननाः।
ये क्रूरा येऽल्पसत्वाश्च भूतप्रेतनिशाचराः ७५
वेताळाश्चैव मातङ्गा हीनाऽहीनाश्च ये गणाः।
तेषां सर्वेषां बलिं हरामि तेभ्यस्ताभ्यो नमो नमः ७६
देवाश्चाप्यसुराश्चापि गन्धर्वा यक्षसंज्ञकाः।
पितरश्चापि नागाश्च राक्षसाश्च पिशाचकाः॥ ७७
तेषां दिक्षु बलिं दत्वा क्षेत्रपालाय चोत्तरे।
समाप्यैवं बलिं तत्र नृत्तगीतादि कारयेत् ७८
अन्यथाऽपि बलिं केचिदाहुरागमकोविदाः।
मालामन्त्रैर्बलिः[2] पूर्वं नन्द्यादीनामनन्तरम्॥ ७९
गणानां च ग्रहाणां च भूतिदाद्यैः समापयेत्[3]।
दिवापि च[4] बलिं दद्याच्छेषेषु दिवसेषु च॥ ८०
पूर्वेद्युस्तीर्थयात्रायाः[5] निशि दद्यान्महाबलिम्।
प्रविश्य देवमाचार्यः प्रार्थयेत्तदनन्तरम्[6]॥ ८१
तीर्थयात्रा त्वया देव श्वः कर्तव्या सुरेश्वर।
तत्र प्रतिसरारम्भं त्वमनुज्ञातुमर्हसि॥ ८२

---

4 दिवापि चेत्युक्तेः प्रथमदिने रात्रावेव।

---

1 क, गयोः नास्ति। 2 बलिं क 3 क्षमापयेत् क
5 यात्रायां ख 6 त्वरमेश्वरम् ख

इति प्रार्थ्य ततः शय्यामास्तीर्य समलङ्कृते[1] ।
मण्डपेऽङ्कुरपात्राद्यैर्दीपैश्चैवाष्टमङ्गलैः ॥ ८३
अभ्यर्च्य तां प्रविश्यान्तर्धृतारोपणपूर्वकम् ।
पुण्याहं मूर्ति-पैस्सार्धं कुर्यात् कौतुकबन्धनम् ॥ ८४
ऊर्णासूत्रेण निक्षिप्य क्षौमे हेमं समौक्तिकम् ।
बहुरूपेण[2] देवस्य पाणिभ्यां दक्षिणे करे ॥ ८५
कौतुके देवमावाह्य शय्यायां तु निवेशयेत् ।
सम्पूज्य मण्डपे देवं संस्थाप्य बलिमङ्गलैः ॥ ८६
वाद्यैः समस्तैः संयुक्तो निःस्वपन् तां निशां नयेत् ।
प्रातः स्नात्वा ततः सन्ध्यामुपास्य विधिवद्गुरुः ॥ ८७
तत्कालयोग्यमखिलं कृत्वा सम्पूजयेद्गुरुः ।
प्रवेश्य कौतुकं गेहे देवे देवं नियोज्य च[3] ॥ ८८
उलूखले नवे शुद्धे पिष्टचूर्णानि कारयेत् ।
हरिद्रामुद्गसम्मिश्रैर्माषशालीयवादिभिः ॥ ८९
हेमादिलोहचूर्णैश्च युक्तं पात्रे विनिक्षिपेत् ।
मूलेन[4] पूजयित्वा तु[5] देवं संस्नाप्य वारिभिः ॥ ९०
अभ्यज्य माक्षिकाज्याभ्यां तच्चूर्णेनाभिषेचयेत् ।
सम्मृज्य सर्वतस्तेन भक्तानां मूर्ध्नि दापयेत्[6] ॥ ९१
संस्नाप्याभ्यर्च्य विधिवद्धोमं कुर्याद्यथाविधि ।
कृत्वा चाग्निमुखं पक्वं गायत्र्याज्याहुतिं[7] पुनः ॥ ९२
शाकुनस्वस्तिसूक्ताभ्यां समिदाज्यचरून् घृतम् ।
अष्टोत्तरशतं पुंसा हृदा पूर्णाहुतिं ददेत् ॥ ९३
पुण्याहं वाचयित्वाऽथ संहृत्योत्पाद्य कौतुकम् ।
आवाह्य न्यस्य सम्पूज्य वस्त्राभ्यां परिवेष्ट्य च ॥ ९४

2 अघोरेण । 3 च कारात् सम्पूज्येत्यर्थः । 4 मूलेनेत्यादि तच्चूर्णैरभिषेचयेदित्यन्तं पुण्याहं वाचयित्वेत्यनन्तरं योजनीयम् ।

1 सकृत्कृतः ख 5 तं क 6 निक्षिपेत् ख 7 आज्याहुतीः ख

सम्पाताज्येन संस्पृश्य तामादाय बहिर्व्रजेत् ।
द्वारि मङ्गलवाद्यं [दं] च कृत्वा निर्गत्य देशिकः ॥ ९५
बलिं दत्वा बहिर्गत्वा गोपुरादखिलैर्वृतः ।
वाद्यैर्नानाविधैर्वि-प्रैर्दासदासीभिरेव च ॥ ९६
जलगन्धादिभिर्युक्तो यानमासाद्य तत्पुनः ।
वृषभं वाहनं ध्यात्वा तमारोप्य महेश्वरम् ॥ ९७
व्रजेत्तु योजनादर्वाक् नदीं वान्यं जलाशयम् ।
तत्पार्श्वे स्थण्डिलं गुप्तं कृत्वा तस्मिन् शिवं न्यसेत् ॥ ९८
पाद्यार्घैः पूजयित्वा तु तीर्थमावाह्य मज्जयेत् ।
स्थण्डिले तं निवेश्याथ समभ्यर्च्य निवेदयेत् ॥ ९९
भक्ष्यादिभिः समोपेतं श्रुतं तत्र महद्धविः ।
अष्टोत्तरशतं सर्पिर्-व्रह्मभिश्चात्र होमयेत् ॥ १००
पुण्याहमभिकल्प्यात्र चूर्णैरुन्मृज्य सादरम् ।
स्नाप्य भक्तजनैः[1] सार्धं समभ्यर्च्य यथाविधि ॥ १०१
आदाय यानमारोप्य गच्छेद्-द्रुततरं गृहम् ।
यात्राह्येव गृहं प्राप्य[2] देवे देवं[3] नियोजयेत् ॥ १०२
पूजयित्वा यथान्यायं रात्रौ भूतबलिं हरेत् ।
श्वो भूते स्नपनं कुर्यादुत्तमादि यथाविधि ॥ १०३
आचार्यमूर्तिपालेभ्यो दद्यादत्रैव दक्षिणाम् ।
अन्यानथ[4] यथाशक्ति पूजयेद्भक्तिसंयुतः ॥ १०४
इति संक्षेपतः प्रोक्तं शिवस्य स्थापनं परम् ।
एतन्निरीक्ष्य संशोध्य देशिकैस्तत्ववेदिभिः[5] ॥ १०५
रक्षितव्यं प्रयत्नेन दस्युभ्यस्तत्र गौरवात् ॥ १०६

इति क्रियासारे शैवे दशमः पटलः ॥ शिवार्पणमस्तु ॥

---

2 सायं पूजाया अलोपार्थं ।

---

1 संस्नाप्य तज्जलैः ग 3 देवदेवं ख 4 अन्यान् सर्वान् क 5 स्तु यथाविधि

वैष्णवभागः

प्रथमः पटलः

नमस्कृत्य हरिं वक्ष्ये संक्षेपेण क्रियाक्रमम् ।
देवैर्मुनिभिराचार्यैरागमेषु स्फुटोदितम् ॥ १
तथाऽपि साधकेन्द्राणां स्मरणाय क्रियाविधौ ।
वक्ष्येऽहं गुरुपूजादि तीर्थस्नानावसानिकम् ॥ २
आचार्यं वरयेदग्रे दीक्षितं लक्षणान्वितम् ।
भक्तं विनीतं शास्त्रज्ञं क्रियादक्षं समूर्तिपम् ॥ ३
शोधिते भवने वस्त्रकुशाद्येष्वासनेषु तम् ।
उपवेश्य यथान्यायं मूर्तिपांश्च समर्चयेत् ॥ ४
यजमानः समाचम्य शार्वे दर्भेषु सादयेत् ।
पात्राणि कूर्चयुक्तानि भूषणानीतराणि च ॥ ५
प्रणवेन यथान्यायमुत्तानीकृत्य वारिभिः ।
संस्कृतैः प्रोक्षयेद्भूयः कूर्चं विन्यस्य योजयेत् ॥ ६
अर्घ्यं पाद्यं तथाचामं न्यस्य गन्धाक्षतादिकम् ।
मूलेन[1] मूर्ति-भि[2]र्वाङ्गैरभिमन्त्र्याथ तं यजेत् ॥ ७
पाद्येनाचमनेनापि चार्घ्येणाङ्गै[3]स्त्रिभिः क्रमात् ।
मूलेन वाम्बरं भूषां[4] शेषाभ्यां वाऽथ मूलतः ॥ ८
गन्धाद्यैरभिपूज्याथ मूर्तिपांश्च यथाक्रमम् ।
पाद्याद्यैरङ्गमन्त्रैर्वा मूर्ति-भिर्वाऽर्चयेत् क्रमात् ॥ ९
पायसं भोजयेत् साज्यं भुक्त्वाऽऽचान्तेषु दक्षिणाम् ।
दत्वा प्रणम्य वरयेन्मन्त्रमेतदुदीरयेत् ॥ १०

---

1 षडक्षराष्टाक्षरद्वादशाक्षराणामन्यतमेन । 2 वासुदेवादिभिः केशवादिभिर्विष्ण्वादिभिर्वा । 3 हृदयशिरः शिखारूपैः । 4 अङ्गाभ्यां

मया सम्पूजितैरत्र दक्षिणाभिश्च तोषितैः ।
क्रियतां विष्णुयागो मे प्रार्थयामि प्रसीदतु ॥ ११
आलम्ब्य[1] दक्षिणे पाणावों तथेति गुरुर्वदेत् ।
तैः कर्म कारयेद्भक्त्या देववत्तान् समर्चयेत् ॥ १२
सोऽपि मूर्तिधरै[2]स्सार्धं परीक्ष्योर्वीं यथोचिताम् ।
ज्ञात्वा[3] मृद्भिर्जलैः पुष्पैर्दी-पैर्वा शास्त्रचोदितैः ॥ १३
तरुभिर्गिरिभिर्वाथ तथा निम्नोन्नतादिभिः ।
महीं प्राकारपर्यन्तां[4] सङ्कल्प्यात्र बलिं हरेत् ॥ १४
भूतक्रूरं यथान्यायं गन्धाद्यैरभिपूज्य च ।
मध्ये दिशासु परितो मन्त्रेणानेन देशिकः ॥ १५
देवताभ्यः पितृभ्योऽथ भूतेभ्यः सह जङ्गमैः ।
एतत्स्थाननिवासिभ्यः प्रयच्छामि बलिं नमः ॥ १६
दत्वा बलिं ततोऽभ्यर्च्य प्रार्थयेन्मनुनाऽमुना ।
मध्ये स्थित्वा विधायात्मरक्षां बद्धाञ्जलिर्गुरुः ॥ १७
भूतानि राक्षसा वाऽपि[5] येऽत्र तिष्ठन्ति केचन ।
ते सर्वे[6] व्यपगच्छन्तु स्थानं कुर्यामहं हरेः ॥ १८
चक्रार्चितांस्ततः शङ्कून् स्थापये[7]त्तेन दिक्ष्वथ ।
सूत्रं तेन प्रसार्याथ कुर्यादभूमिपरिग्रहम् ॥ १९
कृत्वैवं बहुषः कृष्टां[8] कर्षयेन्मन्त्रतः स्वयम् ।
द्विषट्[9]केनाथ[10] बीजानि[11] चाष्टार्णेनाथ[12] वापयेत् ॥ २०
सिञ्चेदद्भिर्जितन्तेन नववस्त्राद्यलङ्कृतः[13] ।

---

3 परीक्षाक्रममेवाह मृद्भिरित्यादि आश्लोकसमाप्ति ।
7 चक्रेण । 9 द्वादशाक्षरेण कर्षणम् ।

---

1 आलम्य ख 2 धरः ख 4 पर्यन्तं क 5 चात्र क
6 ह्यप क 8 स्तुष्टां क ग 10 षट्केणात्र क ग 11 बीजेन ख
12 पञ्चार्णेनात्र क ग 13 ङ्कृतम् ख

दत्वाऽथ फलिते गोभ्यः मुमुहूर्ते खनेत् क्षितिम् ॥ २१
जलान्तमथ वाऽश्मान्तं गर्तं सङ्कल्प्य वेदिकाम्[1] ।
कृत्वा वास्तुबलिं तत्र निधिं कूर्मशिलां न्यसेत्[2] ॥ २२
रत्नहेमादि विन्यस्य मध्ये मूलेन शक्तितः ।
सङ्कल्प्यात्माक्षराम्भोजं तस्मिन्नाधारसंज्ञिकाम् ॥ २३
शक्तिं विन्यस्य सम्पूज्य प्रार्थयेन्मनुनाऽमुना ॥ २४
त्वमेव परमा शक्तिस्त्वमेवासनधारिका ।
सन्नृप्तया त्वया देवि स्थातव्यमिह सर्वदा ॥ २५
त्वयि सम्पूजयामीशं नारायणमनामयम् ।
रहिता योनिदोषैस्त्वम् विधियुक्ता सदा भव[3] ॥ २६
गन्धाद्यैः पूजयित्वा तां भक्त्या नत्वा कृताञ्जलिः ।
इति प्रार्थ्य तदूर्ध्वे तु कल्पयेल्लिपिपङ्कजम् ॥ २७
क्षादि[4]मूर्ति-शिफानाळसरः कण्टकरन्ध्रकम्[5] ।
धर्मादि[6]न्तस्थयुग्रन्थिसाधर्मादि[7] नपुंसकम्[8] ॥ २८
काद्यैस्त्रिभिस्त्रिभिः पत्रैः[9] कर्णिकान्तैः समन्वितम् ।
विसर्गबिन्दुदीप्ताग्रपूर्वादि स्वरकेसरम्[10] ॥ २९
तारांश[11]त्रितयोपेतमात्मविद्यापरक्रमात् ।
नादशक्तियुतं मध्ये तस्मिन् कूर्मशिलां न्यसेत् ॥ ३०
क्षाळितां गन्धपुष्पाद्यैः समभ्यर्च्याधिवासिताम् ।
अकूपारेति तां[12] तत्र न्यस्त्वाऽर्च्य प्रार्थयेदथ ॥ ३१

---

4 क्षं नमः परायमूर्त्यात्मने नम इत्यादि वं नमः पराय धर्मायाग्नेय-ग्रन्थ्यात्मने नमः । 8 ऋं ॠं ऌं ॡं एतानि नपुंसकाक्षराणि ।
9 कं खं गं नमः पराय पूर्वपत्रात्मने नमः ।
10 अः अं नमः पराय पूर्वकेसरात्मने नमः इत्यादि

---

1 मध्ये कूर्मशिलां न्यसेत् क ग 2 एतदन्तः पादानश्लोकः क, गयोर्नास्ति
3 अयं श्लोकः ख पुस्तके नास्ति । 5 सकेसरसरन्ध्रकम् क
6 द्य ख 7 साधर्म्यादि ख 11 ताराङ्ग ख 12 तं ख

नमस्ते कूर्मरूपाय विष्णवे विश्वरूपिणे[1] ।
करिष्यमाणं प्रासादमिह त्वं धर्तुमर्हसि ॥ ३२
इति प्रार्थ्य गणेशानं पूजयेत्तत्र दक्षिणे ।
पूजयेदशमभिर्मृद्भिर्गर्तं तत्सुदृढं[2] यथा ॥ ३३
द्वारदेशे च देवेशमभ्यर्च्या[3]ग्निं च तर्पयेत्[4] [5] ।
अथैशान्यां यजेद्वास्तुं कुशपुष्पाक्षतौदनैः[6] ॥ ३४
व स्तुदेहस्थितास्तत्र त्रिपञ्चाशत्तु देवताः[7] ।
पूजयेत्क्रमशस्तासां विभागः प्रोच्यतेऽधुना ॥ ३५
मध्ये तु नवकं दिक्षु षट्कं कोणे द्विकद्वयम् ।
ईशादीनां बहिः पङ्क्तावेकैकं तु पदं भवेत्[8] ॥ ३६
पूज्यो नवपदे ब्रह्मा पुनरार्यकसंज्ञकः ।
सावित्रो सविता चैव विवस्वान् षट्पदे बहिः ॥ ३७
इन्द्रश्चेन्द्रजयो[9] मित्रो रुद्रो रुद्रजयस्तथा[10] ।
पश्चान्महीधरस्त्वीशे आपश्चैवापवत्सकः ॥ ३८
ततस्त्वीशानपर्जन्यजयन्तेन्द्रदिवाकराः ।
सत्यो भृशान्तरिक्षौ च देवताः प्रागुदीरिताः[11] ॥ ३९
अग्निः पूषा च वितथो ग्रहक्षतयमौ तथा ।
गन्धर्वभृङ्गराजौ च मृगो दक्षिणतः स्थिताः[12] ॥ ४०
पितृदौवारिक[ा]श्चैव[13] सुग्रीवः पुष्पदन्तकः ।
वरुणोऽसुरशोषौ च पापयक्ष्मा[14] च पश्चिमे ॥ ४१

---

5 पूजाहोमः उक्तः । 9-10 अत्र क्रमो विचारणीयः । 14 पाप-यक्ष्मशब्देन रोगः, रोगशब्देन वायुः, रुजो भञ्जने इति धातोर्निष्पन्नः । नागस्थाने वायुपदपाठमङ्गीकृत्य वाय्वाहारो नागः इति व्याख्यातम् ।

---

1 मूर्तये क ग 2 समजलं ख 3 माराध्या ग 4 कल्पयेत् ख
6 अर्वं क, गयोर्नास्ति । 7 एकाशीति पदस्थां तु त्रिपञ्चाशत-देवताम् ख 8 प्रभेदतः ख 11 पूर्वस्यां दिशि संस्थिताः ख
12 दक्षदिगाश्रिताः क ग 13 पितरो दौवारिकश्च ख

रोगो नागस्तथा मुख्योभल्लाटेन्दुस्तथार्गलः ।
अदितिश्च दितिश्चैव कौबेर्यां दिशि संस्थिताः ॥ ४२
शर्वः स्कन्दोऽर्यमाह्वश्च जम्भकः पिलिपिञ्छकः ।
चरकी च विदारी च पूतना पापराक्षसी ॥ ४३
दिग्विदिक्षु बहिस्तेषां बलिं दद्याद्विचक्षणः ।
अथ देवग्रहादीनां बलिं दद्याद्यथाक्रमम्[1] ॥ ४४
देवाश्चाप्यसुराश्चैव गन्धर्वा यक्षसंज्ञकाः ।
पितरश्चैव नागाश्च राक्षसाश्च पिशाचकाः ॥ ४५
आसीत्सुराऽसुरोतीव[2] भीषणो वास्तुसंज्ञकः ।
भूमौ निप[ा]तितो देवैस्तस्याङ्गेषु निवेशितः[3] ॥ ४६
तैरेताः पूजयेत्स्वैः स्वैर्नामभिश्चोपहारकैः ।
बलिमासां क्रमाद्दत्वा भक्त्या नत्वा क्षमापयेत् ॥ ४७
मध्यादि वास्तुपूजाचेत्सवित्राद्यास्तु कोणगाः ।
ईशानादि यथा पूज्याः सावित्राद्यस्तु ते तदा[4] ॥ ४८
एवं कृत्वा वास्तुयागं ततः स्वप्नादि कर्मणा ।
सुनिमित्तं च विज्ञाय[5] कर्तव्या प्रथमेष्टका ॥ ४९
द्वारस्य दक्षिणे पार्श्वे विन्यसेद्विधिपूर्वकम् ।
तत्रोत्तरेऽग्निं निक्षिप्य कृत्वा चाग्निमुखं क्रमात्[6] ॥ ५०
पक्वं च विष्णुगायत्र्या हुत्वाऽथाऽऽज्याहुतीर्हुनेत् ।
व्यस्तैरष्टाक्षरैरष्टौ व्याहृतीन्द्रादिभिः[7] क्रमात् ॥ ५१
अग्नये चैव सोमाय ग्रहेभ्योऽपि यथाक्रमम् ।
नक्षत्रेभ्यश्च भूतेभ्यो नागेभ्य इति चैव हि ॥ ५२
सर्वाभ्यो[8]देवताभ्योऽथ विश्वेभ्यश्चैव[9] देशिकः ।

---

7 दिक्पालैः । 9 देवेभ्यो इत्यनेनान्वेति ।

---

1 क, गयोरर्धं नास्ति । 2 सुरारातिः ख 3 निवेशिताः ग 4 क, गयोरयं श्लोको नास्ति । 5 विज्ञेयः क ग 6 पुनः ख 8 सर्वेभ्यः क ग

देवेभ्यो विष्णवे हुत्वा व्याहृतीर्जुहुयात्ततः ।। ५३
समिदाज्यचरूनाज्यं गायत्र्याऽष्टोत्तरं शतम् ।
ततः स्विष्टकृतं हुत्वा होमशेषं समाप्य च ।। ५४
प्रणवेन लिखेद[1]ष्टौ रेखाः पिप्पलशङ्कुना ।
पूर्वाग्रा उदगग्राश्च लिखित्वा पूर्वतो मुखः ।। ५५
स्थित्वा[2] कृताञ्जलिः पश्चाज्जपेदष्टाक्षरं[3] बुधः ।
जप्त्वाऽष्टकृत्वः प्रणतः स्मरन्नारायणं प्रभुम् ।। ५६
उद्वास्य पावकं तासु सम्पाताज्यं समर्प्य[4] च ।
प्रभुं तं प्रणतो ध्यात्वा कोष्ठेष्वष्टभिरक्षरैः ।। ५७
अग्न्यादीन्द्रान्तमष्टौ तु[5] विन्यसेत्प्राङ्मुखः स्थितः[6] ।
उपानड्वत् प्रयुञ्जीत वर्जयेन्निम्नमुन्नतम्[7] ।। ५८
इष्टकास्तु विधायैवं श्वभ्रं सम्पूर्य वारिभिः ।
सम्पातरत्नगन्धा[8]द्यैर्वैमलैस्तु सुगन्धिभिः ।। ५९
कलशैः पूरितैः पूर्वमर्चि-तैर्मन्त्रसंस्कृतैः ।
शुभपुष्पाक्षतान् न्यस्य तारेणावर्तमीक्षयेत् ।। ६०
शुभाशुभाविहावर्तौ ज्ञातव्यौ दक्षिणोत्तरौ[9] ।
शाल्यादि[10]क्षेत्रमृत्साभि[11]रर्चि-तैर्मन्त्रसंस्कृतैः ।। ६१
एतान्निक्षिप्य च गुरुर्गर्तं प्रच्छादयेत्ततः ।
विसृज्य शिल्पिनोऽत्रापि कल्पयेत्स्वप्नदर्शनम् ।। ६२
शुभे लाभः [भोऽशुभे] शुभैर्मोक्षः शांतिं कुर्याच्च दर्शने[12] ।
अनेनैव विधानेन कुर्याद्वै प्रथमेष्टकाः[13] ।। ६३

---

1 इदं सम्पाताज्यं समर्प्य च इत्येतदनन्तरं योज्यम् ।
9 अशुभे सुदर्शनेनाष्टोत्तरं शतं जुहुयात् । 10 पूर्वं शाल्यादि निक्षिप्य मृत्साभिर्गर्तं पूरयेदित्यर्थः । 12 अशुभदर्शने अस्त्रशान्तिः ।

---

2 कृत्वा ख 3 दष्टोत्तरं ख. 4 समाप्य क ग 5 ईशान-पर्यन्तं क ग 6 गुरुः क ग 7 ताम् क ग 8 गर्भा ख
11 एतौ द्वितीय तृतीयपादौ ख पुस्तके न स्तः । 13 काम् ख

गर्भाधानं ततः कुर्यान्नागर्भे धाम्नि सम्पदः ।
प्रासादस्यानुरूपेण गर्भपात्रं प्रकल्पयेत् ॥ ६४
सान्द्रं[1] ताम्रमयं श्लक्ष्णं पादहीनोत्तरच्छदम् ।
चतुरश्रं तदर्धोच्चं शोधयेत्तद्यथाविधि ॥ ६५
सुगुप्तं तद्यथाभित्तौ भित्तिमानेन वा भवेत् ।
पादको[2]परि विन्यस्य भुवि राज्ञोऽन्ययोरधः[3] ॥ ६६
द्वारस्य दक्षिणे भागे तृतीयांशे द्विशेषिते ।
गोमूत्रेणाप्लुते न्यस्येत् द्वारमूलस्य पार्श्वतः ॥ ६७
क्षालिते पञ्चगव्येन पात्रेऽस्मिन् परिशोधिते ।
धारणाभिर्यथान्यायं ध्यात्वा पीठेऽक्षराम्बुजम् ॥ ६८
भूमण्डलमनन्तस्थं सशैलाम्भोधिदिग्गजम् ।
प्रादक्षिण्येन कृत्वान्तः पूर्वं सागरमुद्वृतिम् ॥ ६९
दिग्विदिक्षु च मध्ये च गायत्र्या[4] विन्यसेन्मृदः ।
गिरितीर्थनदीभ्यश्च ह्रदात्कर्कटकालयात् ॥ ७०
वल्मीकखलदन्त्यृक्षशृङ्गेभ्यश्चाहृताः क्रमात् ।
पङ्कजोत्पलयोर्मूले[5] कुमुदस्य च देशिकः ॥ ७१
दिक्षु लोहितकस्यापि चत्वार्येवं क्रमात् न्यसेत् ।
मनःशिलां हरीतालमञ्जनं श्यामसीसकम् ॥ ७२
वज्रमौक्तिकवैडूर्यशङ्खस्फटिकपुष्यकान् ।[6]
चन्द्रकान्तं महानीलं पद्मरागं तथा पुनः ॥ ७३
शालिनीवारकौ चैव कङ्कुमाषकुलत्थकान् ।
निष्पावतिलमुद्गांश्च पाक[7]पूर्णान् ससर्षपान् ॥ ७४

---

4 गायत्र्या मृत्मूलधातुरत्नबीजलोहवाहान् न्यसेत् । 7 पक्वानित्यर्थः

---

1 पात्रं ख 2 पादुकां क 3 रथ क ग
5 मूलं क ग 6 अर्धद्वयं ख पुस्तके नास्ति ।

सौराष्ट्रीं रोचनां चैव गैरिकं पारकं[1] न्यसेत् ।
दिक्षु काञ्चनरौप्यायस्त्रपूण्यथ हिरण्मयम्[2] ॥ ७५
सुपर्णं कूर्मरूपं च शङ्खं चक्रं च कोणतः ।
धनुर्गदाम्बुजं मध्ये प्रत्येकं च हिरण्मयम् ॥ ७६
एतत्सर्वं समानीय न्यस्तव्यं गर्भभाजने ।
कृत्वैवं पञ्चगव्येन प्रोक्ष्य द्वादशविद्यया[3] ॥ ७७
अग्निं[4] दक्षिणतः कृत्वा जुहुयात्पूर्ववत्[5] क्रमात् ।
घृतं द्वादशभिर्वर्णैर्दिक्पै[6]र्नारायणेन तु ॥ ७८
तारादिना हुतान्तेन वक्ष्यमाणैश्च नामभिः ।
बीजानि सर्वधातूनि सर्वलोकाश्च पर्वताः ॥ ७९
समुद्राः सर्वतीर्थानि नद्यश्चाथ ह्रदास्तथा ।
पाताळाश्चैव नागाश्च दिग्गजा वृषभा अपि ॥ ८०
व्याहृत्यन्तं ततो[7] हुत्वा सम्पातविधिनैव तु[8] ।
आज्यं[9] समर्प्य तत्पात्रं पिधाया[10]ग्रकरस्थितम् ॥ ८१
जप्त्वा मन्त्रं भुवं ध्यात्वा प्राङ्मुखो निशि देशिकः ।
न्यसेद्गर्भं यथान्यायं हरिं ध्यात्वा स्वकां तनुम्[11] ॥ ८२
निमित्तैः शोभनैः सार्धं भक्त्या च परया युतः[12] ।
सुमुहूर्ते द्विजानुज्ञां प्राप्य तूर्यादि निस्वनैः ॥ ८३
शक्तिं ध्यात्वाऽर्चयित्वाऽस्याः गर्भभूतमिदं स्मरेत्[13] ।
ब्रह्माण्डं पार्थिवं शुभ्रं गृहमूर्तिप्रसूतये ॥ ८४

---

1 पारदमित्यर्थः । 2 अस्योत्तरेणान्वयः । 3 द्वादशाक्षरेण । 6 एकेन पदेन व्याख्यात्रा तु इन्द्रादिभिरित्युक्तम् । 9 समिदादिभिः । सम्पातम् ।

---

4 अग्नेः क ग 5 पूर्वतः ख 7 पूर्णां द्रव्यान्तरे ग 8 मूलेन समिदादिकं ग 10 विधाया क 11–12 अर्धं यं क, गयोर्नास्ति । 13 स्मरन् ख

ध्यात्वाऽस्मिन् पूर्ववच्चोर्वीं शनैर्मन्त्रमुदीरयेत् ॥ ८५
सर्वभूतधरे कान्ते पर्वतस्तनमण्डिते ।
समुद्रपरिधाने त्वं देवि गर्भं समाश्रय ॥ ८६
एवं न्यस्ते सु[1]गर्भेऽस्मिन् सर्वत्र च सुखं भवेत् ।
हिरण्यं दक्षिणां दत्वा प्रासादं कारयेत्ततः ॥ ८७

इति क्रियासारे (एकादशः) वैष्णवे प्रथमः पटलः

द्वितीयः पटलः

अथ वक्ष्यामि संक्षेपान्मङ्गलाङ्कुररोपणम् ।
प्रासादे तु[2] कृते सम्यङ्मुहूर्ते कल्पिते[3] सुधीः ॥ १
उत्तरे त्वयने काले शुक्लपक्षे सुनिर्मले ।
स्थापनं विहितं विष्णोः शुभवारे तिथौ दिने ॥ २
पुनर्वस्वश्विनीश्रोणपुष्यहस्तोत्तराश्रये ।
रेवतीरोहिणीस्वातीभरणीषु च शस्यते ॥ ३
प्रतिपच्च द्वितीया च पञ्चमी च त्रयोदशी ।
दशमी पौर्णमासी च द्वाशशी तिथयस्त्विमाः ॥ ४
सोमो बृहस्पतिश्चैव भार्गवोऽथ बुधस्तथा ।
एते[4] सौम्यग्रहा योज्या वारोदयनिरीक्षणैः ॥ ५
द्वादशस्थं रविं भौमः पश्येद्यदि बलान्वितः ।
आचार्योऽन्धोऽचिरेण स्याच्चिरेण यदि दुर्बलः[5] ॥ ६

---

2 तु शब्दाद्बिम्बे च कृते ।

---

1 शिवं न्यसेत्तु ख 3 कल्पयेत् ख 4 सिते ख
5 अयं श्लोकः क, गयोर्नास्ति ।

निरूप्यैवं मुहूर्तं तु प्राक्कुर्यान्मङ्गलाङ्कुरम् ।
सप्तमान्नवमाद्यापि पञ्चमाद्या शुभेऽहनि ॥ ७
बीजाङ्कुरविधिस्तत्र त्रिकालोक्षार्चनान्वितः ।
लिखेधं पात्रमुद्दिष्टं मङ्गलाङ्कुरकर्मणि[1] ॥ ८
पालिका घटिका चैव शरावश्चेति भेदतः ।
विष्णुब्रह्मशिवाधीशा निर्दोशाः सर्वकर्मसु ॥ ९
प्रत्येकं द्वादश ग्राह्याः पालिकाः षोडशैव वा ।
त्रि[2]पङक्तीकृत्य[3] पात्राणि सुगुप्ते स्थान उत्तरे ॥ १०
अग्न्यादीशानपर्यन्तं स्थापयेत्तानि देशिकः ।
मृद्बालुकाकरीषैस्तु पूरितास्तूत्तरोत्तरम् ॥ ११
दूर्वा[4]दिभिरलङ्कृत्य व्रीहिकूर्चैस्तु पीठिकाम्[5] ।
कृत्वा विन्यस्य तारेण बीजान्यथ विशोधयेत् ॥ १२
यवमुद्गतिलव्रीहिमाषशिम्ब[6]कुलत्थकाः ।
प्रियङ्गुसर्षपश्यामराजमाषाढकीयुताः ॥ १३
यवसर्षपमुद्गेषु ब्रह्मा रुद्रो हरिः क्रमात् ।
वायुः पूज्यस्तु निष्पावे स्कन्दः पूज्यः प्रियङ्गुके ॥ १४
माषेष्विन्द्रः कुलुत्थेऽग्निः शालिष्वर्को यमस्तिले ।
वरुणो राजमाषे श्रीराढक्यां श्यामगः शशी[7] ॥ १५
द्वादशाक्षरमन्त्रेण क्षालयेत्तानि वारिभिः ।
पुण्याहं वाचयित्वाऽथ ब्राह्मणैः स्वस्तिवाच्य च ॥ १६
अष्टाक्षरेण बीजानि क्रमात् तेषु विनिक्षिपेत् ।
प्रादक्षिण्येन पूर्वोक्तक्रमादवहितो गुरुः ॥ १७
जितन्ते पुण्डरीकाक्ष नमस्ते विश्वभावन ।

---

1 तेषां लक्षणमुच्यते क ग 2 श्री क 3 कृष्य क 4 पूर्वा क
5 कूर्चस्थितं क्रमात् क 6 माषशिम्बयोर्व्यत्ययः क पुस्तके ।
7 श्लोकद्वयं ख पुस्तके नास्ति ।

सुब्रह्मण्य नमस्तेऽस्तु नमः[1] पुरुषपूर्वज ॥ १८
तितारकनमोन्तेन तेनैव सवनत्वये[2]।
कूर्चपाणिः कषायसिञ्चेद्गन्धहारिद्रवारिणा ॥ १९
देवतानामभिस्तानि गन्धपुष्पैश्च पूजयेत् ।
मण्डलेषु सकूर्चेषु पूजयित्वाष्टदिक्ष्वपि ॥ २०
रात्रीशेभ्यो[3] बलिं दद्यात् पार्षदान्तं जलान्वितम् ।
प्रागादीशावसानन्तु[4] तत्तन्मन्त्रमुदीरयन् ॥ २१
पललं रजनीचूर्णं सलाजं दधिसक्तुकम् ।
भूतक्रूरबलिं[5] दद्यात् पूर्वं भूतप्रहर्षणम् ॥ २२
द्वितीये पैतृकं ज्ञेयं दद्याच्च तिलतण्डुलैः ।
धानोड्डुम्बुकलाजैस्तु ततो यक्ष[6]बलिं बुधः[7] ॥ २३
नालिकेरपयःसक्तुशालिपिष्टविनिर्मितम् ।
चतुर्थेऽहनि दद्याद्वै ततो नागबलिं बुधः ॥ २४
पञ्चमं तु बलिं दद्यात् ब्राह्मं पञ्चाक्षतैर्युतम्[8]।
चरुणापूपयुक्तेन षष्ठं शैवं बलिं हरेत् ॥ २५
गुळान्नं वैष्णवं चैव सप्तमं तदनन्तरम् ।
पायसं[9] कृसरं दद्यादष्टमं नवमं तथा[10] ॥ २६
प्रातः कर्मदिने दत्वा पश्चात्[11] कर्माणि योजयेत् ।
एवं बीजाङ्कुरं कृत्वा बलिपीठान्तिके[12] बहिः ॥ २७
घण्टापताकागरुडमालाढ्यम् स्थापयेत् ध्वजम् ।

---

3 रात्रीशाः – भूतपितृयक्षनागब्रह्मशिवविष्णुग्रहाः । 9 पयोन्नमष्टमं, कृसरं नवममित्यन्वयः । 10 तथा शब्दादष्टमादिषूत्तरदिनेषु विष्णुग्रहेभ्य एव ।

---

1 महा क ख 2 सेचनक्रिया ख 4 नपर्यन्तं ख 5 मिदं क ग
6 रक्ष क 7 हरेत् ख 8 ब्राह्मं दद्यात्ततो मन्त्री चात्माक्षतसमन्वितम्
11 अनयोर्व्यत्ययः क ग पुस्तकयोः । 12 न्तरे क ग

दशद्वारोल्लितम्[1] सम्यक् पुण्याहजलसंस्तुतम् ॥ २८
दर्भैश्चत्थाम्रपत्रैश्च वेष्टितं विधिवत् कृतम्[2] ।
तारादिपक्षिराजाय हुतान्तोऽष्टाक्षरस्तु यः[3] ॥ २९
सम्बुद्ध्याबाह्य तेनैव स्थाप्य गन्धादिभिर्यजेत् ।
तन्मूले वेदिकां कृत्वा निवेद्य च बलिं हरेत् ॥ ३०
अथ काले समायाते बिम्बं तोयेऽधिवासयेत् ।
कारयित्वा यथान्यायं क्रीत[4] वा लक्षणान्वितम् ॥ ३१
नयनोन्मीलनं कार्यं शिल्पिभिश्च समं यथा ।
प्रतिमां प्रतिगृह्णीयान्मूर्ति-पैः सहितो गुरुः ॥ ३२
प्रणवेन तु कर्तव्यं [:] प्रतिमालोकसङ्ग्रः[5] ।
प्लुतं प्रणवमुच्चार्य पादयोस्तां तदा स्पृशेत् ॥ ३३
प्रक्षाळ्य वारिभिः पूर्वं दर्भैः सङ्घृष्य सर्वतः ।
स्पृष्ट्वा गोवालकैश्चैनां[6] घृताक्तां क्षालयेदथ ॥ ३४
शमीपल्लवसंयुक्तानक्षतानग्रतोऽनले[7] ।
भूरादिसत्यपर्यन्तैः[8] प्रत्येकं जुहुयाच्छतम् ॥ ३५
स्थूलदेहो यतोविष्णुर्वैराजश्रुतिदर्शनात् ।
तस्मादेवं[9] कृते विष्णोः सम्पूर्णा प्रतिमा भवेत्[10] ॥ ३६
शतान्ते च शतान्ते च गायत्र्या विष्णुसंज्ञया ।
पूर्णाहुतिश्च कर्तव्या होमान्ते व्याहृतीर्हुनेत् ॥ ३७
ततो होमं समाप्यैवं सम्पाताज्यं समर्पयेत् ।
दत्वा दूर्वाक्षतान् मूर्ध्नि प्रणवेन समाहितः ॥ ३८
नीराजनं ततः कृत्वा मङ्गलानि च दर्शयेत् ।

---

7 अक्षतहोमानाह । 9 बाहनेन ।

---

1 द्वारयुतं क ग 2 ध्वजं सर्वैश्च वेष्टितम् क ग 3 स्मृतः क ग
4 कृतं क ग 5 हम् ग क 6 ब क ग 8 र्यन्तं क ग
10 अय श्लोकः ख पुस्तके नास्ति

विप्रैः स्वस्ति प्रवाच्याथ शाकुनं सूक्तमुच्चरन् ॥ ३९
कुशवस्त्रयुतामर्चामादाय फलकोपरि ।
अपराह्णे तु सम्प्राप्ते मूर्ति-पैः सहितो गुरुः ॥ ४०
जलतीरं नयित्वाऽप्सु सम्पूज्य वरुणं पुनः ।
संहृत्याग्निमयं ध्यात्वा बिम्बं संहारमार्गतः ॥ ४१
योगपीठ स्मर[1]ञ्ज्योतिर्बिम्बमप्सु निवेशयेत् ।
लोकपालान् बहिर्ध्यात्वा पञ्चमन्त्रैश्च रक्षयेत् ॥ ४२
त्रिरात्रमश्मजं लोहमेकरात्रं मणिं निशाम् ।
प्राक्शिरः शाययित्वैवं बिम्बमप्स्वधिवासयेत् ॥ ४३
अथ प्रासादशुद्धिं तु गुरुः कुर्यादतन्द्रितः ।
मूर्ति-पैः सार्धमागम्य प्रासादं सप्रदक्षिणम् ॥ ४४
न्यासादिकं क्रमात् कुर्यादासीनो गेहदक्षिणे ।
प्रासादं तक्षकैर्भूयो मुक्तमात्रं तु शोधयेत् ॥ ४५
सूत्रैश्च दर्भदाम्ना च वेष्टयित्वा समन्ततः ।
अस्त्रदृष्ट्या समालोक्य गर्भागारं पुनस्तथा ॥ ४६
संमार्ज्य प्रोक्ष्य संक्षाळ्य गोमयेनोपलेपयेत् ।
सर्षपाक्षतदूर्वाभिर्वि-किरेदस्त्रमन्त्रतः ॥ ४७
सम्मार्ज्यालिप्य शकृता गन्धोदैः प्रविलिप्य च ।
दूर्वाक्षतकुशाग्रैश्च विकिरेत्पञ्चशक्तिभिः ॥ ४८
अष्टाक्षरेण सर्वत्र धूपयित्वा सदीपकम् ।
धान्यानि प्रविकीर्याथ पूर्णकुम्भं च विन्यसेत् ॥ ४९
आग्नेय्यां पूर्णकुम्भं च न्यस्त्वाऽस्मिंश्चक्रमर्चयेत् ।
कृणुष्वेत्यादिभिः पञ्चगव्येन प्रोक्ष्य सर्वतः[2] ॥ ५०
चक्रमन्त्रेण सर्वत्र धूपयित्वा सदीपकम् ।
धान्यानि प्रविकीर्याथ पूर्णकुम्भं च विन्यसेत् ॥ ५१

---

1 सुर क ग 2 मन्त्रैः पञ्चगव्येन प्रोक्षयेत् क ग

आग्नेय्यां पूर्णकुम्भं च कृत्वा तालत्रयादिकम् ।
चक्रमन्त्रेण च पुनः कुर्यात्तालत्रयादिकम्[1] ॥ ५२
आग्नेय्यां स्थण्डिले होममारभेत यथाविधि ।
रक्षोहणादि मन्त्राभ्यां पक्वमाज्यं[2] च होमयेत् ॥ ५३
कृणुष्वेत्यादिभिः पञ्चाद्येदेवाद्यैश्च पञ्चभिः ।
दुर्गाभिर्व्याहृतीभिश्च हुत्वा द्रव्याणि होमयेत् ॥ ५४
अपामार्गसमित्सर्पि-र्हविराज्यं विधानतः ।
चक्रेणाष्टशतं[3] हुत्वा प्रत्येकं च समापयेत् ॥ ५५
अपामार्गरसं भस्म सम्पातोच्छेषसंयुतम् ।
पात्रे निक्षिप्य पालाशैश्चक्रं जप्त्वा गृहं पुनः ॥ ५६
कृणुष्वेत्यादिभिः प्रोक्ष्य विकिरेद्यवसर्षपैः ।
तालत्रयादिकं कुर्यादग्निप्राकारमेव च ॥ ५७
पुनरष्टशतं जप्त्वा चक्रं श्वभ्रं[4] च पूजयेत्[5] ।
एवं कृत्वाऽथ राक्षोघ्नं वास्तुहोममथाचरेत् ॥ ५८
तमेवेशेऽग्निमाधाय स्थण्डिले व्रीहितण्डुलैः ।
तत्पूर्वे[6] स्थण्डिले कल्पते वस्त्रास्तीर्णे घटौ न्यसेत् ॥ ५९
कुशदूर्वाशमीपर्णकूर्चस्थौ तण्डुला[7]म्बुभिः ।
पूरिते तण्डुले हेम न्यस्य शक्तिं ततोऽर्चयेत् ॥ ६०
पाद्यादिभिः क्रमाद्द्रव्यैः शन्नोदेवीर्ऋचैव तु ।
परिधिस्थापनात्पूर्वमेवं कृत्वाऽथ होमयेत् ॥ ६१
वास्तोष्पतेति मन्त्राभ्यां पक्वं द्वाभ्यां घृताहुतीः ।
वास्तोष्पतेध्रुवेत्याद्यैः[8] षड्भिर्जातादिपञ्चभिः ॥ ६२

---

3 अष्टोत्तरशतं । 4 प्रतिष्ठागर्तं । 5 पूरयेदिति पाठं स्वीकृत्य धान्यैः पूरयेदिति व्याख्यातम् ।

---

1 श्लोकार्धं क, गयोर्नास्ति । 2 द्वाभ्यां क ग 6 तत्पार्श्वे ख
7 स्थण्डिला क 8 ध्रुवाद्यैश्च ग

शन्न[1]वर्गैश्च जुहुयात् पुनर्व्याहृतिभिस्तथा ।
शमीसमिद्वृताज्याज्यं तयैवर्चा तु होमयेत् ॥ ६३
दूर्वाभिस्त्वथ मूलेन गव्याक्ताभिः समापयेत् ।
होमावसाने वास्तोश्च बलिमीशे समाचरेत् ॥ ६४
नमो रुद्रायेति कुशेष्वग्नेर[2]न्धसा बलिम् ।
दद्यादशेष[3]भस्माज्यशान्तितोयैर्गृहं पुनः ॥ ६५
त्वं विप्रयजुषा सिञ्चेत् पलाशाश्वत्थपल्लवैः ।
पुण्याहं मूर्ति-पैः सार्धं शिवं वास्त्विति वाचयेत् ॥ ६६

इति क्रियासारे (द्वादशः) वैष्णवे द्वितीयः पटलः

तृतीयः पटलः

अथ मण्डपसंस्कारं वक्ष्ये संक्षेपतोऽधुना ।
मण्डपं विधिवत्कुर्याद्देवागारस्य चाग्रतः ॥ १
चतुर्द्वारयुतं रम्यं सर्वतः समलङ्कृतम् ।
सूत्रादि सकलं तत्र संहृ [भृ] त्याचम्य वाग्यतः ॥ २
कृत्वाऽत्मशुद्धिमात्मानमलङ्कृत्य यथाविधि ।
सूत्रेण दर्भदाम्ना च वेष्टयित्वा समन्ततः ॥ ३
तोरणानि चतुर्दिक्षु द्वारदेशे निखानयेत् ।
अश्वत्थौदुम्बरवटप्लक्षोत्थानि यथाक्रमम् ॥ ४
पञ्चहस्तानि सर्वाणि तेषां व्यासः[4] करद्वयम् ।
स्योनापृथिवीमन्त्रेण नमोन्तेन क्रमेण तु ॥ ५

---

1 शन्नो क ग 2 रुद्रेति तोयाद्यैरग्नेरग्रे क 3 त्तच्छेष ख
4 व्यासं क ग

सुशोभनसुभद्रौ च सुकर्माख्य[1]सुहोत्रकौ ।
तोरणेशाः क्रमादुक्ताः ध्वजेशाः कुमुदादयः ॥ ६
कुमुदः कुमुदाक्षश्च पुण्डरीकोऽथ वामनः ।
शङ्कुकर्णः सर्प[2]नेत्रः सुमुखः सुप्रतिष्ठितः ॥ ७
प्रासादविस्तरोत्सेधाः क्षालिताः समलङ्कृताः ।
अरुणोऽग्निनिभः कृष्णः श्वेतः पीतस्तथाऽसितः ॥ ८
श्वेतोऽन्यो बहुवर्णश्च कुमुदादिध्वजाः क्रमात् ।
तोरणाभ्यन्तरे स्थाप्य ध्वजाश्च कुमुदादिभिः ॥ ९
तोरणानि ध्वजांश्चैव नामभिः पूजयेत् क्रमात् ।
बलिं दत्त्वा प्रविश्यान्तर्द्वारदेशेऽर्चयेदिमान् ॥ १०
कलशेषु सरत्नेषु क्रमादुभयपार्श्वयोः ।
पूर्णे च पुष्करं चैव ततश्चानन्दनन्दनौ[3] ॥ ११
वीरसेनसुषेणौ च सम्भवप्रभवौ तथा ।
अथ तोरणमूलेषु कलशेष्विन्द्रपूर्वकान् ॥ १२
पूरयेद्गन्धपुष्पाद्यैर्मन्त्रैस्तैश्च यथाक्रमम्[4] ।
इन्द्रं यमं च वरुणं सोमं सम्पूजयेदथ ॥ १३
इन्द्राय सुराधिपतये सवाहनपरिवाराय नमः इत्येवमन्यत्रापि ।
सशलाकैस्ततो दर्भैः सहदेवीविमिश्रितैः ।
मार्जयेद्वायुबीजेन वह्न्यादीशावसानकम् ॥ १४
आलिप्य वारुणेनैव सर्षपाञ्छतमन्त्रितान् ।
नृसिंहेन फडन्तेन विकिरेद्दशदिक्ष्वथ ॥ १५
सम्मार्ज्यालिप्य सङ्कल्प्य शक्तिरूपं च मण्डपम् ।
विकिरेद्वासुदेवेन[5] जपेदष्टोत्तरं शतम् ॥ १६

---

5 द्वादशाक्षरेण ।

---

1 सुशर्माख्य क ग 2 सर्व ख 3 नन्दिनौ ख
4 अर्धश्लोकः क, गयोर्नास्ति

योजयेद्वासुदेवाद्यैर्गव्यं नारायणान्तकैः ।
प्रोक्षयेद्वासुदेवेन विकिरान् विकिरेदथ ॥ १७
तेनैव प्राङ्मुखस्तिष्ठंस्त्रिधा चोत्तानपाणिना ।
सम्मार्ज्य गन्धतोयेन विलिप्य कुसुमाक्षतैः ॥ १८
विकीर्य मध्ये मूलेन दिक्षु दिङ्नायकान् यजेत् ।
विन्यस्य धूपदीपौ च कुर्यात्तालत्रयादिकम् ॥ १९
ऐशान्यां धान्यराशिस्थं कुम्भेशं पूरयेदथ[1] ।
रत्नहेमाक्षतोपेतं तस्मिन् सम्पूजयेद्धरिम् ॥ २०
अङ्गावरणसंयुक्तं पार्श्वे सम्पूज्य वर्धनीम् ।
चक्रमन्त्रेण सम्पूज्य भ्रामयेत्करकोदकैः ॥ २१
अच्छिन्नधारया तेन[2] कुड्यश्लेषं प्रदक्षिणम् ।
ईशानान्तं परिभ्रम्य तत आरभ्य साधकः ॥ २२
कलशं पृष्ठतो नीत्वा स्थापयेद्विकिरोपरि ।
पूरयित्वाऽथ वस्त्राभ्यामेकेनाच्छाद्य[3] चोभयम् ॥ २३
अग्निं सञ्जनयेत् पश्चात् स्वकुण्डे वाऽथ पश्चिमे ।
चतुरश्रं धनुर्वक्रं वृत्तं पद्मोपमं क्रमात् ॥ २४
पूर्वादिदिक्षु कुण्डानि कृत्वा तुर्यश्रमप्यथ ।
स्रुचं[4] च कारयेत्[5] पश्चाद्यथावत्साधकोत्तमः ॥ २५
बाहुप्रमाणमायामं पालाशं सुमनोहरम् ।
सप्तपञ्चाङ्गुलं वाऽपि चतुरश्रं तु कारयेत् ॥ २६
त्रिभागेन खनेद्गर्तं मध्ये वृत्तं सुशोभनम् ।
तिर्यगूर्ध्वं समं खात्वा बहिरर्धं तु शोधयेत् ॥ २७
अंगुलस्य चतुर्थांशं शेषार्धेऽर्धं तथाऽन्ततः ।

---

5 पूर्णाहुत्यर्थं ।

---

1 त्तथा क 2 सम्यक् क ग 3 समाराध्य वस्त्रेणाच्छाद्य क ग
4 स्रुवं क ख ग

खातस्य मेखलां रम्यां शेषार्धेन तु कारयेत् ॥ २८
कण्ठं त्रिभागविस्तारमङ्गुष्ठकसमायतम् ।
सार्धमङ्गुष्ठकं वा स्यात्तदर्धेन[1] मुखं भवेत् ॥ २९
चतुरंगुलविस्तारं पञ्चांगुलमथापि वा ।
त्रिरुद्वयङ्गुलकं तस्य[2] मध्यान्तं तु सुशोभनम् ॥ ३०
आयामस्तत्समस्तस्य मध्ये निम्नं प्रकल्पयेत् ।
सुषिरं कण्ठदेशे स्याद्विशेद्यावत्कनीयसी ॥ ३१
शेषं दण्डं तु कर्तव्यं यथारुचि विचित्रितम् ।
स्रुवं[3] [4] तु लक्षणोपेतं कृत्वा कर्म समारभेत् ॥ ३२
संशोध्यालिप्य संशोष्य[5] संवाप्याथ[6] स्वबीजकैः ।
तारेणोल्लिख्य सम्प्रोक्ष्य कल्पयेत्तेन विष्टरम् ॥ ३३
लक्ष्मीमृतुमतीं तत्र ध्यात्वाभ्यर्च्य समाहितः ।
तारेणाग्निं समादाय विधायाभ्युक्ष्य तं यजेत् ॥ ३४
तारेण तेन निक्षिप्य तस्यां योन्यां हरिं स्मरन्[7] ।
परिसमुह्य परिस्तीर्य पर्युक्ष्याग्निम् समर्चयेत् ॥ ३५
आज्यस्य संस्कृतिं कुर्यात् तथा स्रुक्स्रुवयोरपि ।
गर्भाधानादिसंस्कारं कुर्याच्च हृदयादिभिः[8] ॥ ३६
गर्भाधानं पुंसवनं सीमन्तं जातनामनी ।
तथान्नप्राशनं चौलं व्रतबन्धमिति क्रमात् ॥ ३७
तारेणैकैकमाराध्य हुत्वाऽष्टाष्टान्तरे क्रमात् ।
मूलेन[9] पूर्णां विधिवत् दत्वाऽऽवाह्य समर्चयेत् ॥ ३८
कृत्वैवमग्निसंस्कारं मूलेनाष्टशतं हुनेत् ।

---

3 स्रुक्स्रुवयोर्लक्षणमन्यतो ज्ञेयम् । 5 सावकाशीकृत्य ।
8 एतदर्धं क, गयोर्नास्ति । 9 द्वादशार्णेन ।

---

1 तदग्रे तु क ग 2 तत्स्यात् ग 4 स्रुचं ख 6 वाच्याथ क
7 हरिः स्वयम् ख, क्षिपेद्गुरुः क ग

शय्यां प्रकल्पयेद्भूयः पूर्वे वा दक्षिणेऽपि वा ॥ ३९
मण्डपस्य प्रयत्नेन विलिप्यालिख्य मण्डलम् ।
स्वस्तिकं निक्षिपेत्तस्मिन् धान्यान्यष्टाक्षरेण तु ॥ ४०
तण्डुलानपि[1] तै रेव वस्त्रास्तीर्णे विनिक्षिपेत् ।
दर्भान् संस्तीर्य तेनैव शय्यां तत्र समास्तरेत् ॥ ४१
शिरोपधानसंयुक्तां पादगड्डकशोभिताम् ।
दुकूलवस्त्रसंयुक्तामर्चितां मूलमन्त्रतः[2] ॥ ४२
कपोलसाधनैर्युक्तां द्वादशाक्षरविद्यया ।
शय्यामारोप्य[3] विधिवत् परितः कलशान् न्यसेत् ॥ ४३
सम्पूज्य[4] तेषु विद्येशान् दिग्विदिक्षु समर्चयेत् ।
प्रथमो विष्णुराख्यातो द्वितीयो मधुसूदनः ॥ ४४
त्रिविक्रमस्तृतीयस्तु चतुर्थो वामनः स्मृतः ।
श्रीधरः पञ्चमः प्रोक्तो हृषीकेशस्तथापरः ॥ ४५
सप्तमः पद्मनाभस्तु ज्ञेयो दामोदरोऽष्टमः ।
अष्टाक्षरेण संयुक्ता[5] विद्येशाः परिकीर्तिताः ॥ ४६
निद्राकुम्भं शिरो देशे पूरयेन्मूलमन्त्रतः ।
दीपांश्चाङ्कुरपात्राणि विन्यसेत्परितः[6] क्रमात् ॥ ४७
मङ्गलानि न्यसेदष्टौ परितः शयनस्य तु ।
शङ्खं चक्रं पताकां च श्रीवत्सं दर्पणं वृषम् ॥ ४८
मत्स्ययुग्मं च कुम्भं च मङ्गलानि प्रचक्षते ।
ततो [दु] त्तरे लिखेद्यत्नाच्चक्राब्जं मण्डलं शुभम् ॥ ४९
सर्ववर्णैः समायुक्तं द्वादशारं त्रिनाभिकम् ।
शास्त्रे यन्मण्डलं प्रोक्तं वदिष्ये तत्समासतः[7] ॥ ५०

---

2 एतदर्धं क, गयोर्नास्ति । 5 अष्टाक्षरस्यैकैकाक्षरसंयुक्ताः ।

---

1 न्यथ ख 3 माराध्य ख 4 सम्पूर्य क
6 पुरत. क 7 समन्ततः क

पञ्चहस्तं त्रिभागोनं[1] पञ्चहस्तमथापि वा ।
चतुरश्रं विधायैवं समं षोडशधा पुनः ॥ ५१
विभज्य द्वारशोभार्थं[2] क्षिप्त्वा पङ्क्तिद्वयं बहिः ।
चतुर्थं परितः पङ्क्तिं[3] सप्तधा विभजेत्समम् ॥ ५२
एषा[4] त्रिभागसंयुक्ता पङ्क्तिरेका तु वीथिका ।
पञ्चधा तां विभज्यैकं भागं वीथ्यामथापि वा ॥ ५३
योजयेत्पञ्चहस्तेदं[5] त्रिभागेनेतरे स्मृतम् ।
शिष्टं तु भ्रामयित्वा तन्मध्ये तु भ्रामयेत्समम् ॥ ५४
चतुर्धा विभजेदन्तर्भागं बाह्यं त्रिधा समम् ।
मध्ये पङ्कजमालिख्य त्रिभिर्नाभिं त्रिधा[6] लिखेत् ॥ ५५
भूयोऽराणि समालिख्य नेमिं तु[7] विभजेद्द्विधा ।
अरसन्धौ क्षिपेत्पञ्च सूत्राणि परितः क्रमात् ॥ ५६
भ्रामयित्वा त्रिधाऽराणां मूलाग्रं च द्वयं द्वयम् ।
मध्यं चतुर्भागयुतमरं कुर्याद्यवोपमम्[8] ॥ ५७
कल्पयेद्विदिशो[9]रस्था दिशोरान्तरगोचराः[10] ।
नेमिस्थाः प्रथयः कार्यास्ताश्चाराग्रान्यसन्धयः ॥ ५८
चतुर्विंशतिसंख्याताश्चान्यदन्यत्र[11]चोक्तवत् ।
रजोभिः पूरयेत् पश्चात् पद्मम् शुक्लेन पूरयेत् ॥ ५९
कर्णिका पीतवर्णा स्याद्धरिता दलसन्धयः ।
शुक्लरक्तासितै[12]र्नाभिं रक्तेनाराणि पूरयेत् ॥ ६०
असितेनारसंधिं तु तत्र पुष्पाणि संलिखेत् ।
प्रथयो रक्तपीताः स्युः शेषाङ्गं भद्रकोपमम् ॥ ६१

---

3 पङ्क्तिस्थानम् । 5–9 छान्दसः सन्धिः । 11 भद्रकादौ ।

---

1 त्रिहस्तं वा क 2 देशानि क ग 4 एषां क 6 तु त्रिधा नाभिमथा क 7 लिप्येन्नाभिस्तु क 8 मलं कुर्याद्दलोत्पलम् ख 10 श्लोकार्धं ख पुस्तके नास्ति । 12 रक्तसितैः क ख ग

एतत्सर्वं विधायैवं मण्डपस्येशभागतः ।
मन्डपं कारयेदन्यच्चतुस्स्तम्भं सवेदिकम् ॥ ६२
स्नानपीठसमायुक्तं कलशान् पूरयेदथ ।
पदानि विधिवत् कृत्वा धान्यैः पीठांश्च सर्वतः ॥ ६३
एकाशीतिपदे मध्ये नवके पल्लवादिकम् ।
पूरयेद्ब्राह्मनवके मध्यगान् गन्धवारिभिः ॥ ६४
शिष्टान्छुद्धोदकैः सम्यक् दिग्विदिक्षु प्रपूरयेत् ।
ब्रह्मश्रीचम्पकक्षीरनीपाम्रवकुळार्जुनैः ॥ ६५
साशोकैः पल्लवैर्मध्यनवके वह्निगोचरे ।
पूरयेत्पद्मकाद्यैस्तु नैर्ऋते विधिव[1]द्घटम् ॥ ६६
पद्मकं रोचनादूर्वादर्भस्तम्बाच्छ[2]सर्षपाः ।
चन्दनं जातिरावर्तं कुन्दं वायव्यके घटे ॥ ६७
यवव्रीहितिलांश्चैव सुवर्णं रजतं मृदम् ।
कूरुद्रव्योत्थौ नद्याश्च शकृत्पिण्डं प्रपूरयेत् ॥ ६८
सहदेवीविष्णुक्रान्ति[3]भृङ्गराजमहौषधीः[4] ।
शमीशतावर्यमृताश्यामाकाश्चेशगोचरे ॥ ६९
सोदकानि फलान्यस्मिन् वारुणे विन्यसेद्घटे ।
शम्यौदुम्बरमाश्वत्थं न्यग्रोधं च पलाशजम् ॥ ७०
कषायपञ्चकं पूर्वे सोमे चोषधिमङ्गलम् ।
सहदेवी वचा चैव शतमूरी शतावरी ॥ ७१
कुमारी च गुडूची च सिंही व्याघ्री च तत्पुनः ।
सप्तवल्मीकसम्भूतां मृदं संसाद्य[5] मध्यमे ॥ ७२
सोमाय वनस्पत्यन्तर्गतये नमः[6] इति विद्यया न्यसेत् ।

---

4 शुण्ठीति व्याख्यायां ।
6 उक्तानि पल्लवादिमृदन्तानि द्रव्याणि अनेन मन्त्रेण न्यसेत् ।

---

1 पूरये ख 2 श्च क ग 3 क्रान्ता क ग 5 सम्पाद्य क

प्रक्षिप्यैतानि कुम्भेषु मूलमन्त्रेण[1] पूरयेत् ।। ७३
दिग्विदिक्षु बहिस्तेषां मध्यगान् गन्ध[2]वारिभिः।
शिष्टाञ्छुद्धोदकैस्तद्वन्मन्त्रेणाष्टाक्षरेण तु ।। ७४
पूरयित्वाऽथ सम्पूज्य जुहुयात्तेन[3] वै घृतम् ।
अष्टोत्तरशतं पूर्णा[4] दत्वा सम्पातसर्पिषा ।। ७५
संस्पृश्य पूज[5]यित्वाऽथ कलशानभिमन्त्रयेत् ।
हिरण्यवर्णां हरिणीं मध्यगानितरानथ ।। ७६
अष्टाक्षरेण[6] सम्मन्त्र्य वस्त्रैराच्छादयेत्पुनः ।
संसाध्य[7] कलशानेवमर्चां तोयाधिवासिताम् ।। ७७
मन्त्रान् संहृत्य[8] चोद्धृत्य क्षाळयेच्च शुभैर्जलैः ।
गन्धादिभिरलङ्कृत्य प्रतिमां मूर्ति-पैर्धृताम् ।। ७८
दर्भपाणिः स्थितो विद्वानुपतिष्ठेत संस्थिताम् ।
नमस्तेऽर्चे सुरेशानि प्रतीके विश्वकर्मणः ।। ७९
प्रभाविताशेषजगद्धात्रि तुभ्यं नमो नमः ।
त्वयि सम्पूजयामीशं नारायणमनामयम् ।। ८०
रहिता योनिदोषैस्त्वमृद्धियुक्ता सदा भव ।
विज्ञाप्यैवं दुकूलस्थं[9] सिद्धार्थकयुतं शुभम् ।। ८१
ऊर्णासूत्रेण बध्नीयात् कौतुकं दक्षिणे करे ।
अङ्गुष्ठानामिकाभ्यां तु सारयित्वा जितादिना ।। ८२
अष्टाक्षरेण सञ्जप्तं सप्तधा विघ्नशान्तये ।
ततोऽर्चां तु सुवस्त्राढ्यां ब्रह्मयानेन तां नयेत् ।। ८३
शाकुनेनैव सूक्तेन वितानाद्युपशोभिताम् ।

---

1 पञ्चगव्यकषायवर्जं जलैः । 3 अष्टाक्षरेण । 4 द्वादशार्णेन ।
6 इतरानष्टाक्षरेणेत्यन्वयः । 8 बिम्ब एव ।

---

2 शुद्ध क 5 पूर – क 7 संशोध्य क ग
9 दुकूलांश ग, लां च क

भद्रासने समारोप्य भद्रं कर्णेति मन्त्रितम् [मन्त्रतः]।। ८४
आज्येन समुगन्धेन गव्येनाभ्यञ्जयेत्ततः ।
मसूरपिष्टेनोद्वर्त्य तथा प्रक्षाळ्य वारिभिः ॥ ८५
मृदा वल्मीकयाऽऽलिप्य मूर्धानं दिव इत्यृचा ।
समुद्रज्येष्ठा[1]मन्त्रेण क्षाळयेत्तेन वारिणा । ८६
कषायपञ्चकेनापि यज्ञायज्ञेत्यृचा पुनः ।
पयः पृथिव्यामिति च मन्त्रेणानेन देशिकः ॥ ८७
स्नापयेत्पञ्चगव्येन फलस्नानमनन्तरम् ।
याः फलिनीरिति मन्त्रेण मूलैश्चैवाष्टमङ्गलैः ॥ ८८
या दिव्या इति मन्त्रेण नेत्रे चोन्मीलयेद्बुधः ।
आज्यं तल समादाय माक्षिकेण तु संयुतम् ॥ ८९
पात्रे तु तैजसे कृत्वा मधुवातेति मन्त्रितम् ।
हिरण्यगर्भमन्त्रेण सौवर्णकशलाकया ॥ ९०
चित्रं देवानामित्येकमाप्यायस्वेति चापरम्[2] ।
उन्मील्यमाने नयने धेनुर्वै दक्षिणा भवेत् ॥ ९१
स्नापयेत्कलशैः पश्चात् प्रथमोक्तक्रमात्ततः ।
हंसः शुचिषदित्येवं प्रथमेनाभिषेचयेत्[3] ॥ ९२
विष्णोरराटमन्त्रेण द्वितीयेनाभिषेचयेत्[4] ।
सोमं राजानमिति च तृतीये नाभिषेचयेत्[5] ॥ ९३
विश्वतश्चक्षुरित्येवं चतुर्थेनाभिषेचयेत्[6] ।
द्रुपदादिति मन्त्रेण कुर्यादुद्वर्तनं बुधः ॥ ९४
शिरस्यामलकं दद्यान्मानस्तोकेति मन्त्रतः ।

---

3 आग्नेयकोणस्थेन 4 नैर्ऋतकोणस्थेन । 5 वायव्यकोणस्थेन ।
6 ईशकोणस्थेन ।

---

1 ज्येष्ठ क ग
2 ति च नेत्रे चोन्मीलयेद्बुधः ख, क पुस्तके पाठद्वयमपि पठितम् ।

मुरमांसीयुतं पश्चात्स्नापयेद्गन्धवारिणा ॥ ९५
विष्णोररटमन्त्रेण ततः शुद्धोदकैर्घ-टैः ।
इदमापः प्रवहतेत्यृचा संस्नापयेद्बुधः ॥ ९६
ततश्चावाहयेद्देवं पीताम्बरधरं हरिम् ।
एह्येहि भगवन् विष्णो लोकानुग्रहकारक ॥ ९७
यज्ञभागं गृहाणेमं वासुदेव नमोऽस्तु ते ।
हिरण्मयेति मन्त्रेण[1] अर्घ्यं पाद्यं प्रदापयेत् ॥ ९८
गन्धं माल्यं पवित्रं च इदं विष्णुर्विचक्रमे ।
बृहस्पतेति मन्त्रेण वासस्तु परिधापयेत् ॥ ९९
वेदाहमिति मन्त्रेण सोत्तरीयं च कारयेत् ।
विश्वतश्चक्षुरित्येवं कुर्यात्सकलनिष्कलम् ॥ १००
ओषधयः समित्येवं पुष्पावकिरणं ततः ।
धूरसीति च मन्त्रेण धूपं[2] दद्याद्विचक्षणः ॥ १०१
समिद्ध इति मन्त्रेण अञ्जनं तु प्रदापयेत् ।
येनाकस्येति मन्त्रेण रोचनां तु प्रदापयेत् ॥ १०२
ततः पुष्पाणि माल्यानि दीर्घायुस्त्वाय वर्चसे ।
ततस्तुवीत देवेशमेतैः सामभिरग्रतः ॥ १०३
स्थित्वा रथन्तराख्येन वैराजेन तथैव च ।
गायत्रसाम्ना च पुनस्तुवीत पुरुषोत्तमम् ॥ १०४
रथन्तरस्य योनिः स्यादभित्वा शूर नो नुमः ।
वैराजस्यापि योनिः स्यात् पिबासोममभी [तथा] ॥ १०५
गायत्रसाम्नो योनिः स्यादग्न आयाहि वीतये ।
तदाज्ञयाऽथ शयने पीठमिष्ट्वा विधानतः[3] ॥ १०६

---

1 हिरण्मये परे कोशे इत्याविना । 2 अत्र पाठक्रमो न विवक्षितः, आगमस्वभावात् ।

3 श्लोकद्वयं ख पुस्तके नास्ति ।

नीराजनादिकं कृत्वा पुण्याहं वाचयेत्ततः ।
उत्तिष्ठेति समुत्थाप्य कृत्वा ब्रह्मरथं शुभम् ॥ १०७
पौरुषेण नयेद्द्वारि दत्वाऽर्घ्यं तां प्रवेशयेत्[1] ।
समिद्ध इति मन्त्रेण अञ्जनं तु प्रदापयेत् ॥ १०८
येनाक्ष्यादि मन्त्रेण रोचनां तु प्रदापयेत् ।
ततः पुष्पाणि कूर्चानि दीर्घायुत्वाय वर्चसे ॥ १०९
पौरुषेण च सूक्तेन मण्डपं तत्प्रवेशयेत्[2] ।
द्वादशाक्षरमन्त्रेण शय्यायां तु निवेशयेत् ॥ ११०
अयं स इति मन्त्रेण सर्वलोकेश्वरोमिति[3] ।
विश्वतश्चक्षुरित्येवं सकलीकृत्य शाययेत् ॥ १११

इति क्रियासारे (त्रयोदशः) वैष्णवे तृतीयः पटलः

चतुर्थः पटलः

अथाधिवासनं वक्ष्ये यथा शास्त्रविनिश्चितम् ।
यद्योगाज्जायतेऽर्चायां सदा सन्निहितोहरिः ॥ १
आत्मानंसर्वगं ध्यात्वा सर्वज्ञं विष्णुमव्ययम् ।
कुर्याद्भावा[4]न्वितो विष्णोरधिवासनमुत्तमम् ॥ २
प्रणवेन समायोज्य जीवमर्चाभिमानिनम् ।
उत्क्राम्यात्मैकतां कृत्वा यस्मिन् सर्वेश्वरे हरौ ॥ ३
संशोष्यमरुता पृथ्वीं दग्ध्वा बीजान्विताग्निना ।
अद्भिः सम्प्लाव्य ता वायुशुष्का[5] वह्नौ विलापयेत् ॥ ४

1 पादपूर्वं 5 वायुशुष्काः ता आपः ।

2 श्लोकद्वयं ख, गयोर्नास्ति । 3 अर्धं ख पुस्तके नास्ति 4 द्भूवा क

संहृत्य वायुना वह्निं वायुमाकाशतां नयेत् ।
आध्यात्मिकाधिदै-वैस्तु कारणैर्विषयैः सह ॥ ५
तन्मात्रसंस्थितान्येवं क्रमात्संहृत्य देशिकः ।
नभो मनसि संहृत्य मनोऽहङ्कार[1] एव च[2] ॥ ६
महत्यात्मनि[3] तं चापि नयेदव्याकृतैकताम्[4] ।
शान्तेऽनन्ते परे व्योम्नि निष्क्रिये ज्ञानविग्रहे ॥ ७
तं[5] ध्यायेत्परमानन्दसंस्थितं शान्तविग्रहम् ।
यस्मि[6] न्नव्याकृतं लीनं यत्संस्थं यत्स्वरूपकम् ॥ ८
परस्य ब्रह्मणः शक्तिं विदुस्तं परमेष्ठिनम् ।
स वासुदेवो विज्ञेयः सर्वात्मा सर्वकृत्प्रभुः ॥ ९
परावरविकल्पैकस्वरूपो ज्ञानहेतुकः[7] ।
तामव्याकृतिकां[8] मायामधिष्ठाय सिसृक्षया ॥ १०
नादात्माऽजनयन्मूर्तिं पौरुषीं स्पर्शसंज्ञिकीम् ।
सङ्कर्षणः स विज्ञेयः पुरुषश्चेह कथ्यते ॥ ११
पुनरव्याकृतिं मायां क्षोभयित्वा जगत्पतिः ।
विश्वं तेजोमयं रूपं प्रद्युम्नं प्रभुमव्ययम्[9] ॥ १२
पुनस्तेजोमयीं स्वां च[10] प्रकृतिं प्रविलोड्य च ।
विश्वाह्लादकरैः शान्तै रसमात्राभि[11]रीश्वरः ॥ १३
निवृत्तिसंज्ञामपरामकरोदम्मयीं तनुम् ।
विदुस्तमनिरुद्धाख्यं जलोदरशयं हरिम् ॥ १४
पुनरव्याकृतिं मायां विक्षोभ्य जगदीश्वरः[12] ।

---

3 बुद्धितत्वे । 4 प्राणतत्वैकताम् ।
6 संहारमभिधाय सृष्टिं वक्तुमारभते यस्मिन्निति ।

---

1 कृतिः क ग 2 हङ्कृतितां पुनः ख 5 तत् क ग
7 अर्धचतुष्टयं ख पुस्तके नास्ति । 8 यस्मिन्नव्याकृतां ख
9 मसृजत्प्रभुः ख 10 तां स्वां ख 11 मातृभिः क ग
12 क, गयोरर्धं नास्ति ।

विश्वं तेजात्मकं[1] देवं सर्वात्मानं प्रजापतिम् ॥ १५
पञ्चैताः शक्तयः प्रोक्ताः परस्य परमात्मनः ।
पुनरव्याकृतिं मायां विक्षोभ्य जगदीश्वरः ॥ १६
गन्धमात्रात्मकं देवं सर्वात्मानं प्रजापतिम् ।
अशेषजगदाधारा पदे वै-रे ? [परे दैवे] व्यवस्थिताः ॥ १७
आध्यात्मिकाधिभूताधिदैवभेदस्य कारणम्[2] ।
पञ्चतन्मात्रतत्त्वेन कीर्तिता वेदवादिभिः ॥ १८
स हि सर्वात्मको ब्रह्मा सिसृक्षुर्विविधं जगत् ।
साधारणमपूर्वं तं सर्वज्ञं व्याकरोत्प्रभुः ॥ १९
ताभिस्तन्मात्र[3]भूताभि[4]रद्भिरण्डमथासृजत् ।
तदण्डं पञ्चधा भूत्वा आत्मभूतं[5] हिरण्मयम् ॥ २०
तत्र सङ्क्रमते जीवशक्तिरात्मनि सम्भृता[6] ।
तन्मात्रपञ्चकाधारा संहृताशेषवृत्तिकी ॥ २१
जीवेनाधिष्ठितः प्राणो लब्धवृत्तिस्तदा भवेत् ।
स ह्यव्याकृतिसंज्ञस्तु प्राणोऽध्यात्मिक इष्यते ॥ २२
गुणत्रयमयी बुद्धिर्जायतेऽतोऽष्टवृत्तिकी ।
अहङ्कारस्ततस्तस्मात् कर्तृशक्तिस्तु जायते ॥ २३
शब्दाद्यर्थमयी वृत्तिर्मनस्तु समनन्तरम् ।
सङ्कल्पादिमयं तस्मादर्थाः पञ्चाभिजज्ञिरे ॥ २४
शब्दः स्पर्शश्च रूपं च रसो गन्ध इतीरिताः ।
तैर्ज्ञानकर्मशक्तीनि चान्यारब्धा न्यतः परम् ॥ २५
श्रोत्रं त्वक्चक्षुषी जिह्वा घ्राणं ज्ञानार्थमिन्द्रियम् ।
वाक्पाणिपादपायुश्च तत्रोपस्थं च पञ्चमम् ॥ २६

---

4 भूततन्मात्राभिः ।

---

1 गन्धमात्रात्मकं ख 2 देवैश्चाधिभूतस्य कारणम् क ख
3 स्तन्मन्त्र क ग 5 भूतात्मभूतं शुभ्रं ख 6 संहृता ख

एतानि कर्मसंज्ञानि पञ्चभूतान्यतः परम् ।
व्योम वायुश्च तेजश्च जलं पृथ्वी च पञ्चमी ॥ २७
एभिः स्थूलशरीरं तु सर्वाधारं प्रजापतेः[1] ।
एतेषां वाचका मन्त्रा लिख्यन्तेऽतः परं क्रमात् ॥ २८
मकारं[2] जीवतत्त्वं तु शरीरे व्यापकं न्यसेत् ।
भकारं प्राणतत्त्वं तु जीवोपाधिं तथा[3] न्यसेत् ॥ २९
वकारं हृदयावासं बुद्धितत्त्वं स्मरेद्बुधः ।
अहङ्कारं फकारं तु न्यसेदत्रैव बुद्धिमान् ॥ ३०
तत्रैव पं मनस्तत्त्वं सङ्कल्पाख्यात्मिकं न्यसेत्[4] ।
नकारं शब्दतन्मात्रं मस्तके तन्निवेशयेत् ॥ ३१
वक्त्रे धं स्पर्शतन्मात्रं दं रूपं हृदि विन्यसेत् ।
थं वस्तौ[5] शसतन्मात्रमङ्घ्रौ तं गन्धमालकम् ॥ ३२
श्रोत्राद्युपस्थपर्यन्तं णादि चान्तं न्यसेद्बुधः[6] ।
विन्यसे[7]त्पञ्चभिः शेषैः स्थूलदेहं प्रकल्पयेत् ॥ ३३
ङादिकान्ताक्षरैर्युक्तं व्योमाद्यवनिपश्चिमम् ।
शिरोनासिकहृद्गुह्यपादेष्वेतानि विन्यसेत् ॥ ३४
सृष्टिन्यासमिदं प्रोक्तं ह्यन्यथाऽपि क्वचित्स्मृतम्[8] ।
हृत्पुण्डरीकं शं विद्याद्धं सूर्यं द्वादशात्मकम् ॥ ३५
द्विसप्ततिसहस्राणि व्याप्य नाडीर्व्यवस्थिताः ।
कलाषोडशकं सौम्यं तन्मध्ये संविचिन्तयेत् ॥ ३६
तन्मध्ये चिन्तयेद्विन्दुं दीप्तं[9] वै वह्निमण्डलम् ।
जीवं तमीशभावस्थं योजयेत्परमेष्ठिना ॥ ३७

---

5 गुह्ये । 9 द्योतनरूपं रेफं अथवा बिन्दुं – रेफं

---

1 प्रजायते ख 2 मकारे क ग 3 ततो क 4 तत्रैवाथ मनस्तत्त्वं सङ्कल्पाख्यात्मकं क ग 6 त्क्रमात् ख 7 विन्यस्य ख 8 त्किल ख

षों बीजेन ततो ध्यायेत् पौरुषं भावमाश्रितम् ।
यं बीजेन ततो विश्वभावस्थं सर्वसाक्षिणम् ॥ ३८
ध्यायेद्रामिति बीजेन सर्वज्ञं विश्वतोमुखम् ।
अनुग्रहकरं भावं सविसर्गेण वेन तु ॥ ३९
ध्यायेन्निवृत्तिसंज्ञं तु शान्तं शान्तेन चेतसा ।
सर्वसम्भूतिकर्तारं सर्वात्मानं पुनः स्मरेत् ॥ ४०
लां बीजेन पुनः[1] सर्वं भावसंहृतिकारणम् ।
विन्यसेत्कोपतत्वं क्षं [क्ष्रौं] सर्व[2]संयमकारणम् ॥ ४१
कर्तारं[3] च विकर्तारं सर्वाधारं विचिन्तयेत् ।
एवं सूक्ष्मतनुं[4] विष्णुं ज्ञानाभासं सुरेश्वरम्[5] ॥ ४२
वाच्यवाचकसम्भेदविभक्ताशेष[6]मण्डलम् ।
व्याप्य सम्यगमीभिस्तु संस्थितम् ज्ञानशक्तिभिः ॥ ४३
ध्यात्वाऽथ मन्त्रमूर्तिं तु कल्पयेद्देशिकोत्तमः ।
अङ्गप्रत्यङ्गभेदेन स्वकल्पोदितवर्त्मना ॥ ४४
ततो गन्धैश्च पुष्पैश्च निवेद्यैर्वि-विधैरपि ।
अलङ्कारैश्च विविधैरर्चयेत्तं सुभावितः ॥ ४५
प्रभूतैर्याशिकैर्द्रव्यैस्ततश्चक्राष्ठजमण्डले ।
यजेत विधिना विद्वान् साङ्गं देवमधोक्षजम् ॥ ४६
आसनं तत्र वै ध्यात्वा सगात्रं सपरिच्छदम् ।
तस्योपरि शुभं चक्रं द्वादशारं विचिन्तयेत् ॥ ४७
स्वक्षं[7] त्रिनाभिं[8] द्विर्नेमिं[9] सर्वतत्वसमन्वितम् ।
पूर्वादिप्रथिषु प्राज्ञः प्रकृत्यादीनि विन्यसेत् ॥ ४८

---

5 अयमर्धश्लोकः वाच्यवाचकेत्यर्धानन्तरं योजनीयः ।
7 स्वरूपभूतनारसिंहबीजयुक्तम् । 8 सत्त्वत्रयरूपेण ।
9 अन्तर्बहिः क्रमेण द्विर्नेमि ।

---

1 ततः क 2 सार क ग 3 कं चारं क ग
4 तरं ख 6 चिन्तयेच्छेष क ग

अधरोत्तरसंस्थेषु तत्वानि क्रमयोगतः ।
सूर्यं द्वादशधा[1] भक्तमरेषु विनिवेशयेत्[2] ।। ४९
स्वरैर्द्वादशभिः सम्यक्[3] संवृतस्वरवर्जि-तैः ।
बिन्द्वन्तैः पञ्चदशभिः स्वरैः[4] शुक्लेऽसिते तथा[5] ।। ५०
आकारान्तैर्विसर्गा द्यैरमामाद्येन मध्यतः ।
सोमं सर्वकलाभिस्तु शुक्लेतरविभागतः ।। ५१
विभक्तं तिथिरूपाभिरेकैकस्मिन् विचिन्तयेत् ।
सवनत्रितयं नाभौ स्वनाम्नैव विचिन्तयेत् ।। ५२
अक्षसंस्थं तथा कोपं तन्मध्ये पङ्कजं स्मरेत् ।
तन्मध्ये पौरुषीं शक्तिं ध्यात्वाभ्यर्च्य क्रमेण तु ।। ५३
अर्चायां[6] या तु विन्यस्ता[7] ध्यात्वा तां[8] कल्पयेद्बुधः ।
मूर्तिं मन्त्रमयीं विद्वान् साङ्गां सावरणां क्रमात् ।। ५४
द्वादशाक्षरबीजैस्तु युक्ता विष्ण्वादिदेवताः ।
अरकेषु[9] तथा पूज्या द्वादशाराब्ज[10]मण्डले ।। ५५
प्रथमो विष्णुराख्यातो द्वितीयो मधुसूदनः ।
त्रिविक्रमस्तृतीयस्तु चतुर्थो वामनः स्मृतः ।। ५६
श्रीधरः पञ्चमः प्रोक्तो हृषीकेशस्ततः परम् ।
सप्तमः पद्मनाभस्तु ज्ञेयो दामोदरोऽष्टमः ।। ५७
केशवो नवमः प्रोक्तस्तथा नारायणः परः ।
माधवश्चापरः प्रोक्तो गोविन्दो द्वादशः स्मृतः ।। ५८

---

2 हं नमः पराय सूर्याय मेषात्मने नमः इत्यादि सिद्धम् ।
3 नपुंसकस्वरवर्जितैः । 4 शुक्ले समित्यादिभिः, कृष्णे सः इत्यादिभिः अमायां समित्यनेन । 5 सकारासनस्थैः ।
7 प्रतिमायां अष्टाक्षरमयो द्वादशाक्षरमयो वा या मूर्तिरर्चिता तामेवात्र पूजयेत् । 9 अरेषु ।

---

1 च दशधा ख 6 अर्चाया क 8 तान् क ग 10 राच्छ ग

वैनतेयादिकानिष्ट्वा लोकेशान्तं यजेद्दिह[1] ।
जननादिक्रमाद्धुत्वा[2] तत्वान्यग्नौ स्वयं गुरुः ॥ ५९
शान्तितोयं समादाय सिञ्चेद्बिम्बस्य मूर्धनि ।
पीठब्रह्मशिलाश्चैव शोधयित्वाऽधिवास्य च ॥ ६०
दिक्षु होमांश्च विधिवत् कुर्युर्मूर्तिधराः क्रमात् ।
ततोऽग्निम् समुपस्थाय अग्निम् दूतमृचैव तु ॥ ६१
पूर्वाग्निं प्रणयेत्पूर्वमग्निना रयिमित्यृचा ।
त्वमग्नेद्युभिरित्येवं दक्षिणं पावकं नयेत् ॥ ६२
अग्निम् दूतमिति प्रत्यगुक्तं विहरणं क्वचित् ।
अग्न आयाहिना चोक्तं क्वचिन्मूलेन वै क्वचित् ॥ ६३
अग्निमग्निम् हवीमभिरुत्तरं प्रणयेत्ततः ।
कृत्वा प्रधानहोमान्तं गायत्र्या जुहुयुः पुनः[3] ॥ ६४
पक्वं द्रव्याणि वेदाद्यैरङ्गैर्वा मूर्ति-भिस्तु वा ।
समिदाज्यचरून् लाजान् सर्षपांश्च यवांस्तिलान् ॥ ६५
व्रीहीनाज्यं चाष्टशतं पूर्णां द्रव्यान्तरे तथा ।
गुरुः स्वकुण्डे मूलेन हुत्वा शांतिं हुनेदथ ॥ ६६
घृतेन दध्ना पयसा मधुना च यथाक्रमम् ।
स्पृशेत् पादं घृतं हुत्वा दधिनाऽभ्यन्तरं स्पृशेत् ॥ ६७
क्षीरं हुत्वाऽथ हृदयं मूर्धानं मधुना स्पृशेत् ।
सह सर्वं ततो हुत्वा सर्वगात्रं तु संस्पृशेत् ॥ ६८
अष्टाष्टाहुतयस्तत्र निर्दिष्टाः शान्तिकर्मणि ।
पञ्चोपनिषदै[4]रेवं हुत्वा शांतिं यथाक्रमम् ॥ ६९
तच्छेषभस्मसम्पातैः संस्पृष्य कुसुमैर्यजेत्[5] ।
चतस्रो धेनवः स्थाप्या दक्षिणद्वारदेशतः ॥ ७०

---

2 सृष्टिक्रतात् । 4 पञ्चतत्वमन्त्रैः ।

1 क्रमेण तु ख 3 जुहुयात्क्रमात् ख 5 एतदर्धं क, ग योर्नास्ति ।

उत्तराभिमुखास्तत्र रज्जुबद्धाः पृथक्पृथक् ।
गङ्गा च यमुना चैव गोदावरी सरस्वती[1] ॥ ७१
तासु गोषु[2] दुहेत्क्षीरं चरुं च श्रपयेत्ततः ।
दुहेच्च विष्णुगायत्र्या तयैव श्रपयेच्चरुम् ॥ ७२
निवेदयेत्तया चैव देवेशाय बलिं हरेत् ।
मण्डपात्तु बहिर्दिक्षु गन्धपुष्पसमन्वितम् ॥ ७३
आद्याश्च कर्मजाश्चैव ये भूताः प्राग्दिशि[3] [4]स्थिताः ।
प्रसन्नाः परितुष्टास्ते प्रतिगृह्णन्त्विमं बलिम् ॥ ७४
वृक्षेषु पर्वताग्रेषु[5] येषु दिक्षु च संस्थिताः ।
भूमौ व्योम्नि स्थिता ये च तेऽपि[6] गृह्णन्त्विमं बलिम्[7] ॥ ७५
विनायकाः क्षेत्रपाला ये चान्ये बलिकांक्षिणः ।
पूर्वाद्याः पार्षदाश्चैव तेऽपि गृह्णन्त्विमं बलिम्[8] ॥ ७६
एभिः[9] क्रमाद्बलिं दत्वा ब्राह्मणान् भोजयेदथ ।
मण्डपस्योत्तरे पार्श्वे हिरण्यं दक्षिणा भवेत् ॥ ७७
सुरभीश्च गुरोर्दद्याद्विष्णुर्मे प्रीयतामिति ।
वेदाङ्गपेयुरभितो विप्रा भक्तिसमन्विताः ॥ ७८
एवं कृत्वाऽधिवासं[10] तु नृत्तगीतादि कारयेत् ।
अधिवाससमाप्तिस्तु भवेदेवं कृते सति ॥ ७९

इति क्रियासारे (चतुर्दशः) वैष्णवे चतुर्थः पटलः

---

2 विद्यमानमिति शेषः । 4 दक्षिणदिशि, पश्चिमदिशि, उत्तरदिशि इत्यूहनीयम् । 7 अग्न्यादि कोणेषु । 8 अष्टदिक्षु ।
10 ध्यानात्मकं होमात्मकं च ।

---

1 सर्वत्र सम्बुद्धिः क, गयोः । 3 प्रदिशि ख
5 पुष्टिमात्रेषु क ग 6 परि ख 9 एभ्यः ग

पञ्चमः पटलः

अधिवास्यैवमाचार्यस्ततः प्रातः समुत्थितः ।
स्नात्वाऽलंकृत्य चात्मानं कृतपौर्वाह्णिकक्रियः[1] ॥ १
रत्नन्यासं प्रकुर्वीत विधिदृष्टेन वर्त्मना ।
नपुंसकशिलायां तु गर्तं मध्ये दिशास्वपि ॥ २
विधाय तेषु संशोध्य बीजादीनि न्यसेद्गुरुः ।
क्षाळितामर्चितां पूर्वं पीठवच्चाधिवासिताम् ॥ ३
बिम्बाधिवासकाले तां न्यसेत्तारेण वै ततः ।
गमनं त्रिविधं कृत्वा पृष्ठसौम्येशभागतः ॥ ४
स्थापनं यत्र निर्णीतं तत्र पादशिलां न्यसेत् ।
तारेण गन्धपुष्पाद्यैराराध्य प्रार्थयेच्च ताम् ॥ ५
स्थितं चराचरं यस्यां रत्नानां निधिरव्ययः ।
सा त्वं ब्रह्मशिलारूपा तिष्ठात्र धरणी स्थिरा ॥ ६
त्वमेवेत्यादिना प्रार्थ्य स्थितमित्यादिना पुनः !
नपुंसकशिलायास्तु स्थापनं विहितं क्वचित् ॥ ७
शोधयेत् पञ्चगव्येन गर्तमष्टाक्षरेण तु ।
प्रोक्षयेद्गन्धतोयैश्च द्वादशाक्षरविद्यया ॥ ८
आहुतीनां शतं हुत्वा गायत्र्या विष्णुसंज्ञया ।
तयाऽभिमन्त्र्या रत्नानि गर्तेषु[2] विनिवेशयेत् ॥ ९
अष्टाक्षरस्य वर्णैस्तु व्यस्तैरेवं[3] यथाक्रमम् ।
समस्तेन च तन्मध्ये पूर्वादिक्रमयोगतः ॥ १०

---

1 तत्पूर्वाह्णि कृतक्रियः ख 2 गर्तेषु रत्नानि क ग 3 रेव ख

बीजानि[1] रत्नधातूनि लोहानि च यथाक्रमम् ।
यवान् व्रीहींश्च निष्पावान् प्रियङ्गुतिलसर्षपान् ।। ११
नीवारांश्च तथा शालीन् सिद्धार्थांश्च[2] यथाक्रमम् ।
वज्रमौक्तिकवैडूर्यशङ्खस्फटिकमौक्तिकान् ।। १२
चन्द्रकान्तं शक्रनीलं पद्मरागं च मध्यतः ।
मनःशिलां हरीताळमञ्जनं श्यामसीसकं ।। १३
सौराष्ट्रीं रोचनां चैवगैरिकं पारकं तथा ।
सुवर्णं रजतं ताम्रमायसं त्रपु सीसकम् ।। १४
सौवर्णं कूर्मरूपं च सौवर्णं शङ्खमेव च[3] ।
दिक्षु सर्वासु विन्यस्य ब्रह्मस्थाने हिरण्यकम् ।। १५
पुण्याहं[4] वाचयित्वाऽत्र वैष्णवैः सह मन्त्रवित् ।
संस्पृशेद्विष्णुगायत्र्या तत्तु गर्तं प्रदक्षिणम् ।। १६
रत्नन्यासं ततः कुर्यान्नपुंसकशिलोपरि ।
ततः पाद[5]शिलां न्यस्येत् स्त्रीलिंगेन परीक्षिताम् । १७
सम्पूज्याच्छाद्य वस्त्राभ्यां रक्षां कृत्वा बहिर्व्रजेत् ।
सशलाकैस्ततो दर्भैः सहदेवीविमिश्रितैः ।। १८
मार्जयेद्बहिरन्तश्च गोमयेन विलेपयेत् ।
पञ्चगव्येन सम्प्रोक्ष्य गन्धोदैर्मूलमन्त्रितैः ।। १९
होनार्थं[6] वालुकाभिस्तु प्रासादस्य समन्ततः ।
वितस्तिद्वयविस्तारान् स्थण्डिलान् कारयेत् पृथक् ।। २०
दिक्ष्वष्टासु च कृत्वैवमष्टौ च कलशान्[7] न्यसेत् ।

---

1 अष्टाक्षरैरष्टदिक्षु मध्येऽष्टाक्षरेण बीजादीनि न्यसेत् । बीजाद्यभावे– शालिमुक्ताहरिताळसुवर्णानि च विन्यसेत् ।
4 रत्नन्यासविधिमाह – पुण्याहेति । 5 पादः – पीठः ।
6 दिशाहोममाह । 7 अष्टसु दिक्ष्वेव ।

---

2 सिद्धार्थं च ख 3 सौवर्णशङ्खकूर्मौ च मध्ये पद्मं च विन्यसेत् ख

स पुष्पपल्लवान् पार्श्वे वैष्णवानभिमन्त्रितान् ।। २१
अष्टाक्षरेण मन्त्रेण पूर्वादिक्रमयोगतः ।
प्रणीय वैष्णवं वह्निं मूलमन्त्रेण मूर्तिपाः ।। २२
जुहुयुः समिधो ब्राह्मीर्मूलेनाष्टोत्तरं शतम् ।
आज्येन जुहुयुस्ताधद्गायत्र्या विष्णुसंज्ञया ।। २३
कृत्वैवं[1] विधिवत् पश्चाच्छान्तितोयं समाहरेत् ।
वैष्णवे ताम्रपात्रे तु[2] सर्वकुम्भोपसम्भृतम्[3] ।। २४
अष्टाक्षरस्य वर्णैस्तु पूरयित्वा प्रदक्षिणम् ।
प्रणवेन तु सम्पूज्य वस्त्राभ्यां परिवेष्टय च ।। २५
शतवारं तु मूलेन मन्त्रयित्वा तु देशिकः ।
ततः कलशमादाय करगुप्तं विधाय च ।। २६
ध्यात्वाऽथ परमं विष्णुम् द्वादशाक्षरविद्यया ।
कर्माचार्यास्ततो[4] मूर्ध्नि सर्वतीर्थमयं जलम् ।। २७
मूलार्चा[5]मूर्ध्नि चेद्विद्वान्निषिञ्चेदोमिति ब्रुवन् ।
कुण्डस्थं मण्डलस्थं च देवं बिम्बे नियोजयेत् ।। २८
विश्वेशकलशाम्भोभिः प्रोक्षयेत् स्वस्वमन्त्रकैः ।
आत्मानं सकलीकृत्य देवोऽहमिति भावयेत् ।। २९
दत्वार्घ्यं परया भक्त्या उत्तिष्ठेति तदुद्धरेत् ।
अतो देवेति सूक्तेन नयेत् बिम्बं प्रदक्षिणम् ।। ३०
अग्रतः पातयेद्धारां वर्धन्याऽर्घ्यकरः स्वयम् ।
देवस्य पृष्ठतः कुम्भौ[6] नयेतां मूर्तिधारकौ ।। ३१
कर्ता बन्धुजनैः सार्धमनुगच्छेन्मुदान्वितः ।
द्वारदेशे प्रदायार्घ्यं बिम्बं यत्नान्निवेशयेत् ।। ३२

---

2 अष्टकलशोदकानि अष्टाक्षरैः ताम्रपात्रे समासेचयेदित्यर्थः ।
6 निद्राकुम्भकुम्भेशौ ।

---

1 हुत्वैवं ग 3 संहृतम् ग 4 कर्माचार्यास्थितः क ग 5 कर्मार्चा क ग

पीठं प्रदक्षिणीकृत्य ध्यात्वा देवं यथाविधि ।
गोहेमरत्नवस्त्रादि विप्रेभ्यश्च प्रदापयेत् ॥ ३३
स्थापयेत् पीठिकायां तु त्रैलोक्यं मन्त्रमुच्चरन् ।
त्रैलोक्यविक्रान्ताय त्रिविक्रमाय नमो नमः ॥ ३४
पञ्चोपनिषदान् मन्त्रान् मन्त्रमूर्तिम् स्मरे[1]द्गुरुः ।
परीक्ष्य लम्बसूत्रेण स्थितिं देवस्य कल्पयेत् ॥ ३५
ध्रुवाद्यौरिति मन्त्रेण स्थिरीकुर्याद्गुरुः स्वयम् ।
पठेच्चैवाग्रतः पश्चाद्विश्वतश्चक्षुरित्यृचम् ॥ ३६
अर्चयेत्सकलीकृत्य संस्नाप्य कलशोदकैः ।
ध्यात्वा तु परमं विष्णुम् निष्कलं मन्त्रवित्तमः ॥ ३७
आकाशं तस्य मूर्तिः स्यात् पृथिवी तस्य[2] पीठिका ।
विग्रहं कल्पयेदस्य परमेष्ठ्यादिभिः क्रमात् ॥ ३८
तेजोमयं ततो ध्यात्वा शङ्खचक्रगदाधरम् ।
मन्त्रन्यासं[3] ततः कुर्यान्मूलमन्त्रेण मन्त्रवित् ॥ ३९
स्थिते[4] कुर्यात् स्थितिन्यासमासीने सृष्टिसंज्ञकम् ॥
शयिते[5] संहृतिन्यासं यानगे सर्वमेव तु ॥ ४०
एवं न्यासं क्रमात्कृत्वा[6] ध्यात्वा सकलनिष्कलम् ।
हृत्पुण्डरीकमध्यस्थं सर्वलोकस्य साक्षिणम् ॥ ४१
क्षेत्रज्ञं तं महाविष्णुमणीयांसमणोरपि ।
परमेष्ठ्यादिनाऽऽदाय प्रतिमां हृदि विन्यसेत् ॥ ४२
निरुध्य प्रणवेनैव सजीवा[7] जायते पुनः ।

---

3 सर्वत्र सृष्टिस्थितिसंहारसृष्टिस्थितिन्यासान्तं मन्त्रन्यासं कुर्यात् ।
4 स्थिते बिम्बे स्थितिन्यासान्तं मन्त्रन्यासं, आसीने सृष्टिन्यासान्तं, शयिते बिम्बे संहारन्यासान्तं कुर्यात् ।
6 अष्टबन्धं निक्षिप्येत्याद्यत्रैव योजनीयम् ।

---

1 स्मरन् ख 2 चैव क ग 5 शयने क ग 7 ङ्गाय ख

भूयोऽपि सकलीकृत्य पूजयेत्पुरुषोत्तमम् ॥ ४३
अष्टबन्धं च निक्षिप्य साङ्गं सावरणं क्रमात् ।
दर्शयित्वा ततो मुद्रां प्रणमेद्दण्डवत् क्षितौ ॥ ४४
चण्डप्रचण्डौ निर्गत्य द्वाःस्थौ सम्पूजयेत्ततः ।
वैनतेयमनन्तं च गणाध्यक्षं च शङ्करम् ॥ ४५
दिक्पान् मातृश्च शास्तारं दुर्गां स्कन्दं क्रमेण तु ।
विष्वक्सेनं ततो द्वाःस्थौ कुमुदादीन् समन्ततः ॥ ४६
विष्णुपारिषदान् सर्वान् बलिपी-ठे प्रकल्पयेत् ।
स्वैस्वैर्मन्त्रैश्च गन्धाद्यैः पूजयित्वा बलिं हरेत् ॥ ४७
भक्त्या कृताञ्जलिपुटः प्रार्थयेत्तदनन्तरम् ।
देवदेवं जगन्नाथं[1] ध्यात्वा पारिषदानपि ॥ ४८
यावदत्र जगन्नाथो बिम्बमाश्रित्य तिष्ठति ।
तावदत्रैव रक्षार्थं यूयं तिष्ठत सर्वदा ॥ ४९
इति प्रार्थ्य प्रविश्यान्तराचम्य सकलीकृतः ।
गर्भागेहं समासाद्य मूलमन्त्रं जपेच्छतम् ॥ ५०
स्तोत्रैर्नानाविधैस्तुत्वा निर्गत्य प्रणमेत्ततः ।
नृत्तं गीतं च वाद्यं च विविधं कारयेत्ततः ॥ ५१
गुरुं सम्पूजयेच्छक्त्या कर्ता[2] मूर्तिधरानपि ।
अन्यानपि यथाशक्त्या सर्वांश्चैवोदनादिभिः ॥ ५२
एकबेरे प्रतिष्ठैवं बहुबेरे वदाम्यहम् ।
बहुबेरे[3] तु कर्मार्चा कार्या स्यात् स्नपनादिकम् ॥ ५३
तत्व[4]न्यासं तु कुर्वीत मूलार्चायां सुभावितः ।
अधिवास्य तु कर्मार्चां पूर्वोक्तविधिनैव तु ॥ ५४
प्रवेश्य गर्भागेहं तु मूलार्चायां नियोजयेत् ।

---

1 देव देव जगन्नाथ क ग 2 त्कर्ता भक्त्या ख
3 वीरे ख ग 4 तत्त ख

इयं सा देवता कान्ति[1]रोमित्युक्त्वा तु देशिकः ॥ ५५
सर्वेण[2] पादपीठे तां स्थापयित्वाऽथ पूजयेत् ।
पूर्ववत् सकलीकृत्य गन्धपुष्पादिभिः क्रमात् ॥ ५६
स्थापिता तु पुराणा या प्रतिमावयवैः शुभा ।
तलाप्येवंविधिस्तत्र स्वधिवासनवर्जितम्[3] ॥ ५७
पूर्वोक्तेन विधानेन स्नापयित्वा तु देशिकः ।
शोधनं क्षाळनाद्यैर्वा ततस्तत्त्वानि संहरेत् ॥ ५८
पुनरुत्पाद्य तत्त्वानि न्यसेत् सृष्टिक्रमेण तु ।
मन्त्रन्यासं ततः कृत्वा पूजयेत् कल्पवर्त्मना ॥ ५९
एष साधारणः प्रोक्तो विधिः संस्कारकर्मणि ।
यदा वियोजिताङ्गा स्यात् प्रतिमाग्न्यादिदूषिता ॥ ६०
तत्त्वाध्वानं क्रमात् कृत्वा ध्यात्वा सृष्टिक्रमेण तु ।
ततः संहारमार्गेण तत्त्वाध्वानं सुभावितः ॥ ६१
क्रमात् परस्मिन् संलीनं ध्यात्वा स्वात्मनिदेशिकः ।
उत्पाट्य पूर्वप्रतिमामन्यां संस्थापयेत् सुधीः ॥ ६२
पूर्वोक्तेन विधानेन विश्वः[4] प्रोक्तो विधिस्त्वयम् ।
अन्यथा वा प्रकुर्वीत जीर्णोद्धारं विचक्षणः ॥ ६३
बिम्बे जीर्णेऽथवा गेहे कृत्वा काष्ठमयं गृहम् ।
ऐन्द्रेशानविभागे वा सोमेशानान्तरेऽपि वा ॥ ६४
तस्मिन् काष्ठमयं पीठं न्यसेत् प्रासादसम्मुखम् ।
तत्र लोहमयं बिम्बं शोधितं स्थापयेद्गुरुः ॥ ६५
जलेऽधिवास्य कलशैरभिषिच्याग्रमण्डपे ।

---

2 लां नमः पराय सर्वात्मने इत्यादिना । 3 पूजाकालाद्यतिक्रमेण सान्निध्यहीनायां अवयवैर्युक्तायां पुनः सान्निध्यार्थं अधिवासनमण्डप-नयनजीवकलशादिवर्जितं शोधनादि कुर्यात् । 4 अविकलः ।

---

1 मूर्ति ख

अधिवास्य यथान्यायं कलशेन सहाथवा[1] ॥ ६६
मूलार्चायां ततः कृत्वा पुण्याहं वाचयेत् पुनः ।
देवस्याग्रेऽथ[2] कलशं पूरयित्वा[3] शुभैर्जलैः ॥ ६७
हेमरत्नाक्षतोपेतं कुशकूर्चादिसंयुतम् ।
निर्गत्याभिनवं गेहं प्रविश्य प्रतिमां ततः[4] ॥ ६८
संहृत्योत्पाद्य तत्वानि न्यसेन्मूलेन चाप्यथ ।
जननादिक्रमाद्धुत्वा संस्कृत्यैवं ततो बहिः ॥ ६९
निर्गत्य पृच्छेदाचार्यः कर्तृन् कालावधिं पुनः ।
कियन्तं कालमत्रेशः प्रवासवसतिं वसेत् ॥ ७०
इति पृष्टास्तु ते ब्रूयुः कालावधिमसंशयम् ।
विज्ञापयेत्ततो देवं प्रविश्य सुसमाहितः ॥ ७१
भगवन् वास्त्वभिनवं बिम्बं वा तव शोभनम् ।
कारयिष्यन्ति ते भक्तास्तदनुज्ञातुमर्हसि ॥ ७२
क्लेशवासस्त्वया देव रोचनीयोऽल्पकें गृहे ।
यावन्नवं शुभं कृत्वा पुनः संस्थापयामहे ॥ ७३
इत्युक्त्वाऽऽवाहयेत्तस्मिन् पञ्चोपनिषदैर्हरिम् ।
मूलमन्त्रेण संयुक्तं देवं सम्पूजयेत्ततः ॥ ७४
तत्पात्रं शिरसि स्थाप्य निर्गच्छेद्यत्न[5]वान् गुरुः ।
ब्रह्मघोषेण वाद्यैस्तु ध्वजच्छत्रादिसंयुतम् ॥ ७५
गेहं प्रदक्षिणीकृत्य गच्छेद्यत्नसमन्वितः ।
तत्र गेहं नवं प्राप्य प्रविशेत् सप्रदक्षिणम् ॥ ७६
द्वारदेशे प्रदायार्घ्यं विधिवद्भक्तिसंयुतः ।
प्रविश्य तं समादिष्टम् कालं विज्ञाप्य विष्णवे ॥ ७७
भगवन्नल्पगेहेऽस्मिन् वासः क्लेशोऽपि ते हरे ।

---

1 जीवकलशपक्षः तद्विहीनः पक्षश्च ।

2 तु क ग 3 पूरयेच्च ख 4 गुरुः ख 5 द्यत क ग

वस्तव्यो भगवंस्तावद्यावद्गेहं समाप्यते ॥ ७८
कारकस्य परां वृद्धिमभिजानन्[1] महोदयाम् ।
भक्तानामनुकम्पार्थमिह त्वं स्थातुमर्हसि ॥ ७९
इत्युक्त्वा किञ्चिदानम्य सिञ्चेद्द्वारि[2] मूर्धनि[3] ।
पञ्चोपनिषदान् मन्त्रान् ध्यात्वा सर्वेण देशिकः ॥ ८०
ततो मूर्त्या च संयोज्य पूजयेत् कल्पवर्त्मना ।
ततो नृत्तं च वाद्यं च कारयेत् हृष्टमानसः ॥ ८१
अनिवारितमन्नाद्यं सार्वजन्यं च कारयेत् ।
ततः प्रभृति तत्कर्त्तुः[4] नियमस्थो व्रती भवेत् ॥ ८२
बिम्बं जीर्णं यदि भवेद्विष्वक्सेनात्मना स्वयम् ।
अष्टाक्षरेण चोत्पाट्य भूर्भुवस्सुवरोमिति ॥ ८३
नववस्त्रेण सञ्छाद्य यन्त्रमारोप्य यत्नतः ।
नीत्वाऽगाधं जलं तस्मिन् विश्वक्सेनमनु[5]स्मरन् ॥ ८४
तन्मन्त्रेणाथ निक्षिप्य स्नात्वा गच्छेद्गृहं पुनः[6] ।
दक्षिणे स्थण्डिलं कृत्वा सैकतं चतुरश्रकम् ॥ ८५
तिलान् विकीर्य दर्भांश्च प्रतिमां तत्र शाययेत् ।
क्षालयेत्तत्र तां तोयैर्गन्धपुष्पैश्च मण्डयेत् ॥ ८६
त्रिरप्रदक्षिणं कृत्वा सतिलैस्तण्डुलैः किरेत् ।
नववस्त्रेण सञ्छाद्य यन्त्रमारोप्य यत्नतः ॥ ८७
नीत्वाऽगाधं जलं तस्मिन् विश्वक्सेनमनुस्मरन् ।
तन्मन्त्रेणाथ निक्षिप्य स्नात्वा गच्छेद्गृहं पुनः ॥ ८८
रत्नानि तत्र निक्षिप्तान्यादद्यात् स्वयमेव तु ।

---

3 द्वारि ध्यात्वा प्रतिमाया मूर्धनि सर्वेण सिञ्चेदित्यन्वयः ।
4 यजमान आचार्यश्च ।

---

1 मनुजानां क ग 2 तद्द्वार क ग
5 मधु ख 6 अर्धत्रयं ग पुस्तकेऽधिकम् ।

प्रासादं शोधयेत्पश्चाद्रक्षां कुर्यात् प्रयत्नतः ॥ ८९
बिम्बं संस्कृत्य विधिवत् पुरादिष्टेन वर्त्मना ।
यदि नोपहतं बिम्बं समग्रावयवं तथा ॥ ९०
तदाच्छाद्य तु यत्नेन कुशैर्गुप्तं तु कारयेत् ।
अथ शीघ्रतरं गेहं कारयित्वा प्रयत्नतः ॥ ९१
बिम्बं संस्कृत्य विधिवत् पुरादिष्टेन वर्त्मना ।
आवाह्य पूर्ववत् पात्रे पञ्चोपनिषदैर्हरिम् ॥ ९२
पूर्ववत्तत्समानीय सिञ्चेत् सर्वेण मूर्धनि ।
ततः पूर्वोक्तविधिना पूजयेत् पुरुषोत्तमम् ॥ ९३
बिम्बं यदि नवं तत्राप्यर्वागावाहनक्रियम् ।
सर्वं पूर्वोक्तविधिना कृत्वा तत्पालगं जलम् ॥ ९४
सिक्त्वा सर्वं तथा कुर्यात् प्रतिष्ठाविधिना सुधीः ।
तत्[1] संस्कृत्य पुनर्बिम्बं कौतुकत्वेन कल्पयेत् ॥ ९५
जीर्णोद्धारमिदं प्रोक्तंप्रतिष्ठास्थैर्यसिद्धये ।
मासादर्वाक् तु कालश्चेतत्र सङ्कोच इष्यते ॥ ९६
तदूर्ध्वं द्वादशाब्दार्वाङनिष्क्रामणविधिः स्मृतः ।
प्रासाददेवसंस्थानि सर्वतत्वान्यपि क्रमात् ॥ ९७
देवताश्च समाहृत्य प्रतिमायां नियोजयेत् ।
स्थापिते पूजिते देवद्वारं सम्यक् पिधाय[2] च ॥ ९८
नोद्घाटयेत् प्रयत्नेन त्रीण्यहानि तु कश्चन ।
मन्त्रस्य प्रीणनं कुर्यात् स्थापिते पुरुषोत्तमे ॥ ९९
कौतुकं चाग्रतो न्यस्य तत्र सन्पूजयेद्धरिम् ।
दानं विप्रार्चनं होमं पूजनं तत्र कीर्तितम् ॥ १००
कारयेच्च[3] दिशाहोमान् यथावद्देशिकोत्तमः ।

3 परिवारप्रतिष्ठामाह ।

1 तं क ग 2 विधाय ख

दिक्ष्वष्टास्वग्निमाधाय कृत्वाचाग्निमुखं क्रमात् ।। १०१
पक्वं च जुहुयुर्विप्रा मन्त्रैरेभि[1]र्यथाक्रमम् ।
इन्द्रक्रतुमिति प्राच्यामग्निदूतं हुताशनें ।। १०२
नाके सुपर्णं याम्यायां नैर्ऋत्यां मोषुणः परा ।
यं रक्षन्तीति वारुण्यां वायवायाहि वायवे ।। १०३
सोमं राजानमित्येव सौम्ये[2] शार्वे तु त्र्यम्बकम्[3] ।
पञ्चतारान् पुरोऽनूच्य प्रत्येकं जुहुयुः क्रमात् ।। १०४
इन्द्रादीनां निजैर्मन्त्रै[4]र्जुहुयात् समिदादिकम् ।
पालाशखदिराश्वत्थप्लक्षन्यग्रोधबिल्वजाः ।। १०५
औदुम्बर्यश्च कार्ष्मर्यः समिधः समुदाहृताः ।
अष्टोत्तरशतं हुत्वा पूर्णां दद्यात् पृथक् पृथक् ।। १०६
होमशेषं समाप्याथ सम्पातकलशैः[5] क्रमात् ।
पीठिकासु[6]च संस्नाप्य पूजयित्वा बलिं हरेत् ।। १०७
दिशाहोमविधिस्त्वेव[7]मुक्तः संक्षेपतो मया ।। १०८

इति क्रियासारे (पञ्चदशः) वैष्णवे पञ्चमः पटलः

षष्ठः पटलः

दिशाहोमं विधायैवं बाह्येऽग्रे बलिपीठिकाम्[8] ।
कृत्वा शास्त्रोक्तमार्गेण विधिना स्थापयेच्च ताम्[9] ।। १
चतुर्थदिवसादर्वाक् स्थापनं शक्यते[10] यदि ।

---

4 इन्द्राय सुराधिपतये सायुधेत्यादिभिः । 5 सम्पातयुक्तैः ।
6 इन्द्रादीनां ।

---

1 रेतै क ग 2 सोमे ख 3 त्रियम्बकम् ख 7 श्चैवं क ग
8 कान् ग 9 तान् क ग 10 शस्यते क

लघुना विधिनाऽनेन स्थापयेद्बलिपीठिकाम्[1] ।। २
बलिपीठप्रतिष्ठां च वक्ष्ये संक्षेपतोऽधुना ।
संहितायां तथा विष्णोः शैवागमनिबन्धने ।। ३
यथा प्रोक्तं तथैवात्र वक्ष्यते बलिपीठिका ।
अन्यत्र विस्तरेणोक्तं यथा विज्ञादिभिः कृतम् ।। ४
पीठं प्रासादमध्यादथ[2] बलिविधये पञ्चषट्सप्तदण्डं मुक्त्वा[3] ।
अन्यत्र विस्तरेणोक्तमहं संक्षेपतो ब्रुवे ।
एवं नैवागमे प्रोक्तं तथा विज्ञादिभिः कृतम्[4] ।। ५
प्रासादोत्तरतो लब्धस्थानमध्ये विधाय च ।
पञ्चगव्यं[5] तथा पीठं कारयेल्लक्षणान्वितम् ।। ६
बलिपीठसमुत्सेधो गर्भागारप्रतेः समः ।
पूजापीठसमानो वा षड्नो वा प्रकीर्तितः ।। ७
पीठिकाः परितश्चाष्टावुत्तमस्यैव कारयेत् ।
वर्जयेत्पीठिकाश्चाष्टौ मध्यमाधमयोः पुनः ।। ८
कारयित्वैवमाचार्यः पुनः कर्म समाचरेत् ।
पूरयेत् कलशानष्टौ गन्धोदैः पूर्वतः[6] क्रमात् ।। ९
मध्ये चैकं पुनः कुम्भं गन्धपुष्पाक्षतान्वितम् ।
पूज[7]यित्वा यथान्यायं पार्षदान्[8] भूतनायकम् ।। १०
होमं च विधिवत् कुर्यात् कृत्वा चाग्निमुखं ततः ।
मूलेन जुहुयात् पक्वं कुमुदाद्यैर्घृताहुतीः ।। ११
मूर्तिपानां च मन्त्रैश्च पक्वमाज्याहुतीर्हुनेत् ।
अष्टाष्टसंख्यया भूयो दद्यात् पूर्णाहुतिं क्रमात् ।। १२

---

2 गर्भगेहात् । 5 पञ्चगव्यमात्रं गर्भं विधाय ।

---

1 देशिकोत्तमः ख 3 क, गयोरधिकं पीठमित्याद्यस्पष्टं च ।
4 एषः श्लोकः क, ग पुस्तकयोः नास्ति । 6 परितः क ग
7 पूर क ग 8 पूजयेत् क ग

मूलमन्त्रेण जुहुयात् समिदाज्यहवींषि च ।
लाजांश्च सर्षपांश्चैव तथा सक्तूंस्तिलान् यवान्[1] ॥ १३
दधि क्षीरं तथा क्षौद्रं पुष्पाणि च फलानि च ।
सर्वं साज्यं तु होतव्यं पक्वं गायत्रियाऽथ वा ॥ १४
अष्टोत्तरशतं त्वेभिः पृथक् पूर्णाहुतिं ददेत्[2] ।
होमं समाप्य सम्पातं संस्पृश्य कलशान् यजेत् ॥ १५
अन्तः प्रविश्य देवेशमाराध्य विधिपूर्वकम् ।
भूतेभ्योऽथ[3] बलिं दत्वा कुर्याज्जागरणं निशि ॥ १६
प्रभाते कृतनित्यस्तु कलशान् देवमर्चयेत्[4] ।
दर्भैः सस्मृज्य सृद्भिस्तु त्वग्भिः सङ्कृष्य पीठिकाम् ॥ १७
क्षाळयित्वा शुभैस्तोयैः क्षाळयेद्बहुभिर्जलैः ।
जलाधिवासमुद्दिश्य[5]क्षाळयेद्बहुभिर्जलैः ॥ १८
ततो गुरुर्विधानेन पूजयेत्पार्षदानपि ।
मध्ये बलं[6] च संस्थाप्य पूजयेद्विधिना प्रभुम् ।
गन्धादिभिरथाभ्यर्च्य दिक्षु भूतबलिं हरेत् ॥ १९
ओं नमः प्राच्येभ्यो भूतेभ्यो विश्वभूतेभ्यो नमोऽस्तु
विश्वरूपेभ्यो विश्वरूपेभ्यश्च वो[7] नमः ॥
ओं नमोऽस्तु दक्षिणेभ्यः भूतेभ्यः शार्ङ्गधन्वनो नमो हाहाभ्यः
सर्वेभ्यो नमः ॥ ओं नमः पाश्चात्येभ्यो भूतेभ्यः गैरिकत्वेभ्यः[8]
भैरवेभ्यः
विष्णुपार्षदेभ्यो वियद्गृहोदरवर्तिभ्यो हुंफट् गच्छत स्वाहा ।
विष्णुगणानामतो बलिमुपहरामि भद्रं नो ददत प्रीणयत स्वाहा
ओं नमो विष्णुभूतेभ्योदीच्येभ्यः सकलजन्तुहितकारिभ्यो

---

4 चतुर्थदिवसानन्तरं चेत् अन्तर्देवमप्यर्चयेत् । 6 हरिसेनमित्यर्थः ।

1 यवांस्तिलान् ख 2 तथा क 3 एतेभ्योऽपि ख
5 मृत्सृज्य क 7 ओं ग 8 क, ग पुस्तकयोरधिकं पदम् ।

विधपालेभ्यो वो नमः
एवं दत्वा बलिं भूयो विप्रैः स्वस्ति प्रवाचयेत् ।
तेभ्यो बहुधनं दत्वा देवमाराध्य भक्तितः ॥ २०
बलं मध्ये प्रतिष्ठाप्य कलशेनाभिषेचयेत् ।
अन्यान् दिक्षु[1] प्रतिष्ठाप्य कलशै[2]रभिषेचयेत्[3] ॥ २१
विष्णुपारिषदान् सर्वान् बलिपीठे प्रकल्पयेत्[4] ।
गन्धपुष्पैः समाराध्य बलिं दद्याच्च भक्तितः ॥ २२
ततः प्रदक्षिणीकृत्य यजमानेन संयुतः ।
प्रणमेद्दण्डवद्भूमौ बलं भूताधिपं प्रभुम् ॥ २३
अन्यानपि यथान्यायं प्रणिपत्य क्षमापयेत् ।
देवस्य स्नपनं कृत्वा शक्त्याराध्य यथाविधि ॥ २४
अवस्तुतेन सम्प्रोक्ष्य[5] पूजयेत् पार्षदानपि ।
आचार्यं पूजयेत् पश्चान्मूर्तिपांश्च सदस्यकान् ॥ २५
इत्येतद् बलिपीठस्य स्थापनं समुदाहृतम् ।
एतत् कृत्वा यथान्यायं सर्वान् कामानवाप्नुयात् ॥ २६
अथ तुर्येऽहनि प्राप्ते कुर्यात् स्नानं यथाविधि ।
यागभूमिं तु संशोध्य[6] गोमयेन विलेपयेत् ॥ २७
गव्येन गन्धतोयैश्च सम्प्रोक्ष्य विकिरैः किरेत् ।
पूर्ववद्वह्निसंस्कारं कृत्वा कुर्यात् पदानि[7] तु ॥ २८
नवकानि चतुर्दिक्षु कोणेष्वष्टकमेव च ।
मध्ये द्वादशपत्राढ्यम् कमलं च प्रकल्पयेत् ॥ २९
व्रीहीभिः पीठिकास्तेषु कृत्वा दर्भान् विकीर्य च[8] ।

---

1 कुमुदादीन् । 2 बहिः स्थितैः । 6 मण्डपसंस्कारं कृत्वा ।
7 कलशाननुसृत्य ।

3–4 एतदर्धद्वयं क, ग पुस्तकयोः नास्ति । 5 संक्षाळ्य ख
8 कृत्वा पत्रेषु तण्डुलान् ख

कलशान् सादयेत्तेषु पदेषु प्रणवेन तु ॥ ३०
परमेष्ठ्यात्मना दर्भान् न्यस्त्वा गन्धोदकैः पुनः ।
सम्प्रोक्ष्य पुंसा विकिरेदक्षतैर्विश्वमन्त्रतः ॥ ३१
निवृत्त्योत्तानयेत् कुम्भान् सर्वेणोद्धृत्य विन्यसेत् ।
पीठेषु प्रणवेनैव कूर्चान् सम्प्रोक्ष्य विन्यसेत् ॥ ३२
अष्टाक्षरेण द्रव्याणि पूरयेद्विधिवत् क्रमात् ।
हेमरत्नाक्षतान् न्यस्य[1] गन्धोदैर्मूलमन्त्रतः ॥ ३३
तस्मिन् सम्पूजयेद्देवं साङ्गं सावरणं क्रमात् ।
बाह्ये मध्यमकुम्भेषु गोमूत्रादीनि पूरयेत्[2] ॥ ३४
गोमूत्रं गोमयं क्षीरं दधि सर्पिः पृथक्पृथक् ।
परमेष्ठ्यादिभिर्मन्त्रैरष्टार्णेनापरानथ[3] ॥ ३५
फलतोयं च सुस्वादु नालिकेरादि[4]सम्भवम् ।
द्राक्षितं[5] कदळीतोयमैक्षवं च रसं शुभम् ॥ ३६
ततो गन्धोदकैः कुम्भान् पूरयेद्द्वादशापरान्[6] [7] ।
शेषान्नाद्युदकैः शुद्धैरा[8]पूर्य स्थाप्य कुम्भकान् ॥ ३७
अष्टाक्षरेण मन्त्रेण पूज[9]यित्वाऽभिमन्त्रयेत् ।
वस्त्रैराच्छाद्य गायत्र्या होमकर्म[10] समाचरेत्[11] ॥ ३८
सम्पाताज्येन संस्पृश्य गन्धपुष्पैः प्रपू[12]जयेत् ।
गत्वा देवाग्रतः स्थित्वा जपेदष्टोत्तरं शतम् ॥ ३९
द्वादशाक्षरमन्त्रं तु द्वारमुद्घाट्य वायुना ।
ततः प्रविश्य दत्वार्घ्यं विश्वेनापनयेद्बहिः ॥ ४०

---

1 प्रधानकुम्भे । 2 दिक् विदिक् क्रमात् । 3 नैर्ऋतवायव्यै-शानकुम्भान् । 4 आदिशब्देनाम्रादि गृह्यते । 5 द्रवीकृतम् ।
7 ब्रह्मकलशस्य परितः राशिस्थानेषु स्थितान् । 10 चतुर्द्रव्यादि ।

---

6 शावरान् ख 8 शुद्धाना क ग 9 पूर ख
11 रभेत् क ग 12 प्रयो- क ग

आत्मसात्कृत्य[1] निर्माल्यं क्षाळयित्वा शुभैर्जलैः ।
आराध्य पीठं[2] विधिवदावाह्याभ्यर्चयेत्ततः[3] ॥ ४१
दत्वार्घ्यं परया[4] भक्त्या पाद्यं चापि ददेत् पुनः ।
गायत्र्या कौतुकं छित्वा हस्तौ प्रक्षाळ्य वारिभिः ॥ ४२
मधुपर्कं च गायत्र्या दद्यादाचमनं पुनः ।
दत्वा दूर्वाक्षतान् मूर्ध्नि पादयोश्चोमिति ब्रुवन् ॥ ४३
नीराज्य विधिवद्देवं स्नानकर्म समाचरेत् ।
परमेष्ठ्यादिभिर्मन्त्रैर्मूत्राद्यैः[5] स्नापयेत् पृथक् ॥ ४४
उष्णोदकेन संक्षाळ्य पूजयित्वाऽन्तरे पृथक् ।
स्नापयेत् फलतोयेन मन्त्रेणाष्टाक्षरेण तु ॥ ४५
तेनैव कादळेनापि चैक्षवैर्गन्धवारिभिः[6] ।
नद्योदकेन[7] गायत्र्या स्नापयेन्मध्यमेन[8] च ॥ ४६
सूक्तेन पौरुषेणैव पूजयेत् कल्पवर्त्मना ।
भूतेभ्योऽपि बलिं दत्वा[9] ब्राह्मणान् भोजयेदथ ॥ ४७
गुरुं सम्पूज्य विधिवत् दक्षिणां च प्रदापयेत् ।
मूर्तिपान् पूज[10]येत् पश्चात् सर्वांश्चैवोदनादिभिः ॥ ४८
इति संक्षेपतः प्रोक्तं स्नापनं परमेष्ठिनः ।
य एतद्विधिवत् कुर्यात्[11] स याति परमां गतिम् ॥ ४९
त्रिकालं वा द्विकालं वा एककालमथापि[12] वा ।
पूजामहरहः कुर्यादुपहारैश्च भक्तितः ॥ ५०

इति क्रियासारे (षोडशः) वैष्णवे षष्ठः पटलः

---

1 आत्मसात्करणमाघ्राणनम् 5 गोमूत्राद्यैः 6 ब्रह्मकलशदळकलशैः
7 बहिः पूर्वाविदलकलशस्थैः शुद्धोदकैः 8 ब्रह्मकलशेन पुरुषसूक्तेन
12 द्विकालं चेत् प्रातः सायं, एककालं चेत् प्रातरेव ।

---

2 देवं क ग 3 त्पृथक् क ग 4 वरयेत् क ग
9 दद्यात् ख 10 भोज ख 11 कुर्वन् क ग

सप्तमः पटलः

आराधनमथो[1] वक्ष्ये देवदेवस्य चक्रिणः ।
स्नात्वा विधिवदाचम्य देवागारं प्रविश्य च ॥ १
नारसिंहेन दिग्बन्धं कुर्यात्तालत्रयादिकम् ।
मूलेन पञ्चविंशत्या प्राणायामत्रयं चरेत् ॥ २
वायुसिंहामृतैर्बीजै[2]र्धारणा धारयेत् क्रमात् ।
यं बीजं नाभिमध्यस्थं धूम्रम् खण्डानिलात्मकम् ॥ ३
विशोषयेदशेषं तु ध्यायन् कायात्तु कल्मषम् ।
क्ष्रौं हृत्पङ्कजमध्यस्थं बीजं तेजोनिधिं स्मरेत् ॥ ४
अधोर्ध्वतिर्यगाभिश्च ज्वालाभिः कल्मषं दहेत्[3] ।
शशाङ्काकृतिवद्ध्यायेदम्बरस्थं सुधाम्बुभिः ॥ ५
हृत्पद्मव्यापिभिर्देहं स्वकमाह्लादयेत् सुधीः ।
सुषुम्नायोगमार्गेण सर्वनाडीविसर्पि-भिः ॥ ६
एवं संशोध्य देहं तु ततस्तत्वानि विन्यसेत् ।
करशुद्धिं पुरा कृत्वा अस्त्रमन्त्रेण साधकः ॥ ७
करयोर्व्यापकं न्यस्येन्मूलमन्त्रेण चोभयोः ।
तर्जन्यादि तदन्तेषु[4] मन्त्रार्णास्तारसम्पुटान् ॥ ८
तर्जन्यादि कनिष्ठान्तमुभयत्र स्थितिर्भवेत् ।
अङ्गान्यपि तथा न्यस्येन्मूलेन व्यापकं तनौ ॥ ९
कनिष्ठादिकनिष्ठान्तमङ्गन्यासं [:] क्वचित् स्मृतम् [तः] ।
केट्[5]वदनहृन्नाभिगुह्यजान्वङ्घ्रिषु क्रमात् ॥ १०

---

2 शोषणदाहनप्लावनार्थैः । 4 तर्जन्यन्तेषु, एष सृष्टिन्यासः ।

---

1 मतो क 3 हरेत् ख 5 स्पृष्ट्वा क ग

मन्त्राणान् हृदयान्तेषु नाभ्यादिषु पुनर्न्यसेत् ।
मन्त्रवर्णैर्नमोन्ताख्ययुतै[1]रङ्गानि कल्पयेत् ॥ ११
एवं विन्यस्य मुद्रां च[2] दर्शयित्वा हृदि स्मरेत् ।
देवं सहस्रकिरणं सहस्राभं चतुर्भुजम् ॥ १२
शङ्खचक्रगदापद्मैः किरीटादि विभूषितम् ।
पीतकौशेयवसनं दिव्यगन्धस्रगादिभिः ॥ १३
अलङ्कृतमुदाराङ्गं सुमुखं प्रियदर्शनम् ।
मानसामृतजै[3]र्भो-गै[4]रर्चयेद्विधिना प्रभुम् ॥ १४
देवोहऽमिति सञ्चिन्त्य जपेदष्टाक्षरं पुनः ।
ततः सम्भृत[5]सम्भारः पूजाकर्म समारभेत् ॥ १५
वामे तु वर्धनीं न्यस्य पूरितां गालितोदकैः ।
शेषं दक्षिणपार्श्वे तु पूजाद्रव्यं समस्तकम् ॥ १६
अर्घ्यपात्रं तु ततोऽस्त्रेण प्रक्षाळ्यापूर्य चाग्रतः ।
गन्धपुष्पयुतं कृत्वा तस्मिन् मन्त्रं तु विन्यसेत्[6] ॥ १७
चैतन्यं सर्वगं ज्योतिरविभक्तं विभक्तवत् ।
प्रणवेनाष्टजप्तेन प्रोक्षयेत्तेन वारिणा ॥ १८
फडन्तेनार्चनाभूमिं यागद्रव्यं च तेन वै ।
अथात्मानमलङ्कृत्य योगपीठं प्रकल्पयेत् ॥ १९
आधारशक्तिं चानन्तं मध्ये कोणेऽर्चयेदिमान् ।
धर्मं ज्ञानं च वैराग्यमैश्वर्यमनलादिषु ॥ २०
अधर्मादीनि गात्राणि पूर्वादिक्रमयोगतः ।
अनन्तं पङ्कजं मध्ये मण्डलात्मत्रयं क्रमात् ॥ २१
ओमैः[7] केसरजालेषु विमलाद्याश्च शक्तयः ।

---

1 नमोन्ताभिर्हृदयाद्याख्याभिर्युतैः 4 अर्घ्यादिभिः 6 मन्त्रमयं
7 अ कारोवारमकारैर्बीजभूतैर्मण्डलात्मत्रयमित्यन्वयः ।

---

2 रुद्राणान् ग 3 मनोभूततलै क ग 5 संहृत ख ग

अर्च्यास्ताः क्रमशो वक्ष्ये मध्ये तु नवमीं यजेत् ॥ २२
विमलोत्कर्षिणी ज्ञाना क्रिया योगेति शक्तयः ।
प्रह्वी सत्या तथेशा चा[ना]नुग्रहा नवमी स्मृता ॥ २३
गुरुपङ्क्तीश्च विधिवत् यजेत्ता नात्र लिख्यते[1] ।
नैर्गधैर्धूपदीपैः समाराध्य जितादिना ॥ २४
आवाह्य[2] विधिवद्देवं मूलेनैवात्र कल्पयेत् ।
सकलीकृत्य मुद्राभिः सान्निध्यं परिकल्पयेत् ॥ २५
अञ्जलिः प्रथमा मुद्रा क्षिप्रं (देवप्रसादनी[3] ।
अञ्जलिं[4] हृदयासक्तामूर्ध्वां दक्षिणतो नताम् ॥ २६
ऊर्ध्वाङ्गुष्ठो[5] वाममुष्टिर्दक्षिणाङ्गुष्ठबन्धनः ।
सव्यस्य तस्य चाङ्गुष्ठो भवेदूर्ध्वमुखस्थितः ॥ २७
तिस्रः साधारणास्त्वेता मूर्ति-भेदे च कीर्तिताः[6]) ।
ऊर्ध्वमुद्रां प्रयुञ्जास्य दक्षिणस्य कनिष्ठिकाम् ॥ २८
मोचयेन्मूर्तिमुद्रेयमष्टार्णस्य प्रकीर्तिता ।
बध्वा तु दक्षिणां मुष्टिं कनिष्ठां तस्य मोचयेत् ॥ २९
अस्याङ्गानामिमां मुद्रां दर्शयेच्च प्रयत्नतः ।
अञ्जलिं परिवाराणां मस्तके न्यस्य दर्शयेत् ॥ ३०
आयुधानां च मुद्राणां लक्षणं नेह कथ्यते ।
तारेण दर्शयेन्मुद्रां सर्वेषां च दिवौकसाम् ॥ ३१
पूजयेद्विधिनाऽर्घ्याद्यैरुपहारैर्जितादिना ।
अर्घ्यं पाद्यं तथाचामं मधुपर्कं पुनश्च तत्[7] ॥ ३२
स्नानं वस्त्रोपवीतं च भूषणं गन्धपुष्पकम् ।
धूपं दीपं निवेद्यं च पुण्डरीकाक्षविद्यया ॥ ३३

4 वन्दनीमुद्रामाह 5 ऊर्ध्वमुद्रामाह 7 पुनराचमनीयम्

1 वक्ष्यते ख 2 आराध्य ख 3 मूर्तिभेदे च कीर्तिताः ख ग
6 कंसाङ्कितो भागः क ग पुस्तयोर्नास्ति ।

दद्याद्भूषावसानं तु स्नानाद्यङ्गेषु कल्पयेत् ।
अङ्गानामायुधानां च मण्डलानां समर्चनम् ॥ ३४
विग्रहे देवदेवस्य विहितं गुरुभिः किल ।
तत् कुर्याद्वा न कुर्याद्वा परितोऽङ्गानि पूजयेत् ॥ ३५
स्नानान्तैर्भूषणान्तैश्च वैनतेयादिकान् क्रमात् ।
पूर्वं द्वार्यपरत्रापि[1] वैनतेयं समर्चयेत् ॥ ३६
चक्रं दक्षिणतोऽभ्यर्च्य गदामुत्तरतो यजेत् ।
कोणेषु शङ्खं देवस्य वामे शार्ङ्गं च पृष्ठतः ॥ ३७
दक्षिणे चेक्षुषी तत्र खड्गमप्यत्र[2] विन्यसेत्[3] ।
श्रियं दक्षिणतोऽभ्यर्च्य (पुष्टिमुत्तरतो यजेत् ॥ ३८
वनमालां पुरस्तात्तु तत्र श्रीवत्सकौस्तुभौ ।
लोकपालांश्च परितो वज्रादीनपि तद्बहिः ॥ ३९
विष्वक्सेनमथैशान्यां सङ्कल्प्य प्रणिपत्य च ।
गन्धेनैवमथाभ्यर्च्य)[4] पुष्पैर्देवं जितादिना ॥ ४०
सम्पूज्य हृदयादीनि परिवारांश्च नामभिः ।
भूयो व्यस्तेन मूलेन समस्तेन च तं यजेत् ॥ ४१
हृदयादीनि चाङ्गानि कौस्तुभान्तानि पूजयेत् ।
ततः परमबीजेन[5] पूजयेत्तं सनातनम् ॥ ४२
हृदयादीनि चाङ्गानि सम्पूज्य कुसुमैः शुभैः ।
धूपदीपौ क्रमाद्दत्वा निवेद्यं च विधानतः ॥ ४३
वह्नावपि समाराध्य मन्त्रै-रेभिः क्रमाद्धुनेत् ।
मूलेनाष्टोत्तरशतमष्टाविंशतिमेव वा ॥ ४४
अष्टौ वा हृदयादीनामङ्गानां च दशांशतः ।

---

1 पूर्वं ध्वजरूपेण पृष्ठे वाहनरूपेण । 2 अपि शब्दात्खेटकम्
5 प्रणवेन

---

3 वामे तु खेटकम् क ग 4 कंसाङ्कितो भागः क, ग पुस्तकयोर्नास्ति

कृत्वैवं विकिरे[1]च्छिष्टहविषा परिषद्बलिम् ॥ ४५
ततः प्रदक्षिणीकृत्य नमस्कृत्य प्रसाद्य च ।
आचम्याचमनं दत्वा विष्वक्सेनाय कल्पयेत् ॥ ४६
निर्माल्यं सकलं तस्मै तन्मन्त्रेण यथाविधि ।
गन्धपुष्पैर्धूपदीपैस्ताम्बूलान्तैः समर्चयेत् ॥ ४७
जप्त्वा स्तुत्वा प्रदायार्घ्यं क्षमस्वान्तं जितादिना ।
उद्वास्य हृदये देवं पुष्पाद्यैः स्वतनुं यजेत् ॥ ४८
पुराऽऽवाहनमप्युक्तमागच्छान्तं जितादिना ।
उभयं[2] विहितं तेन[3] गायत्र्यैवोभयं क्वचित् ॥ ४९
नार्चयेन्मुकुलैर्जी-र्णैस्तथा पर्युषितैरपि ।
केशकीटविमिश्रैश्च पतितैः पात्र[4]बर्जि-तैः[5] ॥ ५०
पुष्पैरन्योपहारै[6]श्च सदो-षै[7]र्दोषदूषितैः[8] ।
अज्ञानात् पूजिते देवे दोषः स्याद्यत्र कुत्रचित् ॥ ५१
प्रायश्चित्तं प्रकुर्वीत तत्र तद्दोशशान्तये ।
उद्वासनं न कुर्वीत स्थावरस्या[9]र्चनाविधौ ॥ ५२
परिवारैर्विना तत्र पूजनं कीर्तितं बुधैः ।
आवाहनविसर्गाभ्यां परिवारैः सहार्चनम् ॥ ५३
बहुवी[बे]रे तु विहितमिति भेदो बुधैर्मतः ।
एवमुद्देशतः प्रोक्त (मुभयत्रार्चनं क्रमात् ॥ ५४
इति संक्षेपतः प्रोक्त)[10] मर्चनं सर्वसिद्धिदम् ।
एतद्वै साधकः कृत्वा सर्वान् कामानवाप्नुयात् ॥ ५५

इति क्रियासारे (सप्तदशः) वैष्णवे सप्तमः पटलः

---

2 आवाहनमुद्वासनं च जितन्तेन गायत्र्या वा 5 गृहीत्वा हस्त एव स्थापितैः 7 सदोषैरन्यैरर्घ्याद्युपहारैः 8 ब्रह्महत्यादिदोषदूषितैः पूजकैः

1 विधिव ग 3 तत्र क ग 4 पत्र क ग 6 चारैः क ग
9 स्थापितस्या क ग 10 कंसाङ्कितो भागः ख पुस्तके नास्ति

अष्टमः पटलः

उत्पातेषु च जातेषु प्रायश्चित्तम् समाचरेत्[1] ।
प्रायश्चित्तं यथा दोषं प्रवक्ष्येऽहं समासतः ॥ १
प्रायो विनाश इत्युक्तश्चित्तं सन्धानमुच्यते ।
विनाशस्य तु सन्धानं प्रायश्चित्तं प्रकीर्तितम् ॥ २
दोषेषु सत्सु देवोऽत्र सान्निध्यं न करिष्यति ।
तस्मात्तत्परिहारार्थं प्रायश्चित्तं समाचरेत् ॥ ३
निमित्तेषु च[2] जातेषु न कुर्यात् पूजनं[3] विभोः ।
अकृत्वा निष्कृतिं सम्यक् कृत्वा निष्कृतिमर्चयेत् ॥ ४
पूजालोपो निमित्तानां निमित्तं तु महत्तरम् ।
तथापि तां[4] यथान्यायं कृत्वैवार्चनमाचरेत् ॥ ५
वितानाग्निनिभं बिम्बं विद्यादित्यागमोदितम् ।
सायं प्रातर्यथा[5] तत्र होमः कार्योऽर्चनं तथा ॥ ६
प्रतिष्ठादिवसादूर्ध्वमिति चाहुर्मनीषिणः ।
एवं विधायाः पूजायाः लोपो नात्र भविष्यति ॥ ७
यथा तथाऽखिलम् कुर्यादृदेशिकः परमार्थवित् ।
निमित्ताः पतनाद्याश्च स्वेदहासादयस्तथा ॥ ८
श्वस्पृष्टिप्रसवाद्याश्च विज्ञेया बहुदोषदाः ।
तेषु जातेषु तच्छांतिं कुर्यादृदेशिकसत्तमः ॥ ९
स्थाने दुष्टे भुवः शुद्धिः कार्या बिम्बस्य चाप्यथ ।
बिम्बे दुष्टेऽथ बिम्बस्य शुद्धया[6] शुद्धिर्भविष्यति ॥ १०

---

4 निष्कृतिं । 6 भुवः अपि ।

---

1 समारभेत् ख 2 षूप- क 3 कार्या पूजना क 5 तथा क ग

महद्भूहुषु चोग्रेषु निमित्तेषु विशेषतः ।
निमित्तेष्वल्पमल्पेषु सद्यो वा यत्र निष्कृतिः ॥ ११
बिम्बपीठगृहालिन्दप्राङ्गणेषु यथायथम् ।
खननादिविधिं कुर्याद्यथादोषबलाबलम् ॥ १२
खननं हरणं दाहः पूरणं गोनिवासनम् ।
विप्रोच्छिष्टं पञ्चगव्यं[1] सप्तैताः स्थानशुद्धयः ॥ १३
खादिरस्फ्येन चास्त्रेण[2] [3] खात्वा हस्तादिमानतः ।
सदोषानखिलान् पात्रे[4] हृत्वा[5] पांसून् बहिः क्षिपेत् ॥ १४
कुशदर्भादिभिर्दग्ध्वा तद्भस्मादिपुनर्हरेत् ।
सुमृद्भिः पूरयेद्गर्तं हस्तिपादैश्च याज्ञिकैः ॥ १५
गोमूत्रसिक्तमाकोट्य विप्रपादोदकैस्तथा ।
गां निवास्याशयेद्विप्रान् पायसं वैष्णवान् बहून् ॥ १६
तदुच्छिष्टे हृते सिञ्चेद्गव्यैश्च विकरैः किरेत् ।
स्थानशुद्धिरियं प्रोक्ता बिम्बशोधनमुच्यते ॥ १७
क्षाळनप्लावनस्नानमार्जनानि यथाक्रमम् ।
धारावगाहनं पश्चादभिषेकोऽत्र सप्तमः ॥ १८
क्षाळनं दर्भमृत्त्वग्भिस्तूष्णीं तोयैश्च शोधनम् ।
गन्धपुष्पाक्षतोपेतैरमन्त्रैः[6] प्लावनं जलैः ॥ १९
सकूर्चैर्द्रव्यसंयुक्तैर्मन्त्रवत् स्नानमम्बुभिः ।
पात्रे यथोक्तमापूर्य तोयैर्मन्त्रैः प्रपूज्य च ॥ २०
कूचाग्रैः प्रोक्षयेद्बिम्बं मन्त्रैस्तदिह मार्जनम् ।
संस्थाप्य धान्यराशिस्थ[7]मैशान्यां लोहसंभवम्[8] ॥ २१
वारुणं पात्रमापूर्य सकूर्चैः सलिलैः शुभैः ।

---

3 अस्त्रमन्त्रेण । 8 सुवर्णादि ।

---

1 च गव्यं च क ग 2 राख्येन चास्त्रेण क ग 4 पात्रैः क ग
5 कृत्वा ख 6 रमन्त्रं ख 7 कूर्चस्थ क ग

मत्स्यौ कूर्मौ च सौवर्णौ राजतौ च विनिक्षिपेत् ॥ २२
समृणाळां सपुष्पां च पद्मिनीं क्षाळितां तथा ।
[नि]क्षिप्य[1]पूजयेत्तत्र तीर्थमामाह्य वैष्णवम् ॥ २३
पालाशादिलिपादस्थं धारापात्रं तु लोहजम् ।
सहेमच्छिद्रमापूर्य सकूर्चं प्रतिमोपरि ॥ २४
धाराऽच्छिद्रा च कर्तव्या याममात्रं दिने दिने ।
समन्त्रं वारुणात् पात्रात् तोयं हृत्वाऽत्र[2] पूरयेत् ॥ २५
पञ्चोपनिषदो जप्त्वा वाग्यतैर्दर्भपाणिभिः ।
स्पृशद्भिः पात्रमव्यग्रैर्ध्यायद्भिर्विष्णुमव्ययम् ॥ २६
पौरुषं पावमानं च सूक्तमन्यच्च वैष्णवम् ।
संहिता वाऽखिला ह्येषां कार्योऽत्राद्यन्तयोर्जपः ॥ २७
धारान्ते[3] पूजयेद्देवमुद्वास्य वरुणं पुनः ।
सञ्छाद्यार्चां सुवासोभिर्दर्भैरथ समन्ततः ॥ २८
संस्थाप्य याज्ञिकैः काष्ठैः कृत्वा पात्रं प्रमाणतः ।
गव्यैर्द्रव्यैस्तैः समस्तैश्च गन्धोदान्तैर्यथाक्रमम् ॥ २९
दिने दिने[4] यथान्यायं कर्तव्यमवगाहनम् ।
पञ्चकुम्भांश्च संस्थाप्य सकूर्चान् सूत्रवेष्टितान् ॥ ३०
गन्धपुष्पाक्षताम्भोभिः पञ्चोपनिदैः[5]क्रमात् ।
सपल्लवमुखान् न्यस्य चक्रिकांश्च सतण्डुलान् ॥ ३१
सम्पूज्य वाससाऽऽवेष्ट्य तैरेव ह्य[6]भिषेच[भिमन्त्र]येत् ।
पञ्चभिः स्नाप[7]येद्देवमभिषेकविधिः स्मृतः ॥ ३२
शुद्धावेवं कृतायां वै होमकर्म समाचरेत्[8] ।

---

3 त्रिदिनधारान्ते । 4 क्रमात सप्तसु दिवसेषु ।

---

1 वरुणं ख 2 तु क ग 5 सम्पूर्णान्युपदट् क ग 6 त्व क ग
7 र्मन्त्र क ग 8 समारभेत् ख

पारायणं[1] प्रकुर्वीत निमित्तार्थानुसारतः ॥ ३३
मण्डपे शोधितेवह्निं संस्कृत्य गुरुमूर्तिपाः ।
कृत्वा चाग्निमुखं पक्वं गायत्र्याऽऽज्याहुतीः क्रमात् ॥ ३४
पञ्चभिस्त्रिसहस्राज्यं ततोऽष्टाक्षरविद्यया[2] ।
समित्सर्पिर्वीहितिललाजानां च सहस्रकम् ॥ ३५
द्वादशोर्ध्वशतं साज्यं व्याहृतीभिः पलाशजम् [जा] ।
समित् सावित्रिया पश्चाद[3]ष्टोत्तरशतं पृथक् ॥ ३६
क्षीरं दधि तथा क्षौद्रं घृतं पूर्णां पृथक् पृथक् ।
एवं सर्वे ततो हुत्वा होमशेषं समापयेत् ॥ ३७
सम्पातकलशाम्भोभिरभिषिञ्चेद्गुरुः स्वयम् ।
ततः स्नानादिकं कर्म कुर्यादुत्सवपश्चिमम् ॥ ३८
पतनादिषु दोषेषु प्रायश्चित्तमिदं भवेत् ।
अद्भुतेषु निमित्तेषु ऐशान्यां दिशि देशिकः ॥ ३९
अग्निसंस्कृत्य विधिवत् पक्वं गायत्रिया हुनेत् ।
पञ्चभिर्द्वादशाष्टार्णगायत्रीजितपौरुषैः[4] ॥ ४०
चतुर्विंशतिशश्चाज्यं शतशो वा सहस्रशः ।
हुत्वाऽऽज्यान्तरितैरे तैर्जुहुयात्तावदेव[5] तैः[6] ॥ ४१
अपामार्गसमिच्छिन्ना [मृतसमित्] सहैन्द्री भद्रिकाञ्जलिः ।
दूर्वासिद्धार्थकव्रीहियवास्तिलहविर्घृतम् ॥ ४२
एभिरेवं ततो हुत्वा ततः स्विष्टकृदादिकम् ।
हुत्वा होमं समाप्याथ स्नानाद्यं शेषमाचरेत्[7] ॥ ४३
एवं कृते तु नश्यन्ति दोषाश्चाद्भुतसम्भवाः[8] ।

---

1 पारं समाप्तिं अयते गच्छतीति तथा च आदित आरभ्यान्तमध्ययनं पारायणम् 4 पुरुषसूक्तस्य षोडशर्गभिः 5 पूर्वोक्ताज्यसमसंख्याकानि 6 पूर्वोक्तैर्मन्त्रैः । 7 उत्सवान्तं ।

2 जुहुयुः पञ्चवह्निषु ख 3 भूयः अ क ग 8 एतदर्धत्रयं ख पुस्तके नास्ति

श्वस्पृष्टां[1] शोधयित्वाऽर्चां बहुशो गव्यशोधिताम्[2] ।। ४४
शुद्धाद्भिस्त्वग्रसै[3]र्गन्धैस्तीर्थतोयैश्च शोधयेत्[4] ।
गोवासनं ततः कृत्वा ब्राह्मणान् भोजयेदथ ।। ४५
पुण्याहं वाचयित्वा तु कुर्यात् पारायणं तथा ।
इष्ट्वा देवं बलिं दत्वा कुर्याद्धोमं यथाविधि ।। ४६
अश्वत्थैः खदिरैः प्लक्षैः पालाशैः पाटलैर्वटैः ।
नारायणेन सूक्तेन[5] श्रीसूक्तेन तथैव च ।। ४७
अतो देवेति सूक्तेन नासदंहोमुचा तथा ।
संसमिद्युद्रपादेन तथाऽरायीत्यनेन च ।। ४८
गायत्र्या पञ्चभिश्चात्र होतव्यं विधिनैव तु ।
पक्वान्ते जुहुयादाज्यमेतैर्मूलेन तत्परम् ।। ४९
समिद्भि[6]रष्टसंयुक्तं शतं पूर्णां पृथक् पृथक् ।
शेषं समाप्य विधिवत् स्नपनाद्यं च[7] कार[8]येत् ।। ५०
भिन्ने तु कलशे पूर्णे स्नपनायाधिवासिते ।
पूरयित्वा[9]ऽपरे पात्रे तेना[10]वाह्य समर्चयेत् ।। ५१
अस्त्रेणाष्टशतं हुत्वा जपेत्तावदनन्तरम् ।
निमित्तानामियत्ता नो पुरुषाणां प्रमादतः ।। ५२
प्रायश्चित्तमतो वक्तुं सर्वेषां नैव शक्यते ।
तत्र तत्रानुरूपेण प्रायश्चित्तं विचक्षणः ।। ५३
गुरुलाघवमुद्वीक्ष्य कुर्या-द्देशिकसत्तमः ।
सामान्यां निष्कृतिं वक्ष्ये[11] समासात् सर्वकर्मसु ।। ५४

---

1 श्वस्पृष्टिप्रायश्चित्तमाह । 3 कषायैः ।
5 श्रीनारायणसूक्तेन पुरुषसूक्तेन वा । 6 पूर्वोक्तानामश्वत्थादी-
नामत्रोत्कर्षः । 9 शिष्टं । 10 तत्कलशपूरणमन्त्रेण

2–4 एतदर्धत्रयं ख पुस्तके नास्ति । 7 स्नानान्नाद्यांश्च क ग
8 कल्प- ख 11 सामान्या निष्कृतिः प्रोक्ता क ग

चतुर्गृहीतं जुहुयाद्व्याहृतीभिः पृथक् पृथक्[1] ।
अष्टाष्टसंख्यया पश्चात् पृथक् पूर्णां प्रदापयेत् ॥ ५५
प्रायश्चित्तेषु सर्वेषु स्नानमन्नाद्यमाचरेत् ।
प्रागादिकुण्डे नष्टेऽग्नौ[2] प्रायश्चित्तं वदाम्यहम् ॥ ५६
संशोध्यायतनं मूलकुण्डादग्निं विनिक्षिपेत् ।
परिसमुह्य परिस्तीर्य पर्युक्ष्याग्निं समर्च्य च ॥ ५७
आज्यस्य संस्कृतिं कृत्वा तथा स्रुक् स्रुवयोरपि ।
समिदेकां[3] समाधाय पयुक्ष्य च यथाविधि ॥ ५८
चतुर्गृहीतं जुहुयात् तत्र तत्रोक्तमन्त्रतः ।
व्याहृत्युपनिषद्भिस्तु स्रुवेण जुहुयाद्घृतम् ॥ ५९
दशात्मकं[4] हुनेन्मूले शेषं[5]कर्म समाचरेत् ।
दक्षिणाग्नावपि तथा मूलादेव विनिक्षिपेत् ॥ ६०
प्रायश्चित्तं हुनेत् प्राग्वत् मूले तद्वद्वा [तद्वद्] दशात्मकम्[6] ।
प्रत्यग्विनष्टे तद्वच्च मूलान्निक्षिप्य वै हुनेत् ॥ ६१
मनस्वतीस्तथान्यच्च[7] प्राग्वच्छेषं समाचरेत् ।
सौम्याग्नौ विलयं प्राप्ते मूलान्निक्षिप्य वै हुनेत् ॥ ६२
चतुर्गृहीतं तत्रापि शिष्टं चैव यथाविधि ।
हुत्वा दशात्मकं मूले तस्मिन्नष्टे वदाम्यहम् ॥ ६३
सौम्यान्निक्षिप्य मनसा गर्भाधानादि कल्पयेत् ।
मूलमष्टशतं हुत्वा पूर्णां दत्वाऽवशेषितम् ॥ ६४
पूरयेज्जपदानाभ्यामुभयत्र विनाशिते ।
स्वकुण्डे जनयित्वाऽग्निं जुहुयात् सर्वहोतृभिः ॥ ६५

---

1 एकेनैव चतुर्गृहीतेन छित्वा छित्वा एकया व्याहृत्या अष्ट, द्वितीयचतुर्गृहीतेन छित्वा छित्वा द्वितीयया व्याहृत्या अष्ट एवं क्रमेण
3 एकां समिधं 4 दशहोत्रात्मकम् 7 व्याहृत्युपनिषद्भिः हुत्वा

2 नष्टाग्नौ ख 5 शेषं ख 6 शांशकम् क

मूलमष्टशतं हुत्वा शेषकर्म समाचरेत् ।
तस्मात् सौम्ये विनिक्षिप्य प्रायश्चित्तं विधाय च ॥ ६६
दशात्मकैश्च[1] जुहुयान्मूलकुण्डे गुरुः स्वयम् ।
चतुर्गृहीतं[2] प्राक् प्रोक्तं पञ्चहोताऽथ दक्षिणे ॥ ६७
चतुर्होता तथा प्रत्यक् जुहुयोक्ता मनस्वती ।
षड्होता चोत्तरे चोक्ता वह्निनाशन[3]निष्कृतिः ॥ ६८
क्रियामध्येऽन्तरा गच्छेद्यदि तत्र मनस्वती ।
होतव्या कोणदेशे[4] तु सैवोक्ता[5] तत्र चोदितम्[6] ॥ ६९
विधिवत् सकलं मूले जुहुयाच्च दशात्मकम् ।
स्नपने च प्रतिष्ठायां सङ्कोचे जीर्णसंस्कृतौ ॥ ७०
तत्तद्धोमं प्रकुर्वीत तत्र तत्रोचितक्रमात् ।
प्रासादोत्तरतः कुण्डं कृत्वा लक्षणसंयुतम् ॥ ७१
तत्राग्निम् जनयेद्विद्वान् कुर्यादग्निमुखं ततः ।
गायत्र्या जुहुयात् पक्वं तत्त्वमन्त्रैर्घृतं हुनेत् ॥ ७२
अष्टोत्तरशतं वाऽपि अष्टाविंशतिरेव वा ।
अष्टौ वा शक्तितो हुत्वा[7] पृथक् पूर्णाहुतिं ददेत्[8] ॥ ७३
स्नपने च प्रतिष्ठायां सृष्टिमार्गेण होमयेत् ।
संहारक्रममास्थाय सङ्कोचादौ समाचरेत् ॥ ७४
प्रकृत्यादि पृथिव्यन्तं सृष्टिक्रम उदाहृतः ।
विपरीतस्तु संहारे स्थितिर्वै[9] मिश्रलक्षणा ॥ ७५
आदौ संहारमार्गेण हुत्वा चाज्यं सकृत् सकृत् ।

---

2 प्रागादि कुण्डेषु चतुर्गृहीतमन्त्रानाह पूर्वे पञ्चहोता, दक्षिणे चतुर्होता, पश्चिमे मनो ज्योतिः, उत्तरे षड्होता । 4 कोणकुण्डस्थाग्निनाशो
5 सैव– मनस्वती । 6 पूर्वोक्तं व्याहृत्युपनिषद्भिः घृतम् ।
9 प्रकृत्याद्युपस्थान्तं पृथिव्याद्याकाशान्तं चेति व्याख्यायां ।

---

1 त्मकं च क ग 3 नाशे तु क 7 तः कृत्वा क ग 8 हुनेत् क ग

पूर्णां प्रदाय जुहुयात् पुनः सृष्टिक्रमेण तु[1] ॥ ७६
अन्यत्र[2] विपरीतः स्याद्विधिरेषः प्रकीर्तितः ।
तत्त्वहोमेऽकृते मूलमन्त्रेण समिदादिकम् ॥ ७७
अष्टोत्तरशतं हुत्वा शेषं कुर्याद्यथाविधि[3] ।
हुत्वा स्विष्टकृदादीनि ततः शेषं समापयेत् ॥ ७८
सम्पाता [तो] च्छेषभस्मानि[4] कलशे तु समर्पयेत् ।
हुतमन्त्रांस्ततो जप्त्वा देवं तेनाभिषेचयेत् ॥ ७९
तत्त्वहोमः समासेन कथितश्चोभयत्र तु ।
सृष्टौ संहारमार्गेण कुर्यादुक्तेन वर्त्मना[5] ॥ ८०
समासान्निष्कृतिः प्रोक्ता कुर्याच्च स्नपनं ततः ॥ ८१

इति क्रियासारे (अष्टादशः) वैष्णवे अष्टमः पटलः

नवमः पटलः

अथ स्नानं प्रवक्ष्यामि संक्षेपेण हरेः क्रमात् ।
पूर्ववन्मण्डपं कृत्वा संस्कृत्य च यथाविधि ॥ १
अग्निम् संस्कृत्य विधिवत् गायत्र्याष्टोत्तरं शतम् ।
सम्पातविधिना हुत्वा कलशानधिवासयेत् ॥ २
ऐशान्यां न्यस्य कूर्चस्थं पात्रं सन्धूपितं महत्[6] ।
कूर्चं विन्यस्य[7] सलिलं दीक्षितः पूरयेच्छुभम् ॥ ३
गन्धपुष्पाक्षतान् न्यस्य गन्धादिभिरथार्चयेत् ।

---

2 संहारे ।

---

1 सृष्टिक्रमेण जुहुयात्पृथकपूर्णां प्रदाय च अयं श्लोकः क, गयोर्नास्ति 3 एतदर्धं ख पुस्तके नास्ति 4 दि क ग 5 अयं श्लोकः क, गयोर्नास्ति 6 क्षालितं धूपितं मुहुः क महत् ग 7 विन्यस्य तस्मिन् क ग

अष्टोत्तरशतं[1] भूयः[2] [3] सकूर्चममिमन्त्रयेत् ॥ ४
इमा आपः शिवा सन्तु शुभाः शुद्धाश्च निर्मलाः ।
पावनाः शीतलाश्चैव पूताः सूर्यस्य रश्मिभिः ॥ ५
जप्त्वैवं सलिलं भूयः पदानि परिकल्पयेत् ।
(संप्रोक्ष्य शोधितां वेदिमापोहिष्टादिभिस्त्रिभिः)
कलशस्यानुरूपेण रजोभिः पञ्चवर्णकैः ॥ ६
व्रीहीभिः पीठिकास्तासु कृत्वा दर्भान् विकीर्य च ।
कलशान् सादयेत् तेषु क्षेत्रात् पश्चिमतोऽथवा ॥ ७
क्षालितानस्त्रमन्त्रेण वर्मणा तेन वेष्टितान् ।
धूपितान् प्रणवेनैव न्यग्बिलान् सादयेत् पृथक् ॥ ८
पङ्क्तीकृत्य ततो दर्भान् विन्यसेत् परमेष्ठिना ।
सम्प्रोक्ष्य पुंसा गन्धोदैर्विश्वेन विकिरेत् पुनः ॥ ९
अक्षतैरक्षतान् सर्वान् निवृत्योत्तानयेत् पृथक् ।
सर्वेणोद्धृत्य गायत्र्या द्रव्यकुम्भान् न्यसेत् पृथक् ॥ १०
अन्यान् सर्वान् द्विषट्केन विन्यस्य प्रोक्षयेदथ ।
अष्टाक्षरेण कूर्चं तु तेन विन्यस्य पूरयेत् ॥ ११
विधिवत् पदगुप्तं यद्रहस्यं तद्गुरोर्मुखात् ।
ज्ञात्वा सर्वं प्रयत्नेन कलशान् पूरयेत् क्रमात् ॥ १२
द्रव्याणां देवतामन्त्रैर्द्रव्याण्येषु विनिक्षिपेत् ।
शुद्धाद्भिः[4] पूरयित्वाथ पल्लवैरुपशोभयेत् ॥ १३
पूरयेत् प्रथमं ब्राह्मे स्नानोदं विधिवद्गुरुः ।
मूलेन सर्वमूर्त्यङ्गपरिवारं हरिं स्मरन्[5] ॥ १४
गन्धैः पुष्पैस्तमाराध्य वस्त्राभ्यां परिवेष्टय च ।

---

1 वक्ष्यमाणमन्त्रं । 2 मूलमन्त्रजपानन्तरम् ।

3 हुत्वा ख 4 शुद्धये क 5 स्मरेत् क ख

ज्ञात्वा प्रणम्य तं प्रार्थ्य पूरयेदितरानपि ।। १५
दिग्विदिक्षु बहिस्तेषां[1] मध्येऽन्त[2]र्दिग्विदिक्षु च ।
पाद्यार्घ्याचमनं गव्यं घृतं दधि पयो मधु ।। १६
द्वादशार्णेन[3] चोष्णोदं कषायं मार्जनं फलम् ।
यवं रत्नं तथा लोहं कौशं गायत्रिया[4] क्रमात् ।। १७
गन्धपुष्पौपमानं च धात्रीमक्षतवारि च ।
नाळिकेरोदकं चेक्षुतोयं तण्डुलबार्यपि ।। १८
अष्टाक्षरेण[5] सम्पूर्य पल्लवैरुपशोभयेत् ।
चक्रमन्त्रेण विन्यस्येच्चक्रिकाश्च सतण्डुलाः ।। १९
वासोभिर्वेष्टयित्वाऽथ दर्भान् न्यस्याक्षतैः किरेत् ।
अष्टाक्षरेण संप्रोक्ष्य स्वमन्त्रैः पूरयेदथ ।। २०
पञ्चविंशतिरेतद्धि केवलं द्रव्यपूरितम् ।
शुद्धोदकान्विते पक्षे चतस्रो वीथयः क्रमात् ।। २१
कोणे चतुष्कं नवकं मध्ये दिक्षु त्रिकत्रयम् ।
एकादशपुटे चैवसेकोनार्धशते पदम् ।। २२
कोणेषु नवकं मध्ये पञ्चविंशतिभिर्लिखेत् ।
पञ्चत्रिकत्रयं दिक्षु त्रयोदशपुटेऽर्च्चयेत् ।। २३
एकाशीतावृदं प्रोक्तमष्टोत्तरशतं ब्रुवे ।
नवभिः पङ्कजं मध्ये त्रिकं दिक्ष्वेकमन्यतः[6] ।। २४
दिक्षु कोणेषु तन्मध्ये नवकं चाष्टकं त्रिकम्[7] ।
क्षेत्रे मान्य[8]पुटे चैवं पदयुक्तं शते घटे ।। २५
षट्कं[9] चतुष्कं दिक्कोणेष्वन्तस्थनवकेऽम्बुजम् ।
नवकं[10] चाष्टकं षट्कं दिक्कोणेष्वन्तरा क्रमात् ।। २६

---

1 बहिर्दिग्विदिक् कलशेषु अन्तराळेषु । 2 अन्तर्दि-विके ।
3 दिग्विदिक्षु । 4 अन्तराळेषु । 5 वैविके । 6 कोणेषु ।
7 बहिः मानुष दिक्षु नवकं कोणेषु अष्टमन्तराळेषु त्रिकं 8 पञ्चदश
9 दैवे । 10 मानुषे

क्षे-त्रे साज्य[1]पुटे चैवं षट्पञ्चाशोत्तरे शते ।
क्षे-त्रे धान्य[2]पुटे पञ्चविंशद्भिर्मध्यतोऽम्बुजम् ॥ २७
दशकं[3] दिक्षु कोणेषु चतुष्कं नवकं[4] बहिः ।
कोणेषु पञ्चदशक दिक्षु षटकं च मध्यतः[5] ॥ २८
केवलं द्विशते चैवं[6] पदं पदविदो जगुः ।
नवकं चैव तैः[7] सम्यक् पञ्चविंशति[8] कल्पयेत् ॥ २९
मध्यस्थ[9]नवकें पद्ममेतत्सप्तदशाधिकम् ।
क्षेत्रे पात्र[10]पुटे दिक्षु नवकं मध्यतोऽम्बुजम् ॥ ३०
बहिः कोणेषु नवकं दिक्षु द्वादशकत्रयम्[11] ।
द्विपञ्चाशोत्तरे चैवं पदमुक्तं शतद्वये ॥ ३१
क्षेत्रे गोलपुटे पञ्चविंशद्भिर्मध्यतोऽम्बुजम् ।
दशकं दिक्षु कोणेषु त्रिकमन्तर्बहिः पुनः ॥ ३२
कोणेषु सप्तदशकं दिक्षु पञ्चकृतिर्भवेत् ।
तन्मध्ये दशकं प्रोक्तं त्रिंशतैवं[12] पदं भवेत्[13] ॥ ३३
क्षेत्रे धीर[14]पुटे पञ्चविंशद्भिर्मध्यतोऽम्बुजम् ।
ततश्च सप्तदशकं दिक्ष्वष्टासु[15]प्रकल्पयेत् ॥ ३४
कोणे षोडशकं ब्राह्मे दिक्षु[16] पञ्चकृतित्रयम् ।
एवं पञ्चशतं वक्ष्ये सहस्रकलशैः पदम् ॥ ३५
क्षेत्रे धाम्ल[17] [18]पुटे वीथीस्ततः सप्तपुटान्तरे ।
चतस्रो मार्जयेन्मध्ये नवकैः पङ्कजानि तु ॥ ३६

---

1 सप्तदश 2 एकोनविंशति 3 दैविके 4 बहिः कोणेषु नवकं
5 अन्तराळेषु 7 एकोनविंशतिपुटैरेव 8 पञ्चविंशतिनवकानि
10 एकविंशति 11 व्याख्यायां पञ्चविंशत्युत्तरशतद्वये पदमुक्तम्
12 सन्धिरार्षः 14 एकोनत्रिंशत् 15 दैविके 16 दिक्षु–मध्ये पार्श्वयोः (अन्तराळे) च आहृत्य पञ्चविंशतित्रयम् 17 एकोनचत्वारिंशत्

---

6 चैव ख 9 मध्यस्थं क ख 13 तैः सम्भवेत् पदम् ख
18 धर्मे क ग धाम ख

कृत्वा मध्यगतैः पञ्चविंशद्भिर्मण्डलं लिखेत्[1] ।
लुम्पेच्छिष्टानि दिक्पद्मदलगैः शोडशैर्घटैः ॥ ३७
सार्धं कुम्भसहस्रेण स्नापयेद्विधिना प्रभुम् ।
द्रव्यैरमीभिर्मन्त्रैश्च श्रद्धाभक्तिसमन्वितः ॥ ३८
पाद्यादिक्रमशो[2] वक्ष्ये द्रव्यं संक्षेपतोऽधुना ।
दूर्वाश्यामाकपद्मानि विष्णुक्रान्ती[3]ति पाद्यकम् ॥ ३९
सिद्धार्थमक्षतांश्चैव कुशाग्रं तिलमेव च ।
यवं गन्धं फलं पुष्पमर्घ्यमष्टाङ्गमुच्यते ॥ ४०
लवङ्ग[4]जातीतक्कोलमाचामं चेन्दुसंयुतम् ।
अश्वत्थौदुम्बरब्रह्मवटबिल्वविकङ्कतैः ॥ ४१
सशमीखदिरैः कुर्यात् कषायं मार्जनं ब्रुवे ।
सहा निशा सदाभद्रा शिरीषं सूर्यवर्तिनी ॥ ४२
कुशाग्रं मार्जनं प्रोक्तं कदळीनाळिकेरजम् ।
आम्रं धात्री सपनसं दाडिमं भव्यबिल्वकं ॥ ४३
फलोदकमिदं वक्ष्ये रत्नोदं[5] लोहवारि[6] च ।
वज्रमौक्तिकवैडूर्यपद्मरागप्रवाळकैः ॥ ४४
सुवर्णं रजतं ताम्रमायसं त्रपुकं पुनः ।
सेव्यार्त्यम्बुजटास्त्रायोमुरशीतै[7] [8]श्च गन्धकम् ॥ ४५
जातीस्त्रीमल्लिकाकुन्दनन्द्यावर्ताब्जचम्पकैः ।
यूथिकाबकुळाभ्यां च कर्तव्यं कुसुमोदकम् ॥ ४६

---

1 एकोनपञ्चाशत् पदयुतेषु पञ्चविंशतिखण्डेषु मध्ये पञ्चविंशतिभिः पद्मं कृत्वा शिष्टानि वीथ्यां योजयेत् । अवशिष्टेषु मध्ये नवभिः पद्मं लिखेत् बाह्यदिक्पद्मदलेषु चत्वारि चत्वारि योजयेदेवं कृते १+४१×२४=९८५+१६=१००१ भवन्ति 5 वज्रादि रत्नोदं 6 सुवर्णादि लोहोदकं 8 सेव्यं– लामञ्चं, आर्तिः – कुष्ठं, अम्बु – इरुवेल्ली, जटा – जटामांसी, अस्त्रं – कुङ्कुमः, अयः – अगरु, शीतं – चन्दनः

2 क्रमतो ख 3 पर्णी ख 4 ङ्क क ग 7 नीतैः क ग

शङ्खारिताक्ष्यकूर्मैस्तु हेम[1]जैरौपमानिकम् ।
मृगमांसीयुतं धात्रीफलं चामलकोदकम् ॥ ४७
शालीपिष्टं निशाचूर्णं हेमरत्नाक्षतानि च ।
स्नानोदकमिदं पूर्वं मध्ये कुम्भे प्रपूरयेत् ॥ ४८
द्रव्याणां देवता वक्ष्ये मन्त्रांश्च स्नपने पुनः ।
पितरः श्रीसरस्वत्यौ दक्षविष्णूशने[2]न्दवः ॥ ४९
इन्द्रार्कयमविश्वाख्याः[3] कुबेरो[4] वायुरप्यजः ।
वसवश्चापि सावित्री पाद्यादिद्रव्यदेवताः ॥ ५०
गन्धर्वो वरुणस्ताक्ष्यो भूमिर्निर्ऋतिरेव वा ।
श्रीधरश्च नृसिंहोऽधमुखो[5] मध्ये परः पुमान् ॥ ५१
एवं सम्पूर्य सम्पूज्य सम्मार्ज्यालिप्य सर्वतः ।
विन्यस्याङ्कुरपालाणि मङ्गलानि समन्ततः ॥ ५२
दिक्षु होमांश्च विधिवत् कुर्युर्मूर्तिधराः[6] क्रमात् ।
आधिवासनिकान् सर्वान् पूर्वोक्तेन[7] क्रमेण तु ॥ ५३
सम्पाताज्येन संस्पृश्य समभ्यर्च्याभिमन्त्रयेत् ।
बद्धाञ्जलिरिमं देवं ध्यात्वा मन्त्रं जपेद्गुरुः ॥ ५४
शुद्धा भवन्त्विमे कुम्भाः सकुशाः सपिधानकाः ।
वातातपपरीताश्च शुभलक्षणसंयुताः ॥ ५५
पञ्चविंशतिधा विष्णोस्तत्वभेदेन तिष्ठतः ।
द्रव्येयत्ताश्रयाः सर्वाः सङ्गच्छन्तां विभूतयः ॥ ५६
शास्त्रोदितमिदं चास्तु स्नपनं देवनिर्मितम् ।
अनेन स्नपनेनास्तु प्रसन्नो भगवान् हरिः ॥ ५७
इत्युक्त्वाऽन्यै कृतानुज्ञो मूर्ति-पैः सहितो गुरुः ।

---

2 शुक्रः । 3 विश्वेदेवाः । 5 अष्टगन्धादि देवताः।

1 लोह ग 4 कुमारो ख 6 कुर्यात् मूर्तिधरः ख
7 कां पूर्वनिर्दिष्टेन ख

सम्पूज्य देवं विधिवत् तत्वानि न्यस्य सादरम् ॥ ५८
आवाह्य सकळीकृत्य दत्वाऽर्घ्यं पाद्यमेव च ।
आचामं च ततो दूर्वाः साक्षताः मूर्ध्नि पादयोः ॥ ५९
प्रणवेन न्यसेद्देवं नीराज्य स्नापयेत् क्रमात् ।
पाद्यार्घैः खण्डशो देवं नीराज्यासाद्य सादरम्[1] ॥ ६०
सावशेषमवस्राव्य मन्त्रान् तन्त्रोदितान् ब्रुवे ।
इदं विष्णु[2]र्हिरण्यवर्णा आपोहिष्ठा प्रजापते ॥ ६१
तेजोसीति दधिक्राव्ण आप्यायस्व तथा मधु ।
अथाकृष्णेन[3] चाश्वत्थे भद्रं कर्णेभिरेव च ॥ ६२
गणानां वायवायाहि ब्रह्मजज्ञानमित्यपि ।
उपत्वाग्ने च[4] देवस्य बहिर्मन्त्राः प्रकीर्तिताः ॥ ६३
विष्णोरराटं[5] तत्वा च सुवर्णं स्योनापृथिव्यपि ।
शन्नो या दिव्या यासां च परोमात्रेति दैविके ॥ ६४
अन्तरा[6] स्नानमुद्दिष्टं ब्रह्मसूक्तेन[7] चैव हि ।
अथ सप्तदशद्रव्यैः स्नानं वक्ष्ये समासतः ॥ ६५
घृतमुष्णोदकं रत्नं फलं लोहं च मार्जनम् ।
गन्धाक्षतयवोदांश्च पूरयेन्मध्यतः क्रमात् ॥ ६६
पाद्यार्घ्याचमनं गव्यं [चामगव्याज्यं] दधि क्षीरं मधूनि च ।
कषायं दिग्विदिक्ष्वेभिर्वाह्यतश्चेतरानपि ॥ ६७
शुद्धोदैश्च क्रमाद्भूयः स्वमन्त्रैस्तान् प्रपूरयेत् ।
द्रव्याणां देवता[8] वक्ष्ये स्नानमन्त्रक्रमं तथा[9] ॥ ६८

---

2 इदं विष्ण्वादि मधुवातान्ताः पाद्याद्यष्टद्रव्यमन्त्राः ।
3 आकृष्णेनेत्यादि देवस्यत्वेत्याद्यन्ता मन्त्राः उष्णोदकाद्यष्टद्रव्यमन्त्राः ।
5 विष्णोरराटमित्यादि गन्धाद्यष्टद्रव्यदेवताः ।
6 मध्ये । 7 ब्रह्मकलशो अतो देवेति सूक्तेन ।

---

1 एतदर्धं क, ग पुस्तकयोः नास्ति 4 ति क ग
8 तां क ख 9 ततः ख

विष्णुः सहस्रकिरणो ब्रह्मा[1] कुबेरो वसवस्तथा ।
विश्वेदेवाश्च गन्धर्वा निर्ऋत्यार्यै पितृश्रियौ ॥ ६९
वाग्दक्षशुक्रसोमेन्द्रयमाः शान्त्यादयः क्रमात् ।
ऋचः पुरुषसूक्तस्य इदं विष्णुरिति क्रमात् ॥ ७०
स्नानमन्त्राः क्रमेणोक्ताः स्नानक्रममथो[2] ब्रुवे ।
पाद्यार्घ्याचामगव्याज्यदधिक्षीरैः सकौसुमैः ॥ ७१
क्वाथेन दिग्विदिक्ष्वन्तःस्थितैरप्यभिषेचयेत् ।
एभिः सप्तदशद्रव्यैः पञ्चविंशतिसंख्यया ॥ ७२
एकोनार्धशतेनापि एकाशीत्या शताष्टभिः ।
नवकं दिक्षु मध्ये च कोणे षोडशकानि च[3] ॥ ७३
एवं सप्तदशद्रव्यैः स्नानमष्टशतैः स्मृतम्[4] ।
संस्नाप्य विधिवद्देवं सम्यगाराधयेद्गुरुः ॥ ७४
गुरुं सम्पूजयेत् पश्चात् मूर्तिपानितरानपि ।
उत्सवश्चापि कर्तव्यस्ततो वित्तानुसारतः ॥ ७५
उत्सवं विधिवत् कुर्वन्[5] सर्वसम्पदमाप्नुयात् ।
सर्वसम्पत्करं पुण्यं स्थानशुद्धि[6]करं परम् ॥ ७६

इति क्रियासारे (एकोनविंशः) वैष्णवे नवमः पटलः

दशमः पटलः

अथोत्सवविधिं वक्ष्ये देवदेवस्य चक्रिणः ।
कारकस्यानुकूले तु नक्षत्रे[7] तिथिसंयुते[8] ॥ १

7 श्रवणादि 8 द्वादश्यादि

1 ब्रह्म ख 2 स्नानानि क्रमतो ख 3–4 एतदर्धद्वयं ख पुस्तके नास्ति 5 कुर्यात् ख 6 वृद्धि क

शुभयोगे च देवस्य यात्रां सङ्कल्प्य चोदितः[1] ।
सप्तमान्नवमाद्वाऽपि पञ्चमाद्वा शुभेऽहनि[2] ॥ २
प्राक् शुभेऽहनि कुर्या-द्वै मङ्गलाङ्कुरारोपणम्[3] ।
संस्थापयेद्ध्वजं चाग्रे पताकागरुडान्वितम् ॥ ३
अष्टदिक्षु ध्वजानष्टौ संस्थाप्याभ्यर्चयेदिमान् ।
कुमुदं कुमुदाक्षं च पुण्डरीकं च वामनम् ॥ ४
शङ्कुकर्णं सर्वनेत्रं सुमुखं सुप्रतिष्ठितम् ।
ग्रामसंस्कारमखिलं कृत्वा शोभासमन्वितम् ॥ ५
पूजाङ्गैरखिलै-र्देवमाराध्य गरुडध्वजम् ।
रात्रौ भूतबलिं कुर्यात् नानाभक्षसमन्वितम् ॥ ६
वादित्रैरखिलैर्युक्तं गानैः क्ष्वेलैश्च दीपकैः ।
कौतुकं देवमाराध्य न्यस्त्वा शिष्यस्य मूर्धनि ॥ ७
स्वस्ति जप्त्वा बहिर्गत्वा द्वारपालावथार्चयेत् ।
पाद्याचमनगन्धाद्यैराराध्याथ बलिं हरेत् ॥ ८
स्वनाम्ना प्रणवाद्येन नमोन्तेन यथाक्रमम् ।
तत्र तत्र बलिं दद्यात् पार्षद्भ्यः पार्श्वमण्डले ॥ ९
भूतक्रूरसमायुक्तहविषा परिषदां[4] बलिम् ।
चण्डाय च प्रचण्डाय गरुडायाग्रमण्डपे ॥ १०
पृष्ठे नन्ताय विघ्नाय शिवाय द्वारि दक्षिणे ।
दिगीशेभ्यः क्रमाद्दत्वा ब्रह्मणे शर्वसन्निधौ ॥ ११
अनन्ताय च नैर्ऋत्यां मातृभ्यो दक्षिणे क्रमात् ।
वीरभद्राय विघ्नाय तासां सव्यापसव्ययोः[5] ॥ १२
ब्रह्माणी चैव माहेशी कौमारी वैष्णवी तथा ।

---

5 मातृणां दक्षिणवामयोः

---

1 चाग्रतः ख 2 द्वादशात्तु वा ख 3 मङ्गलाङ्कुरारोपः स्यात् स्थानवृद्धिकरं परं क ग 4 पार्षदां क

वाराही चैव माहेन्द्री चामुण्डा[1] मातरः क्रमात् ॥ १३
ताः समाराध्य तेभ्योऽथ बलिं दत्वा च पार्षदाम् ।
एभिर्मन्त्रैस्ततस्तस्य बलिं दद्यात् क्रमेण तु ॥ १४
मातृभ्यो लोकमातृभ्यः सर्वमातृभ्य इत्यपि ।
सर्वमातृगणेभ्यश्चेत्येभिरासां बलिं हरेत् ॥ १५
नानारूपेति चेच्छन्ति तत्र केचिद्बलिं[2] बुधाः ।
शास्त्रे भूताधिपतये विष्णुपारिषदे नमः[3] ॥ १६
यमराक्षसयोर्मध्ये शास्त्रे दद्याद्बलिं बुधः ।
वायव्यामथ दुर्गायै वायुसोमान्तरे पुनः ॥ १७
षण्मुखस्य बलिं दद्याद्धनदस्यापि केचन ।
सोमावसाने केचित्तु वदन्ति धनदार्चनम् ॥ १८
विष्वक्सेनाय दद्याच्च सोमेशानान्तरे बलिम् ।
सर्वत्र तत्पार्षदेभ्यो बलिमिच्छन्ति साधकाः ॥ १९
चक्रपाणिं शङ्खपाणिं पूजयेद्द्वारि गोपुरे ।
ताभ्यां तत्र बलिं दत्वा बहिर्गच्छेत् प्रयत्नवान्[4] ॥ २०
श्रीभूम्योश्च बलिं दत्वा बहिर्गच्छेत् प्रयत्नवान्[5] ।
अष्टदिक्षु क्रमात् ध्यात्वा कुमुदादीन् प्रपूज्य च ॥ २१
तेभ्यः क्रमात् बलिं दद्यात् सर्ववाद्यसमन्वितम् ।
तत्र तत्र प्रयत्नेन नृत्तं गानं च कल्पयेत् ॥ २२
तत्पार्श्वमण्डले भूयः पञ्चाशद्गणमर्चयेत् ।
तेभ्यो दत्वा बलिं पश्चाद्बलिपीठे बलिं हरेत् ॥ २३
विष्णुपारिषदान् सर्वान् बलिपीठे प्रकल्प्य च ।
देवादिभ्यो[6] बलिं दद्यादष्टदिक्षु प्रसन्नधीः[7] ॥ २४

2 केचिन्नानारूपेति मन्त्रेणेत्यन्वयः । 3 शास्त्रे मन्त्रविशेषमाह ।
6 देवग्रहादिभ्यः ।

1 चामुण्डी ख 4 अर्धं ख पुस्तके नास्ति
5–7 अर्धं क, ग पुस्तकयोर्नास्ति

देवाश्चैवासुराश्चापि गन्धर्वा यक्षसंज्ञकाः ।
पितरश्चापि नागाश्च राक्षसाश्च पिशाचकाः ॥ २५
एते ग्रहाश्च विज्ञेया अष्टदिक्षु क्रमात् स्थिताः ।
एतेषां च बलिं दत्वा क्षेत्रपालाय चोत्तरे ॥ २६
सर्वेषां च बलिं दत्वा बलिपीठे[1] समापनम् ।
इष्टं गुरूणां केषांचिद्यथेष्टं कर्तुमर्हति[2] ॥ २७
अहन्यपि बलिं दद्याच्छेषेषु दिवसेषु च ।
यात्रापूर्वदिने रात्रौ दद्याच्चैव महाबलिम् ॥ २८
पार्षदैः[3] सहितान् सर्वान् सग्रहां[4]श्च समाहित.[5] ।
कुमुदादीन् समभ्यर्च्य ग्राममध्ये बलिं हरेत् ॥ २९
गणेभ्यश्च ग्रहेभ्यश्च चत्वरेषु प्रदापयेत् ।
मण्डलेषु ग्रहेभ्यश्च जयनाद[6]समन्वितम् ॥ ३०
विष्णुपारिषदेभ्यश्च प्रमथे[7]भ्यो नमो नमः ।
मातृभ्यस्तद्गणेभ्यश्च सर्वेभ्यो वै नमो नमः ॥ ३१
अनेन सर्वतो दत्वा बलिशेषं समाप्य च[8] ।
अन्तः प्रविश्य तं देवं देवे सम्यङ्नियोजयेत् ॥ ३२
मण्डपे स्वस्तिके शय्यामास्तरेत् समलङ्कृते ।
न्यसेदङ्कुरपात्राणि मङ्गलानि समन्ततः ॥ ३३
स्नात्वा शय्यां समाराध्य देवं सम्प्रार्थयेद्गुरुः ।
तीर्थयात्रा त्वया देव श्वः कर्तव्या सुरेश्वर ॥ ३४
तत्र प्रतिसरा[9]रम्भं त्वमनुज्ञातुमर्हसि ।
इति विज्ञाप्य देवेशं मूर्ति-पैः सहितो[10] गुरुः ॥ ३५

---

1 क्षेत्रपाले महाबलिपीठे वा बलिसमापनं ऐच्छिकम् । 2 आचार्यः ।
3 क्षेत्रपालबलिदानात् पूर्वं । 8 क्षेत्रपाले ।

---

4 समग्रम् क ग 5 सतः ख 6 यजनादि ग 7 प्रथमे क ग
9 समा- क ग 10 कारयेत् क ग

घृतारोपणपत्रेषु[1] मङ्गलादर्शनादिकम् ।
दर्शयित्वा चामरार्घैर्वीजयेन्मङ्गलान्वितम् ॥ ३६
ऊर्णामयेन सूत्रेण क्षौमवस्त्रयुतेन च ।
अङ्गुष्ठानामिकाभ्यां तु सारयित्वा जितादिना ॥ ३७
देवस्य दक्षिणे हस्ते बध्नीयात् कौतुकं बुधः ।
कौतुके हरिमाराध्य शय्यायां तन्निवेश्य च[2] ॥ ३८
गुग्गुल्वगरुधूपार्घैर्धूपं दत्वा समर्च्य च ।
रात्रिशेषं समासीत अनिर्वाणप्रदीपकैः[3] ॥ ३९
आचार्यः प्रातरुत्थाय स्नात्वा जप्त्वा यथाविधि ।
हरिमाराध्य विधिवत् पिष्टचूर्णानि कारयेत् ॥ ४०
हरिद्रामुद्गसम्मिश्रैर्मार्षशालीयवादिभिः ।
हेमादिलोहचूर्णैस्तु युक्तं पात्रे विनिक्षिपेत् ॥ ४१
पिष्टचूर्णेन विधिवद्विमृज्य प्रतिमां ततः ।
तच्चूर्णं मूर्ध्नि विप्रादिभक्तानां मूर्ध्नि पातयेत्[4] ॥ ४२
प्रतिमां परिमृज्याथ भक्तानां मूर्ध्नि निक्षिपेत्[5] ।
गन्धचूर्णैश्च विमृजेत् प्रतिमां वैष्णवीं बुधः ॥ ४३
संस्नाप्याराध्य विधिवद्धोमं कुर्याद्यथाविधि ।
कृत्वा चाग्निमुखं पक्वं गायत्र्या चात्र होमयेत् ॥ ४४
शाकुनस्वस्तिसूक्ताभ्यां हुत्वा चाज्याहुतीः क्रमात् ।
समिदाज्यचरूनाज्यं[6] मूलेनाष्टोत्तरं शतम् ॥ ४५
अष्टोत्तरशतं पूर्णां दत्वा होमं समापयेत् ।
सम्पाताज्येन संस्पृश्य देवमाराध्य पूजयेत्[7] ॥ ४६
हुत्वा शेषं समाप्याथ सम्पाताज्येन सेचयेत्[8] ।

---

2 प्रासादाभिमुखम्

---

1 मन्त्रेण ग 3 प्रदीपकम् क ग 4 सार्धपद्यं ख पुस्तके नास्ति
5-8 अर्धं क, गपुस्तकयोर्नास्ति 6 न्द्रव्यं क ग 7 पद्य मिदं ख पुस्तके नास्ति

पुण्याहं वाचयित्वाऽथ प्राप्तानुज्ञो द्विजोत्तमैः ॥ ४७
पीठे विन्यस्य कर्मार्चां कार्यं विज्ञापयेच्छनैः ।
कर्मार्चा तीर्थयात्रार्थं तवेयं कल्पिता हरे ॥ ४८
तीर्थयात्रां कुरुष्वास्यां संक्रम्यानुग्रहाय नः ।
ततः संहृत्य कर्मार्चामुत्पाद्य विधिपूर्वकम् ॥ ४९
तस्यामावाहयेद्देवं पञ्चोपनिषदैः क्रमात् ।
आवाहितमनुस्मृत्य दत्वाऽर्घ्यं प्रतिपूज्य च ॥ ५०
सदशेन नवेनैव वस्त्रयुग्मेन वेष्टयेत् ।
सोष्णीषः सोत्तरीयश्च कृतन्यासः समाहितः ॥ ५१
दक्षिणेन तमादाय पाणिना वाग्यतः स्वयम् ।
द्वाराभ्याशं समासाद्य कुर्यान्मङ्गलवाचनम् ॥ ५२
जगन्निर्माणसंहारस्थित्यनुग्रहहेतवः ।
देवनामीश्वरा देवा मङ्गलं प्रदिशन्तु नः ॥ ५३
विष्णुर्ब्रह्मा च रुद्राश्च प्रचण्डश्चण्ड एव च ।
गरुत्मान् वृषभश्चैव मङ्गलं प्रदिशन्तु नः[1] ॥ ५४
इन्द्रश्चाग्निर्यमश्चैव निर्ऋतिर्वरुणस्तथा ।
वायुर्वैश्रवणेशानौ मङ्गलं प्रदिशन्तु नः ॥ ५५
वराहनारसिंहौ च रामश्रीधरवामनाः ।
हयास्यवासुदेवौ च मङ्गलं प्रदिशन्तु नः ॥ ५६
पुरुषो निर्ऋतिश्चैव सिंहो नारायणाच्युतौ ।
अनिरुद्धो हरिः कृष्णो[2] मङ्गलं प्रदिशन्तु नः ॥ ५७
कुमुदः कुमुदाक्षश्च पुण्डरीकोऽथ वामनः ।
शङ्कुकर्णः सर्पनेत्रः सुमुखः सुप्रतिष्ठितः ।
देवदौवारिकाश्चैते मङ्गलं प्रदिशन्तु नः ॥ ५८
अष्टोत्तरसहस्रं तु देव[3] पारिषदेश्वराः ।

---

1 अयं श्लोकः क, ग पुस्तकयोर्नास्ति । 2 श्चैव क ग 3 विष्णु ख

अनुपारिषदाश्चैव मङ्गलं प्रदिशन्तु नः ॥ ५९
भूलोकभुवर्लोकाद्याः सप्तलोकाश्च कीर्तिताः ।
सागराश्च तथा सर्वे मङ्गलं प्रदिशन्तु नः ॥ ६०
तथा पाताळलोकाश्च रुद्रलोकाः सुरोपिताः ।
दिक्षु सर्वासु तिष्ठन्तो मङ्गलं प्रदिशन्तु नः ॥ ६१
वेदाश्चाप्युपवेदाश्च सेतिहासाः कथा अपि ।
षडङ्गानि च शास्त्राणि मङ्गलं प्रदिशन्तु नः ॥ ६२
सर्वे विघ्नेश्वराश्चैव ये दिव्या ये च मानुषाः ।
दिव्यान्तरिक्षभूमिस्थाः मङ्गलं प्रदिशन्तु नः ॥ ६३
धारो [धरो] ध्रुवश्च[1] सोमश्च आपश्चैवानलोऽनिलः ।
प्रत्यूषश्च प्रभासश्च मङ्गलं प्रदिशन्तु नः ॥ ६४
यज्ञाश्च पञ्चयज्ञाश्च पाकयज्ञास्तथैव च ।
सर्वे एते महायज्ञा मङ्गलं प्रदिशन्तु नः ॥ ६५
कुमार्यश्च कुमाराश्च गणेशाश्च विनायकाः ।
सिद्धाश्च किन्नराश्चैव मङ्गलं प्रदिशन्तु नः ॥ ६६
मृगव्याधश्च शर्वश्च निर्ऋतिश्चाज एकपात् ।
अहिर्बुध्न्यः पिनाकी च भवनाथेश्वरस्तथा ।
स्थाणुर्भवश्च पापारिर्मङ्गलं प्रदिशन्तु नः ॥ ६७
धाताऽर्यमा च मित्रश्च वरुणोंऽशु[2]र्भगस्तथा ।
इन्द्रो विवस्वान् पूषा च पर्जन्यस्त्वष्टृविष्णवः ।
एते वै द्वादशादित्या मङ्गलं प्रदिशन्तु नः ॥ ६८
यवक्रीतश्च क्रीतश्च अर्वावसुविभावसू ।
कक्षीवान् नारदः कण्वो मङ्गलं प्रदिशन्तु नः ॥ ६९
दृषद्गुह्यमहद्गुह्यपरिव्राजास्तथैव च ।
एकद्वित्रिसमाख्याता मङ्गलं प्रदिशन्तु नः ॥ ७०

---

1 तारा ग्रहाश्च क ग 2 शः ख

कश्यपोऽत्रिर्वसिष्ठश्च भरद्वाजोऽङ्गिरास्तथा ।
कौशिको भगवांश्चैव[1] मङ्गलं प्रदिशन्तु नः ॥ ७१
आलवो [आवहो] विहवश्चैव उद्वहः सुभग [सुवह] स्तथा ।
परि[वाहा] भादा विभा [हा] वाश्च मङ्गलं प्रदिशन्तु नः[2] ॥ ७२
मङ्गलान्ते द्विजाः सर्वे वदेयुश्च तथास्त्विति ।
गेहं प्रदक्षिणीकृत्य ततो गच्छेद्बहिः पुनः ॥ ७३
उदकुम्भं हविश्छत्रं यागोपकरणानि च ।
प्ररोहघटिकाश्चान्ये धारयेयुर्द्विजोत्तमाः ॥ ७४
बहिर्निर्गत्य घोषेण महता वाग्यतः स्वयम् ।
वाहनं गरुडं ध्यात्वा पूजयित्वाऽधिरोप्य तम्[3] ॥ ७५
गच्छेत्तु योजनादर्वाङ्नदीं वाऽन्यजलाशयम् ।
दिङ्मन्त्रेण बहिःसालं[4] कृत्वा पूर्वं प्रदक्षिणम् ॥ ७६
गच्छेयुर्वाग्यताः सर्वे सोत्तरीयाः स्वलङ्कृताः ।
तोरणाभ्यन्तरं गत्वा मण्डपं तीर्थपार्श्वतः ॥ ७७
वेदीं परिश्रितां कृत्वा पीठे देवं नियोजयेत् ।
दत्वा पाद्यादि सर्वेण तमादाय नदीं व्रजेत् ॥ ७८
वारिणा[5] तीर्थमावाह्य वैष्णवं तत्र पावनम्[6] ।
तीर्थे त्रिधा निमज्यास्मिन् मन्त्रेण परमेष्ठिना ॥ ७९
निवेद्य[7] पी-ठे दत्वाऽर्घ्यं पाद्यमाचमनं तथा ।
आपोहिष्ठादिभिः प्रोक्ष्य पञ्चभिश्च[8] समाहितः ॥ ८०
तमादाय पुनर्मज्जेत्तोये कृत्वाऽघमर्षणम् ।
तत्र स्नानं महत्पुण्यं सर्वपापहरं विदुः ॥ ८१
पी-ठे निवेश्य वस्त्रे द्वे परिधाय च वै स्वयम् ।

---

4 प्राकारं । 5 शङ्खस्थेन । 8 पञ्चतत्त्वैः ।

---

1 सप्तैते दिव्यमुनयः क ख 2 अयं श्लोकः क, ग पुस्तकयोर्नास्ति
3 ताम् क ग 6 पार्श्वतः ख 7 निवेद्य ख

आचम्य तु कृतन्यासः पूजयेद्विधिना प्रभुम् ॥ ८२
आज्ययुक्तं निवेद्यं च दत्वाऽस्मै विधिपूर्वकम् ।
तीर्थेऽस्मिन् वैष्णवे पुण्ये स्नातोऽसि पुरुषोत्तम ॥ ८३
अतस्त्वमनुगृह्णीष्व स्वस्थानोपाश्रयेण नः ।
इति प्रार्थ्य तमादाय पूर्ववद्ब्राह्मणं नयेत् ॥ ८४
तमादाय यथापूर्वं प्रासादमशनै[1]-[2]र्नयेत् ।
यात्राह्येव गृहं प्राप्य देवे[3] देवं नियोजयेत् ॥ ८५
तोये सगन्धपुष्पे तं[4] [5] बुद्ध्यावाह्य समन्त्रकम् ।
मूलबिम्बे यथा न्यायं सर्वेण[6] [7] प्रतिरोपयेत् ॥ ८६
यात्रादावन्ततश्चैवमावाहनविधिः स्मृतः ।
सकलीकृत्य देवेशमाराध्य विधिपूर्वकम् ॥ ८७
रात्रौ भूतबलिं दद्यात् स्नानं कुर्यात् परेऽहनि ।
इति संक्षेपतः प्रोक्तं प्रतिष्ठादि क्रियाक्रमम्[8] ॥ ८८
यदत्राविहितं तन्त्रो य[9]दत्राधिकमीरितम् ।
कुर्युः सर्वं समं सन्तः श्रेयस्तेभ्यो नमो नमः[10] ॥ ८९

इति क्रियासारे (विंशः) वैष्णवे दशमः पटलः

---

2 शीघ्रम् । 5 नियोजनक्रमं आह । 7 पञ्चतत्वैः ।
8 क्रियाक्रमो यस्मिन् तत्तन्त्रम्

---

1 प्रासादान्तः शनै ख 3 देव ख
4 तोयेन गन्धपुष्पैश्च ख 6 मन्त्रेण ख ग 9 त ग
10 अयं श्लोकः ख पुस्तके नास्ति

शंकरनारायणभागः

प्रथमः पटलः

नमः शिवाय शान्ताय सगणायादि हेतवे ।
रुद्राय विष्णवे तुभ्यं ब्रह्मणे सूर्यमूर्तये[1] ॥ १
स्थापनं[2] सम्यगाख्यातं शम्भुविष्णोः पृथक् पुरा ।
इदानीं सहितं[3] वक्ष्ये एकत्वं गतयोस्तयोः ॥ २
एकस्य स्थापनादेव पुरुषार्थचतुष्टयम् ।
सिद्ध्यत्येव न सन्देह उभयोश्चेत् किमुच्यते ॥ ३
इतोऽधिकं न शक्तानां हितं तस्माद्ददामि तम् ।
शक्त्या[4]ऽऽगमान् समुद्वीक्ष्य सारमुद्धृत्य केवलम् ॥ ४
विशेषेण यदत्रोक्तं तदेव कथयाम्यहम् ।
गौरीरमापतिं यस्तु भक्तः स्थापितुमुद्यतः ॥ ५
स पूर्वं गुरुमासाद्य वरयेन्मूर्ति-पैः सह ।
दीक्षाभिषेकसंशुद्धं शास्त्रज्ञं लक्षणान्वितम् ॥ ६
निर्दोषं तपसा युक्तं श्री[5]मन्तं रोगवर्जितम् ।
पाद्यार्घ्यैः[6] पूजयित्वा च शक्त्या दत्वा च दक्षिणाम् ॥ ७
वरयेत् कार्यमुक्त्वाऽथ पाणावालम्ब्य पाणिना ।
इमं मन्त्रं समुच्चार्य प्रणिपत्याभिवाद्य च ॥ ८
मया सम्पूजितैरत्र दक्षिणाभिश्च तोषितैः ।
हरीशयागः क्रियतां प्रार्थयामि प्रसीदतु ॥ ९

---

6 पूर्वोक्तहृदयादिमन्त्रो योजनीयः

---

1 एषः श्लोकः ख पुस्तके नास्ति । 2 स्थापितं क ग
3 सङ्गतो क 4 शीक्षा क 5 ह्रीं ख

मूर्तिपानपि[1] सम्प्रार्च्य ततस्तैः कर्म कारयेत् ।
सोऽपि भूमिं परीक्ष्यादौ गृह्णीयाच्छुभलक्षणाम् ॥ १०
प्राकारान्तं प्रकल्प्यात्र भूतक्रूरबलिं हरेत् ।
विज्ञापयेत्ततः सर्वान् कृतरक्षः कृताञ्जलिः ॥ ११
भूतानि राक्षसा वाऽपि यत्र तिष्ठन्ति केचन ।
ते सर्वेऽप्यपगच्छन्तु स्थानं कुर्यां ह[2]रीशयोः ॥ १२
इति विज्ञाप्य भूतादीन् पुष्पमन्त्रेण [मस्त्रेण] वै क्षिपेत्[3] ।
संशोध्यास्त्रेण गुल्मादीन् बहुशः कर्षयेत् क्षितिम् ॥ १३
मात्वा दिशं तु विज्ञाय दिक्षु शङ्कून्निखानयेत् ।
अस्त्रेणाराधितांनेतान् तेन सूत्रं प्रसारयेत् ॥ १४
एवं संगृह्य तां भूमिं कृत्वाऽऽदौ [कृष्ट्वादौ] मन्त्रतः स्वयम् ।
बीजानि निवपेत्तेन सिञ्चेद्वारिभिरञ्जसा ॥ १५
कृत्वैवं गुह्यमन्त्रेण[4] ईशाद्येन[5]वृत्तिं ततः ।
वक्त्राद्येन[6] पशुभ्योऽर्धं दद्यादन्यद्[7]द्विजाय वै ॥ १६
मूलमन्त्रेण वा सर्वमेतत् कुर्याद्विचक्षणः ।
सुमुहूर्ते खनेद्भूमिं गर्तं कृत्वाऽथ वेदिकाम् ॥ १७
तस्यां वास्तुबलिं कृत्वा[8] ततः संशोध्य चावटम् ।
रत्नहेमादिकं मध्ये न्यस्त्वा कूर्मशिलां न्यसेत् ॥ १८
शिलाभिरिष्टकाभिर्वा गर्तं सम्पूर्य यत्नतः[9] ।
गर्तं क्षितिसमे पूर्णे विन्यसेत् प्रथमेष्टकाः[10] ॥ १९
द्वारस्य दक्षिणे भागे वह्निं निक्षिप्य चोत्तरे ।
कृत्वा चाग्निमुखं चेध्मं जुहुयान्मूलविद्यया ॥ २०

---

1 शर्वाय विष्ण्वाने नमः, रुद्राय मधुसूदनात्मने नमः इत्यादि मूर्तिमन्त्रा ज्ञेयाः 5 हों षों नमः पराय ईशानाय परमेष्ठ्यात्मने नमः इत्यनेन 6 द्वितीयेन । 7 अन्यदर्धं ।

2 कुर्याद्ध क- ग 3 रेचयेत् ख 4 गुह्यमन्त्रैश्च क ग
8 दद्यात ख 9 रयेत्ततः ख 10 काम् ख

आघारावाज्यभागौ च जुहुयात् प्रणवेन च ।
मूलार्णैर्जुहुयादाज्यं पञ्चं गायत्रिया हुनेत् ॥ २१
गुह्यमन्त्रैर्घृतं हुत्वा (समिदाज्यचरून् घृतम् ।
गायत्र्याऽष्टशतं हुत्वा[1]) पृथक् पूर्णां च मूलतः ॥ २२
ततश्च जुहुयादाज्यं व्याहृतीन्द्रादिभिः क्रमात् ।
अग्नये चैव सोमाय ग्रहेभ्योऽपि यथाक्रमम् ॥ २३
नक्षत्रेभ्यश्च भूतेभ्यो नागेभ्यश्चेति देशिकः ।
सर्वाभ्यो देवताभ्यश्च विश्वेदेवेभ्य इत्यपि ॥ २४
मूलव्याहृतिभिः पश्चात् ततः स्विष्टकृदादिकम् ।
हुत्वा होमं समाप्याथ सम्पातं तासु[2] सेचयेत् ॥ २५
स्थित्वा पूर्वमुखो ध्यात्वा मूलमष्टावरं जपेत् ।
वह्निस्थं देवमुद्वास्य[3] ततो वह्निं समर्चयेत् ॥ २६
अग्न्यादीशावसानं तु मूलार्णैर्विन्यसेच्च ताः ।
न्यस्त्वैवमिष्टकाः पश्चात् मध्ये गर्तं[4] यथा भवेत् ॥ २७
कलशैः पूरितैरद्भिर्गर्तं सम्पूरयेत्ततः ।
पुष्पाक्षतानि निक्षिप्य तारेणावर्तमीक्षयेत् ॥ २८
शस्तं तु[5] दक्षिणावर्तं वामावर्तं[6] हुनेद्घृतम् ।
मूलेनाष्टोत्तरशतं सम्पातं तत्र[7] सेचयेत् ॥ २९
शाल्यादिक्षेत्रमृत्साभिर्गर्तं सम्पूरयेत्ततः ।
सर्वत्रोक्तेन मार्गेण गर्भाधानं प्रकल्पयेत् ॥ ३०
प्रासादं लक्षणोपेतं शिल्पिभिः कारयेद्दृढम् ।
गोपुराद्यखिलैर्युक्तं प्रासादस्यानुरूपतः ॥ ३१
कृत्वा बिम्बं यथान्यायं ततः कर्म समारभेत् ॥ ३२

इति क्रियासारे (एकविंशः) हारीशे प्रथमः पटलः

2-3-7 इष्टकासु 6 अशस्तं तत्र

---

1 कंसाङ्कितो भागः क ग पुस्तयोर्नास्ति 4 गर्भो क ग 5 तत् ग

राष्ट्रिय संस्कृत संस्थान
जयपुर परिसर, जयपुर
पुस्तकालय
क्रमांक... 15291

द्वितीयः पटलः

दीक्षितस्याधिकारोऽस्मिन् (वक्ष्ये दीक्षां समासतः ।
मूलशास्त्रानुसारेण साधकानां हिताय वै ॥ १
कृत्वा शुचौ समे देशे मण्डपं लक्षणान्वितम् ।
स्कीतां वेदिं विधायैवं[1]) शोधयेन्मार्जनादिभिः ॥ २
मण्डलं संलिखेत्तत्र रजोभिः पञ्चवर्णकैः ।
प्राक् प्रत्यक् सूत्रमास्फाल्य मध्यं कृत्वाऽथ पार्श्वयोः ॥ ३
अङ्कौ कृत्वा समं ताभ्यां मत्स्यौ दक्षिणसौम्ययोः ।
लाञ्छ[2]येन्मध्यमाक्रम्य तयोः सूत्रं तु पातयेत् ॥ ४
मण्डलार्धेन मानेन दिक्षु तेष्वथ लाञ्छयेत् ।
कोणमत्स्यं लिखेत्ताभ्यां द्वाभ्यां द्वाभ्यां क्रमेण तु ॥ ५
तेषु सूत्राणि चास्फाल्य भक्त्वा[3] षोडशधा समम् ।
समन्ततः क्षिपेत्तेषु सूत्राण्यास्फालयेत्ततः ॥ ६
षट्त्रिंशद्भिर्लिखेन्मध्ये पङ्कज लक्षणान्वितम् ।
पीठं पङक्त्यैकया बाह्ये तत्र कोष्ठानि मार्जयेत् ॥ ७
त्रीणि कोणेषु पादार्थं दिक्षु चात्वारि मार्जयेत् ।
वीथीं सङ्कल्प्य पङक्तिभ्यां द्वाभ्यां द्वाराणि दिक्षु वै ॥ ८
शोभोपशोभयुक्तानि गुणरेखास्तु तद्बहिः ।
चत्वारि मार्जयेद्बाह्ये[4] द्वारार्थं द्वयमन्ततः ॥ ९
त्रीण्येकमन्तरारभ्य उपशोभार्थमन्यथा ।
अन्तस्त्रीणि बहिस्त्रीणि कोणे कोणेऽथ मार्जयेत् ॥ १०
भद्रकं चैवमालिख्य मध्ये पङ्कजमालिखेत् ।

---

1 कंसाङ्कितो भागः क, ग पुस्तकयोर्नास्ति
2 लाज ख 3 भक्त्या ख 4 द्वाभ्यां क ख

भ्रामयेदम्बुजक्षेत्रं कोणसूत्रे लिखेत्ततः ॥ ११
भागार्ध[1]द्वादशांशं तु त्यक्त्वा सम्भ्राम्य मध्यतः ।
शिष्टं चतुर्धा विभजेद्भ्रामयेच्च समं यथा ॥ १२
कोणादिसूत्रयोर्मध्यं लाञ्छये[2]द्दलसन्धिगम् ।
तेषु सूत्रं प्रसार्याथ दळानि परितो लिखेत् ॥ १३
दळसन्ध्यन्तराळेन सूत्रेण दळगेन च ।
दळाग्रं व्योममानेन पार्श्वतोत्थेन[3] संलिखेत् ॥ १४
दळानि परितो लिख्य दळं चाङ्गुलमानतः ।
रेखा सितेन रजसा क्षिपेदङ्गुलमानतः ॥ १५
रजोभिः पूरयेत् पश्चात् कर्णिकादि यथाक्रमम् ।
कर्णिकां पीतवर्णेन केसराण्यसितस्तथा ॥ १६
मध्यं रक्तेन सम्भूष्यमग्राणि सितबिन्दुना ।
भूषयेच्छुक्लवर्णेन[4] दळानि परितः क्रमात् ॥ १७
कोणानि रक्तवर्णेन पीठकोणं सितं भवेत् ।
गात्राणि रक्तवर्णेन श्यामाश्च दलसन्धयः ॥ १८
लतादिभिरलङ्कृत्य वीथीं द्वाराणि पूरयेत् ।
शुक्लेन[5] रक्तवर्णेन शोभां पीतेन चेतराम्[6] ॥ १९
कोणानि कृष्णवर्णेन तत्र शङ्खान् लिखेच्छुभान् ।
पूरयेद्गुणरेखाश्च तत्तद्वर्णैर्यथाक्रमम् ॥ २०
एवं मण्डलमालिख्य तत्र देवेशमर्चयेत् ।
अङ्गावरणसंयुक्तमागमोक्तेन वर्त्मना ॥ २१
भक्त्या परमया युक्त अखिलैरुपहारकैः ।
स्तुत्वा देवमनुज्ञाप्य ततः शिष्यांस्तु दीक्षयेत् ॥ २२
स्नातानुपोषितान् शान्तानाहूयाग्रे निवेश्य च ।

5 शुक्लेन द्वाराणि, शोभां रक्तवर्णेन । 6 इतरामुपशोभां पीतेन ।

1 र्धं ख 2 लाजये ख 3 पार्श्वस्थेन ख 4 वर्णानि क ख

अस्त्रेणार्घ्यजलैः प्रोक्ष्य रजसा[1] हृदि ताडयेत् ॥ २३
विश्लिष्टबन्धनं ध्यात्वा[2] ततस्तत्वानि शोधयेत् ।
पञ्चभूतमयान्येव सर्वतत्वानि[3] कल्पयेत् ॥ २४
तानि पादे[4] च नाभौ च हृदि कण्ठे च तालुके[5] ।
स्वमण्डलस्थैः स्वैर्बीजैर्हृदयादिभिरन्वितैः ॥ २५
वर्मान्तैः संहरेद्विद्वान् पृथिव्यादिक्रमेण तु ।
तत्तत्स्थानेन संयुक्तं कण्ठे वायौ समीरणम् ॥ २६
तालुमध्यगते व्योम्नि शान्त्यतीतेऽथ संहरेत् ।
तं व्योमव्यापिषु वैणैव ? [मार्गेण][6] व्योमस्थं परिकल्पयेत् ॥ २७
उद्घातावृत्तिभि[7] [8]स्तानि मूलेना[9]न्त्यं विशोधयेत् ।
पञ्चभिश्च चतुर्भिश्च त्रिभिर्द्वाभ्यां सकृत् क्रमात् ॥ २८
ततः सम्प्रोक्ष्य त[10]द्देहं[11] वायुना शोष[12]येद्गुरुः ।
सन्दहेद्वह्निना भूयः प्लावयेदमृतेन तु ॥ २९
विश्वं सुधामयं ध्यात्वा तस्मिन् शक्तिं तु पार्थिवीम् ।
कल्पयेद्बुद्बुदं तस्मादुद्भूतं भावयेत् ततः ॥ ३०
बुद्बुदान्तस्तनुं ध्यायेद्दिव्यं तद्हृदयेऽम्बुजम् ।
ध्यात्वा तार[13]मयं तस्मिन् चैतन्यं व्योमगं स्मरेत् ॥ ३१
विभक्तेन्द्रियसंस्थानं वृद्ध्याऽब्देनाण्डभेदनम् ।
द्यावापृथिव्यौ शकले जातं तारात्मकं स्मरेत् ॥ ३२
प्रणवेन च सम्प्रोक्ष्य स्वहस्ते सकलं विभुम् ।
साङ्गं सम्पूज्य गन्धाद्यैस्तस्य मूर्धनि तं न्यसेत् ॥ ३३
मूलाङ्गैः सकलीकृत्य नेत्रे बध्वा सुवाससा ।

---

1 भस्मना । 3 तस्य देहस्थानि । 4 शिष्यस्य । 5 भ्रूमध्ये इति नारायणः । 6 सुषुम्ना मार्गेण । 7 प्राणायामावृत्तिभिः । 9 व्योममूलेन – प्रासादेन । 11 शिष्यदेहम् ।

---

2 धृत्वा ख 8 तवृत्तिभिः क ग 10 तं ख
12 शोध क ग 13 काश ख

करौ सम्मृज्य मूलेन गन्धपुष्पैः प्रपूरयेत् ॥ ३४
तं प्रवेश्य यथान्यायं करं दत्त्वा स्वयं गुरुः ।
प्रदक्षिणं नयित्वाऽग्रे प्राङ्मुखं स्थापयेत्ततः ॥ ३५
कल्पान्तार्कसहस्राभं ध्यात्वा देवं सनातनम् ।
जानुभ्यामवनिं गत्वा तूष्णीं माल्यानि निक्षिपेत् ॥ ३६
तं नेत्रावरणं मुक्त्वा पुष्पपातं[1] विलोकयेत् ।
अमन्त्रमर्चनं तेन कारयेच्च स्वयं गुरुः ॥ ३७
सम्प्रार्थ्य देवदेवेशं तमग्नेः सन्निधिं नयेत् ।
स्वस्य दक्षिणतो न्यस्य दर्भपाणिं तु वाग्यतम् ॥ ३८
पुरैव संस्कृते वह्नौ तत्वानां तु शतं शतम् ।
जुहुयात् सर्पिषा पूर्णां गायत्र्यैव हुनेत् पृथक् ॥ ३९
मन्त्राण्येवं समुद्धृत्य होमकर्म समाचरेत् ।
उद्धरेत् प्रणवं पूर्वं भूतबीजानि[2] चाङ्गयुक् ॥ ४०
भूतानां नाम सम्बुद्ध्या निवृत्यादिकलाः पुनः ।
आत्मान्ताः स्वाहया[3] युक्तास्तैस्तत्वानि क्रमाद्धुनेत् ॥ ४१
चत्वारि व्योम नादेन[4] बीजेनान्यत्समं भवेत् ।
एवं तत्वानि संशोध्य[5] जीवात्मानं परं[6] नयेत् ॥ ४२
सर्वपापैर्वि-निर्मुक्तं सर्वदोषै र्विवर्जितम् ।
निर्वृतं[7] परमानन्दे ध्यायन् पूर्णाहुतिं ददेत् ॥ ४३
समिदाज्यचरूनाज्यं मूलेनाष्टशतं पृथक्[8] ।
हुत्वा पूर्णाहुतिं दत्वा अस्त्रेणाष्टोत्तरं शतम् ॥ ४४
प्रायश्चित्तार्थमाज्येन शान्त्यर्थं प्रणवेन च[9] ।

---

3 ओं ह्लां पृथिवि निवृत्त्यात्मने स्वाहा इत्यादि चत्वारि ।
4 ओं ह्रौं आकाश शान्त्यतीतात्मने स्वाहा । 5 हुत्वा ।
6 परमात्मानम् । 7 सुखैकरूपं । 9 अष्टशतम् ।

---

1 पात्रं क ग 2 लिङ्गानि ख 8 ष्टोत्तरं शतम् ख

ततः स्विष्टकृदादीनि ततः शेषं समापयेत् ॥ ४५
गुरवे दक्षिणां शक्त्या दत्वाऽन्यान् शक्तितोऽर्चयेत् ।
भूयो गुरुश्च तं शिष्यं शिक्षयेच्चाभिषेचयेत् ॥ ४६
रत्नहेमाक्षताम्भोभिर्गन्धपुष्पफलैर्युतम् ।
कलशं मूलमन्त्रेण पूरयित्वा यथाविधि ॥ ४७
आवाह्य कलशे तस्मिन्नर्चयेद्विधिना प्रभुम् ।
मूलमष्टसहस्रं तु जप्त्वा तेनाभिषेचयेत् ॥ ४८
होमान्ते वह्निमुद्वास्य मण्डलस्थं विसृज्य च ।
चण्डसेनं च सम्पूज्य तमुद्वास्याभिषेचयेत् ॥ ४९
शिष्यस्य विहितं सद्भिर्निर्वाणाय फलाप्तये ।
इति संक्षेपतः प्रोक्ता दीक्षा शास्त्रानुसारतः ॥ ५०
रक्षणीया प्रयत्नेन दस्युभ्यस्तन्त्रगौरवात् ॥ ५१

इति क्रियासारे (द्वार्विंशः) हारीशे द्वितीयः पटलः

तृतीयः पटलः

दीक्षां विधाय शिष्यस्य प्रतिष्ठां तत्र चारभेत् ।
उत्तरे त्वयने शुक्ल[1]पक्षे पुण्यर्क्षवासरे ॥ १
सुतिथौ स्थापयेद्देवं प्राक्कुर्यादङ्कुरार्पणम् ।
अनुकूले दिने कर्तुर्नवमे सप्तमेऽह्नि वा ॥ २
बीजानि क्षाळयित्वाऽद्भिः पयसा मूलमन्त्रतः ।
मूलेन बीजवपनं वैष्णवोक्तमथेतरत्[2] ॥ ३

2 बलिदानादिकं ।

1 शुक्ले- क ख ग

ध्वजं संस्थापयेदग्रे वैनतेयवृषाङ्कितम् ।
सन्मन्त्रमुच्चार्य[1] तयोः वृषाय गरुडात्मने ॥ ४
तौ तत्रावाह्य सम्पूज्य गन्धपुष्पैर्बलिं हरेत् ।
संशोध्य कर्मशालायाः प्राग्भागं मार्जनादिभिः ॥ ५
शक्त्यालङ्कृत्य कर्मार्चां नीत्वा[2] नयनमोक्षणम् ।
कृत्वा शिल्पिकरादर्चां गृह्णीयाच्छुभलक्षणाम्[3] ॥ ६
आचार्यो मन्त्रदेहस्तु स्पृशेत्तारेण पादयोः ।
संक्षाळ्य तोयैरालिप्य मध्वाज्याभ्यां समन्ततः ॥ ७
दर्भैस्त्वग्भिश्च सङ्घृष्य मृद्भिश्च क्षाळयेज्जलैः ।
गन्धपुष्पैरलङ्कृत्य उपतिष्ठेत् स्वयं गुरुः ॥ ८
नमस्तेऽर्चे सुरेशानि प्रतीकें विश्वकर्मणः ।
प्रभाविताशेषजगद्धात्रि तुभ्यं नमो नमः ॥ ९
त्वयि सम्पूजयामीशौ शम्भुनारायणौ सदा ।
रहिता योनिदोषैस्त्वमृद्धियुक्ता सदा भव[4] ॥ १०
इति पुष्पं विकीर्याग्रे[5] बध्नीयात् कौतुकं करे ।
मुक्ताकनकसिद्धार्थान् क्षौमे निक्षिप्य बन्धयेत् ॥ ११
ऊर्णासूत्रेण मूलेन दक्षिणे भगवत्करे ।
दूर्वाक्षतांश्च तारेण निक्षिपेन्मूर्ध्नि पादयोः ॥ १२
नीराज्यास्त्रेण वस्त्राभ्यां संवेष्ट्य स्थाप्य यत्नतः[6] ।
शाकुनेन नयेत्तोयं वाद्यैः सर्वैः समन्वितम् ॥ १३
जलतीरे निधायार्चां जलं संशोध्य मन्त्रतः ।
तीर्थमावाह्य वरुणं पूजयित्वा प्रकल्पयेत्[7] ॥ १४
योगपीठं जले बिम्बं संहृत्याग्निमयं यथा ।

---

3 यजमानः । 5 प्रतिमाया इति शेषः ।

---

1 मन्त्रमुच्चार्य च ख 2 कृत्वा ख
4 भवेत् क ग 6 स्थापयेत्ततः ख 7 अर्धत्रयं ख पुस्तके नास्ति

प्राक्शिरः शाययेत् पीठे प्रणवेन विचक्षणः ॥ १५
पञ्चमन्त्रां[1]स्ततो जप्त्वा रक्षामस्त्रेण कल्पयेत्[2] ।
लोकपालांश्च परितः सायुधान् कल्पयेद्बहिः ॥ १६
दीपमग्निं भटांस्तत्र रक्षार्थं परिकल्पयेत् ।
एवं त्रिरात्रं वस्तव्यं जलवासं विशुद्धये ॥ १७
शिल्पिकर्मसमाप्तौ[3] च तद्विधौ बलिकर्म[4] च ।
प्रासादं परिगृह्णीयाच्छास्त्रोक्तेनैव वर्त्मना[5] ॥ १८
सूत्रैः संवेष्टय तारार्णै[6]र्दर्भादाम्ना च तेन[7] वै[8] ।
शोधयित्वा यथान्यायं रक्षां कृत्वाऽथ देशिकः ॥ १९
राक्षोघ्नहोममाग्नेय्यां सर्वत्रो[9]क्तेन वर्त्मना ।
कुर्यात्तत्र मनाग्भेदः स इदानीं निगद्यते ॥ २०
हुत्वाऽऽज्यं पञ्चदुर्गाभिर्गुह्यमन्त्रैर्घृतं हुनेत् ।
अन्यो विशेषो नास्त्यत्र वास्तुहोमेऽपि तै[10]र्हुनेत् ॥ २१
वास्तोष्पते ध्रुवेत्याद्यैः षड्भिर्होमे कृते सति ।
पुण्याहान्तं विधायैवं मण्डपं शोधयेत् पुनः ॥ २२
मण्डपं विधिवत् कृत्वा चतुर्द्वारमलङ्कृतम् ।
कुण्डानि कारयेद्दिक्षु चतुरश्रादिलक्षणान्[11] ॥ २३
चतुरश्रं धनुर्वक्रं वृत्तं चैव त्रिकोणकम् ।
अलङ्कृत्य[12] वितानाद्यैः संशोध्यान्तर्बहिस्तथा ॥ २४
सूत्रेणदर्भदाम्ना च वेष्टयित्वा निखानयेत् ।
तोरणानि चतुर्दिक्षु अश्वत्थादि यथाक्रमम् ॥ २५

---

1 तत्वाख्यान् । 3 प्रासादे तत्प्रयुक्तबलिदाने च समाप्ते ।
6 प्रणवाक्षरैः । 7 प्रणवेन ।
10 गुह्यमन्त्रैः । वास्तोष्पते ध्रुवेत्यादि होमानन्तरं हुनेदित्यन्वयः ।
11 छान्दसो लिङ्गव्यत्ययः क्रियाविशेषणं वा । 12 मण्डपम् ।

---

2 अर्धत्रयं श्लोकः क, ग पुस्तकयोर्नास्ति । 4 रेव क ग
5 कर्मणा ख 8 तथैव च क ग 9 सर्वतो क ग

तारेण गर्तं संक्षाळ्य पल्लवाद्यैर्विभूषि[1]तान् ।
तेषु सम्पूजयेदेतान् गन्धपुष्पादिभिः क्रमात् ॥ २६
सुमङ्गलं सुहोत्रं च कल्याणं सद्रकं तथा ।
तदन्तरे[2] ध्वजानष्टौ पल्लवाद्यैरलङ्कृतान् ॥ २७
पताकालम्बितग्रांश्च द्वौ द्वौ द्वारि निखानयेत्[3] ।
कुमुदाद्यैश्च नन्द्याद्यैः स्थापयित्वाऽर्चयेत् क्रमात् ॥ २८
रक्ते कृष्णे च पीते[4] च सिते द्वे द्वेऽथ वर्णतः ।
पताकेऽत्र बलिं दद्यात् ध्वजेशानां यथाक्रमम् ॥ २९
द्वाःस्थौ[5] सम्पूजयेद्द्वार[6]शाखयोर्मध्यतोऽ[7]पि वा ।
इन्द्रादीन्[8] पूर्णकुम्भेषु चतुर्दिक्ष्वर्चयेदथ ॥ ३०
कोणस्तम्भेषु कोणेशानग्न्या[9]दीन् कल्पयेत्क्रमात् ।
ऋगादि वेदान् विधिवत् कर्णस्तम्भेषु कल्पयेत् ॥ ३१
पलाशशाखासहितैर्दर्भैः सम्मार्ज्य वायुना ।
अग्न्यादीशावसानं तु वारुणेनो[10]पलेपयेत् ॥ ३२
सर्षपानस्त्रसञ्जप्तान् विकीर्याथ प्रमार्जयेत् ।
विलिप्य मण्डपं भूयः शक्तिरूपं स्मरेद्गुरुः ॥ ३३
विकिरान् मूलमन्त्रेण शतमष्टोत्तरं जपेत्[11] ।
पञ्चगव्यं तु संसाद्य प्रोक्षयेदस्त्रमन्ततः[12] ॥ ३४
विकिरान् मूलमन्त्रेण क्षिपेदुत्तानपाणिना ।
त्रिधा पूर्वमुखस्तिष्ठन् सावशेषं प्रमार्जयेत् ॥ ३५
विलिप्यास्त्रेण गन्धोदैस्तैः प्रोक्ष्यापः पुनन्त्विति ।
इषेत्वेति किरेद्दर्भैस्तेनैव[13] कुसुमाक्षतैः ॥ ३६

---

2 तोरणानामन्तर्भागे । 4 पीतसितयोर्व्यत्यासो व्याख्यासम्मतः ।
5 महोदरपूर्णादीन द्वन्द्वरूपान् । 7 कुम्भकर्णादीन् ।
10 अमृतबीजेन । 11 एतदर्धमधिकमिति भाति ।

---

1 रलङ्कृ ख 3 यथा क्रमात् क ख 6 द्वारि ख 8 इदानीं क ग
9 नन्द्या- क ग 12 अयं श्लोकः क, ग पुस्तकयोर्नास्ति 13 तैरेव ख

मूलेनाभ्यर्च्य गन्धाद्यैर्मध्ये दिक्षु दिगीश्वरान् ।
पूजयेद्धूपदीपौ च न्यस्त्वा तालत्रयादिकम् ॥ ३७
कृत्वा[1] कुम्भेशमैशान्यां पूजयेन्मूलविद्यया ।
तस्मिन्[2] देवेशमाराध्य साङ्गं सावरणं क्रमात् ॥ ३८
अस्त्रेण[3] पूरयेत् पार्श्वे वर्धनीं तेन पूजयेत् ।
शतमष्टोत्तरं जप्त्वा तया[4] धारां च पातयेत् ॥ ३९
प्रदक्षिणं परिभ्रम्य कलशं पृष्ठतो नयेत्[5] ।
विकिरोपरि[6] विन्यस्य पूजयेदुभयं ततः ॥ ४०
वस्त्रयुग्मेन कुम्भेशं संवेष्ट्यैकेन चेतरम् ।
स्वकुण्डे[7] जनयेदग्निं संशोध्यायतनं मुहुः ॥ ४१
तारेणो[8]ल्लिख्य सम्प्रोक्ष्य कल्पयेत्तेन[9] विष्टरम् ।
पूजयित्वा प्रकल्प्यास्मिन् देवीमृतुमतीं शुभाम् ॥ ४२
शक्त्या सम्पूज्य तारेण वह्निमादाय पूजयेत् ।
तेना[10]स्या योनिमार्गेण निक्षिप्याग्निं गुरुः स्वयम् ॥ ४३
तेन[11] सन्धुक्ष्य सन्दीप्य परिसमुह्य परिस्तरेत् ।
पर्युक्ष्याद्भिर्वृतं पश्चात् संस्कुर्यात् स्रुक्स्रुवावपि ॥ ४४
वह्निम् सम्पूज्य गन्धाद्यैः सङ्कल्पैकैकशः क्रियाम् ।
समाराध्य हुनेत् पश्चादष्टावष्ट घृताहुतीः ॥ ४५
पूर्णाहुतिं पृथग्दद्याद्विधिना मूलमन्त्रतः ।
चतुर्गृहीतमापूर्य स्रुचा सस्रुवया गुरुः ॥ ४६
गर्भाधानं पुंसवनं सीमन्तं जातनामनी ।
ततोऽन्नप्राशनं चौलं व्रतबन्धमिति क्रमात् ॥ ४७
सप्तव्याहृतिभिः कुर्यादन्त्येनोभय[12]मन्ततः ।

3 सुदर्शनेन । 4 वर्धन्या । 6 पात्रशिष्टविकीर्ण सम्पावितोपरि कुम्भेशं तद्वत् सम्पावित-सर्षपोपरि वर्धनीं । 7 शिरोस्थानस्थे । 9-10-11 प्रणवेन । 12 सप्तमव्याहृत्या चौलमुपनयनं च ।

1 स्थित्वा ख 2 तिष्ठन् क 5 अर्धत्रयं क पुस्तके नास्ति 8 करेणो क

कृत्वैवमग्निसंस्कारं वेद्यां स्वस्तिकमालिखेत् ॥ ४८
रजोभिः पञ्चवर्णैश्च क्षिपेद्धान्यानि मूलतः ।
तण्डुलान्निक्षिपेत्तस्मिन्नास्तीर्योपरि चाम्बरम् ॥ ४९
आस्तरेच्छयनं तत्र मूलमन्त्रेण साधकः ।
शिरोपधानसंयुक्तं सकपोलतल[1]द्वयम् ॥ ५०
तूलपट्टांशुकाकीर्णं पूजयेत् तं यथाविधि ।
विन्यस्य कलशानष्टौ तेषु विद्येश्वरान् यजेत् ॥ ५१
ओमनन्ताय विष्ण्वात्मने नमः । सूक्ष्माय मधुसूदनात्मने नमः ।
शिवोत्तमाय त्रिविक्रमात्मने । शत [एक] नेत्राय वामनात्मने ॥
एक[2]रुद्राय श्रीधरात्मने । त्रिमूर्तये हृषीकेशात्मने ।
श्रीकण्ठाय पद्मनाभात्मने । शिखण्डिने दामोदरात्मने नमः[3] ॥
ततोऽष्टमङ्गलं न्यस्येच्छयनस्य समन्ततः ।
दीपांश्च ज्वालयेद्दिक्षु न्यस्येदङ्कुरपालकान् ॥ ५४
स्वस्तिकम् पद्मशङ्खौ[4] च कलशं दर्पणं तथा ।
उत्पलं नन्दिकावर्तं श्रीवत्सं चाष्टमङ्गलम् ॥ ५५
कृत्वैवं भद्रकं सौम्ये कुर्यान्मण्डलमुज्वलम् ।
कारयेन्मण्डपन्त्वीशे पञ्चहस्तं सवेदिकम् ॥ ५६
स्नानपीठं न्यसेत्तस्मिन् कलशांश्च प्रपूरयेत् ।
मृदं कषायं गोमूत्रं गोमयं च पयो दधि ॥ ५७
आज्यं फलोदकं पश्चात् सर्वौषधिजलं ततः ।
मूलेन[5] मध्यादारभ्य दिग्विदिक्षु समर्चयेत् ॥ ५८
तद्बाह्ये कनकाम्भोभिः पूरयेद्दिग्विदिक्ष्वथ ।
शिष्टान् शुद्धोदकैस्तद्वत् पल्लवानस्त्रमन्त्रतः ॥ ५९

---

3 यद्यप्येतन्नमूलं भवेत् । तथापि आदर्शत्रयेऽपि लिखितमिति मयाऽपि मूलमध्ये निवेशितम् । 5 दैविके ।

---

1 स्थल ख 2 शत ख 4 शङ्खपद्मौ क ग

क्षिपेत्तेषु शरावांश्च न्यस्त्वा वस्त्रैश्च वेष्टयेत् ।
दर्भान् विन्यस्य गन्धोदैः सम्प्रोक्ष्याराधयेत्क्रमात् ॥ ६०
हुत्वाऽथ मूलमन्त्रेण शतमष्टोत्तरं घृतम्[1] ।
सम्पाताज्येन संसृज्य सम्पूज्याऽथाभिमन्त्र[2]येत् ॥ ६१
कृत्वैवमानयेत् पश्चात् प्रतिमां देशिकोत्तमः ।
मन्त्रान् संहृत्य चोद्धृत्य क्षाळयित्वा शुभैर्जलैः ॥ ६२
गन्धादिभिरलङ्कृत्य वस्त्राभ्यां परिवेष्ट्य च ।
शाकुनेन नयित्वाऽर्चां स्नानपीठेऽथ विन्यसेत् ॥ ६३
भद्रं कर्णेति सङ्कीर्त्य लिम्पेद्घृतवतीत्यृचा ।
घृतेन चूर्णैर्मासूरै र्नमस्त इति सर्वतः ॥ ६४
उद्वर्त्य क्षाळयेदद्भिर्मृदं दद्याच्छिरस्यथ ।
नद्याश्चोभयतस्तीरादाहृतां वृषशृङ्गजाम् ॥ ६५
तारेण क्षाळयित्वाद्भिस्तेन वल्मीकजामथ ।
क्षेत्रोत्थां मृदमानीय लिप्त्वा तेनाभिषेचयेत् ॥ ६६
मानस्तोकेत्यृचा देवमभिषिच्य[3] समाहितः ।
क्षीरवृक्षशमीब्रह्मत्वग्रसेनाभिषेचयेत् ॥ ६७
अवोचाम[4] नमो भूयः प्रणवेन यथाक्रमम् ।
अभिषिच्य क्रमाद्द्रव्यैः पञ्चभिश्चान्तरान्तरा ॥ ६८
अङ्गिरैः शीततोयेन स्नापयित्वाऽभिपूज्य च ।
मूलेन फलतोयैश्च स्नापयित्वा समाहितः ॥ ६९
मधुवातेत्यृचा पात्रे तैजसे मधुरत्रयम्[5] [6] ।
आहृत्य हेमसूच्या[7] तदा[8]दाय मनुनाऽमुना ॥ ७०
हिरण्यगर्भमन्त्रेण[9] चित्रं देवेत्यृचा[10] पुनः ।

---

3 मृत्कलशेन । 4 कषायकलशमन्त्रः । 6 मध्वाज्यक्षीराणि
9 आदानमन्त्रः । 10 अञ्जनमन्त्रः ।

---

1 शतं क ग 2 पंच क ग 5 च मधुत्रयम् ख 7 कूर्चा क ग 8 तमा ख

अञ्जयेद्वैष्णवे नेत्रे[1] विश्वतश्चक्षुषाऽन्यतः[3] ॥ ७१
दद्याच्च धेनुं गुरवे देवो मे प्रीयतामिति ।
सर्वौषधिजलेनापि स्नापयेद्विधिना गुरुः ॥ ७२
नमः शम्भवमन्त्रेण इषेत्वेति तथैव च ।
नमो वः किरिकेभ्यश्च स्नापयित्वा बहिः स्थितैः ॥ ७३
स्नापयेत् कनकाम्भोभिर्दि-ग्विदिक्स्थैश्च देशिकः ।
तत्वायामीति पूर्वेण[4] समुद्रं गच्छ दक्षिणे ॥ ७४
आपोहिष्ठेति चाप्येन[5] गायत्र्यैवोत्तरेण तु ।
कोणस्थैः कलशैश्चापि स्नापयेत्तारुद्धया[6] ॥ ७५
तारेणावाह्य देवेशं पूजयेद्विधिनामुना ।
अर्घ्यं पाद्यं[7] ततो गन्धं पुष्पं चापि पवित्रकम् ॥ ७६
सोमारुद्रेत्यृचा दद्यात्[8] युवं वस्त्रेत्यृचाऽम्बरम् ।
बृहस्पतेत्युत्तरीयं वेदाहमुपवीतकम् ॥ ७७
मूलेन भूषणं[9] सर्वं धूप धूरसि मन्त्रतः[10] ।
अञ्जनं तु समिद्धेन दद्यात्तारेण रोचनाम्[11] ॥ ७८
सोमारुद्रायुवमिति दर्पणं दर्शयेत्ततः ।
अग्नाविष्णू इति स्तुत्वा युवमेतानि मन्त्रतः ॥ ७९
प्रार्थयित्वा क्षिपेत् पुष्पं मन्त्रेणौषधयन्विति ।
सम्पूज्यैवं ततः कुर्यात् पुण्याहं मूर्ति-पैः सह ॥ ८०
उत्तिष्ठेति तथोत्थाप्य ब्रह्मयानेन तां नयेत् ।

---

1 वामनेत्रे । 2 हिरण्यगर्भमन्त्रेणैवादाय । 3 दक्षिणनेत्रे । तृतीयनेत्रं हिरण्यगर्भमन्त्रेणैवाञ्जयेत् । 4 बाह्यकलशाभिषेकमन्त्रानाह 5 पश्चिमदिक्स्थेन । 6 गायत्र्यैव । 7 अत्र क्रमव्यत्ययः समाधेयः सोमारुद्रेत्यादिना अर्घ्यपाद्ये दत्वा आचमनादि-स्नानान्तं मूलेन दद्यात् । वस्त्रदानानन्तरं गन्धादि सोमारुद्रेत्यादिना दद्यात् ।
10 मूलेन दीपं । 11 तिलकं ।

---

8 रुद्रायुवमिति क ग 9 पूरणं ख

उदुत्यमित्ये मन्त्रेण मण्डपं तां प्रवेशयेत् ॥ ८१
यस्मिन् ऋचेति साम्ना तां गुरुमूर्तिधरैः सह ।
नमो हिरण्यमन्त्रेण शयने तां[1] निवेशयेत् ॥ ८२
प्रासादाभिमुखं तस्मिन् शाययेद्[2]देशिकः स्वयम् ॥ ८३

इति क्रियासारे (त्रयोविंशः) हारीशे तृतीयः पटलः

चतुर्थः पटलः

अथाधिवासनं वक्ष्ये[3]गौरीपद्मापतेः क्रमात् ।
आत्मानं सकलीकृत्य देवो भूत्वा महेश्वरः ॥ १
अर्चागतं ततो जीवं तारेणात्मनि योजयेत् ।
ततस्तत्त्वानि संहृत्य पृथिव्यादीनि देशिकः ॥ २
कर्मज्ञाना[4]क्षविषयैः[5] सह सर्वं यथाक्रमम् ।
शान्त्यतीते नयेत् तां च योजयेत् परमात्मनि ॥ ३
बिम्बं[6]संशोध्य सन्दह्य प्लावयेदमृतेन तु ।
योजयेत् पार्थिवीं शक्तिं तस्यां बुद्बुदमुत्थितम् ॥ ४
तदण्डं मनसा ध्यात्वा बिम्बं जीवं च योजयेत् ।
सिसृक्षया परो देवो मायां विक्षोभ्य चात्मना ॥ ५
नादात्मा परमेष्ठीशस्ततो विन्दुमजीजनत् ।
सहस्रादित्यसङ्काशमचिन्त्यं मनसाऽपि तत् ॥ ६
तस्मात्तत्त्वानि च[7] कला भुवनान्यसृजत्प्रभुः ।
ध्यात्वैवं विन्यसेद्बिम्बे तानि तत्त्वानि[8]देशिकः ॥ ७

---

2 मूलेन 5 कर्माक्षैर्ज्ञानाक्षैर्विषयैः 7 चकारात् वर्णाध्वादिसङ्ग्रहः

1 सं-ख 3 कुर्यात् क ग 4 कर्मज्ञेना क ग 6 ततः ख 8 सर्वाणि ग

गुह्यमन्त्रेण मूर्धादिचरणांन्तं न्यसेदथ ।
मूर्ध्नि वक्त्रे च हृदये गुह्ये पाददृये क्रमात् ॥ ८
आवाह्य हृदयाम्भोजाद्देवदेवंसनातनम् ।
ज्योतीरूपं न्यसेत् तस्मित् सकलीकृत्य पूजयेत् ॥ ९
अङ्गैर्मूर्तिभिराशेशैर्वज्राद्यैर्गरुडेन च[1] ।
सह सम्पूज्य भक्त्या तं निवेद्य विधिवद्धविः ॥ १०
हुत्वा बलिं च विकिरे[2]न्मण्डपस्याष्टदिक्ष्वथ ।
मण्डले[3] पूजयित्वा तं भक्त्या चैवोपहारकैः ॥ ११
होमांश्च कारयेद्दिक्षु यथावत् साधकेश्वरः[4] ।
संशोध्यायतनान्यग्ने रुल्लिखेत् स्वेन वर्त्मना ॥ १२
जनितं[5] प्रणवेनाग्निं संहृत्यानेन[6] निक्षिपेत् ।
सन्धुक्ष्य तेन[7] सर्वत्र कुर्यादग्निमुखं द्विजाः ॥ १३
गायत्र्या जुहुयुः पञ्चं समिदादि यथाक्रमम् ।
वेदाद्यै[8]र्जुहुयाद्दिक्षु अष्टोत्तरशतं पृथक् ॥ १४
समिदाज्यचरूनाज्यं तिलान् सिद्धार्थकान् यवान् ।
लाजान् व्याहृतिभिस्त्वेतानन्ते मूलेन वै घृतम् ॥ १५
मूलेन पूर्णां विधिवद्धौवडन्तं प्रदाय च ।
शान्तिहोमं गुरुः कुर्यादष्टाष्टाहुतिभिस्ततः ॥ १६
मूर्ति-भिर्मू[9]लमन्त्रेण द्रव्यैरेभिः समाहितः ।
घृतेन दध्ना[10] पयसा मधुना च यथाक्रमम् ॥ १७
सह सर्वं तु मूलेन हुत्वाऽर्चायास्ततः स्पृशेत् ।
पादं नाभिं च हृदयं मूर्धानं सर्वगालकम् ॥ १८

---

1 चकारात् वृषात्मना 2 देवं रुद्रं पुरस्कृत्येत्याबिना 5 आचार्य-कुण्डात् 6-7 प्रणवेन । 8 वेदाद्यैः समिदाज्यचर्वाज्यानि व्याहृतिभिः तिलसर्षपयवलाजान्, मूलेन घृतम् क्रमात्सर्वे जुहुयुः । 9 मूर्तिमन्त्रैः ।

---

3 मण्डपे क ग 4 आधिवासनिकान् गुरुः ख 10 तेन दध्ना च क ग

सम्पातयुक्तं संस्पृश्य गन्धपुष्पैः प्रपूज[1]येत् ।
पीठं पादशिलां[2] चापि संशोध्याभ्यर्चयेत् पुनः ॥ १९
कृत्वैवमधिवासं तु गेयनृत्तादि कारयेत् ।
अनिद्रया निशां नीत्वा स्नात्वा जप्त्वा परेऽहनि ॥ २०
कुर्यात् प्रतिष्ठां विधिवद्देवदेवस्य साधकः ॥ २१

इति क्रियासारे (चतुर्विंशः) हारीशे चतुर्थः पटलः

पञ्चमः पटलः

प्रतिष्ठां विधिना वक्ष्ये शङ्कराच्युतयोरथ ।
प्रासादं मूर्ति-भिः सार्धं शोधयित्वा यथाविधि ॥ १
सम्मार्ज्यालिप्य सम्प्रोक्ष्य गव्यगन्धोदकैः क्रमात् ।
अलङ्कृत्याक्षतैः पुष्पैर्विभजेत्सप्तधा गृहम् ॥ २
पदं[3] तु पञ्चदशधा[4] मध्यस्थं विभजेदथ ।
मध्ये त्रीणि परित्यज्य[5] चतुर्थे स्थापयेच्च ताम् ॥ ३
बिम्बमध्यमवृत्तस्य[6] चतुर्विंशतिभागतः ।
नीत्वोत्तरे यवं तस्मादीशे नीत्वा[7] यथाविधि ॥ ४
सम्पातविधिना हुत्वा गायत्र्याऽष्टोत्तरं शतम् ।
पुण्याहं मूर्ति-पैः सार्धं कृत्वा रत्नानि विन्यसेत् ॥ ५
प्रागादीशानपर्यन्तं प्रणवेनाऽथ मध्यतः ।
न्यस्त्वा सुवर्णं सम्पातं संस्पृश्याथाभिमन्त्रयेत् ॥ ६

2 नपुंसकशिलाम् 4 दशधा इति नारायणः 5 मध्येन सह त्रीणि विभागस्थानानि पृष्ठतः परित्यज्य। 6 बिम्बमध्यप्रमाणस्य चतुर्विंशतिभागं उत्तरे नीत्वा। 7 तयोः सूत्रयोः सम्पातस्थानाद्वीशे यवप्रमाणं नीत्वा।

1 समर्च- ख 3 पादं ख

शक्रनीलं मणिं[1] तार्क्ष्यं रत्न[2]वैडूर्यमेव च ।
मुक्ताप्रवाळवज्राणि पुष्यरागं क्रमेण तु ॥ ७
एवं रत्नानि विन्यस्य हिरण्यं मध्यमे[3] न्यसेत् ।
संस्थाप्य पीठं सम्पूज्य रक्षां कृत्वा बहिर्व्रजेत् ॥ ८
आसाद्य मण्डपं[4] वह्निं[5] संहरेत् कुम्भगा[6]स्ततः ।
मूर्ती [7]रर्घ्यं प्रदायाथ उत्तिष्ठेति समुद्धरेत् ॥ ९
अर्चां रथे समारोप्य शाकुनेन नयेद्गृहम् ।
भेरीपटहताळादि घोषै[8]र्वाद्यरवैस्सह ॥ १०
नीत्वा द्वारप्रदेशेऽर्घ्यं प्रदायान्तः प्रवेशयेत्[9] ।
तेजोरूपं विभुम्[10] ध्यात्वा सर्वेशं सर्वसाक्षिणम् ॥ ११
स्थापयेत् पीठगर्तेऽथ देवो भूत्वा स्वयं गुरुः ।
यज्ञायज्ञानुवाकेन सूक्तेन पुरुषात्मना ॥ १२
अर्घ्यं दत्वा ततो ध्यायेद्देवं सकळनिष्कळम् ।
ध्रुवाद्यौरिति मन्त्रेण स्थिरीकुर्याद्विचक्षणः ॥ १३
सर्वज्ञं सर्वगं साक्षाच्चिदानन्दमयं विभुम् ।
कल्पान्तार्कायुतप्रख्यं हृदयान्मूलमन्त्रतः ॥ १४
आवाह्य विधिना बिम्बे योजयेत् परमं विभुम् ।
गुह्यमन्त्रैश्च मूर्धादि स्थानेषु न्यस्य देशिकः ॥ १५
सकलीकरणं कुर्यान्मूलाङ्गैश्च समाहितः ।
मुद्रां सन्दर्श्य विधिवत् पूजयेद्भक्तिसंयुतः ॥ १६
अर्घ्यपाद्यादिभिः सम्यङ्निवेद्य च महद्धविः ।
हुत्वा बलिं विकीर्याथ नत्वाऽन्नं च विसर्जयेत् ॥ १७
भूयोऽप्याराध्य विधिवज्जप्त्वा स्तुत्वा समाहितः ।

5-6-7 वह्निकलशचैतन्यं, कुम्भगताष्टमूर्तीश्च बिम्बे उद्वास्य 9 पादपूर्वं

---

1 नीलमणि ख 2 रत्नं ख 3 मध्यमं क ग
4 लं ख 8 गेय क ग 10 विधिं क ग

सम्प्रार्थ्य प्रार्थयेत् [स्थापयेत्] पश्चात् परिवारान् बहिः क्रमात् ॥
संस्थाप्याभ्यर्च्य[1] विकिरेद्बलिं तेभ्यो यथाक्रमम् ।
आचम्यान्तः प्रविश्याथ मूलमष्टशतं जपेत् ॥ १९
स्तुत्वा तं विधिवत् स्तोत्रैरभिवाद्य बहिर्व्रजेत् ।
अष्टाङ्गाश्लिष्टभूमिस्तु प्रणमेद्दण्डवत् क्षितौ ॥ २०
प्रतिष्ठैवं समाख्याता शम्भुविष्णोर्महात्मनोः ।
कृत्वैतां पितृभिः सार्धं ब्रह्मलोकं समा[2]प्नुयात् ॥ २१

इति क्रियासारे (पञ्चविंशः) हारीशे पञ्चमः पटलः

षष्ठः पटलः

शिवनारायणस्याहं पूजां वक्ष्ये समासतः[3] ।
मन्त्रैरेव क्रिया यस्मान्मन्त्रानग्रे वदाम्यहम् ॥ १
मार्जनालेपनाद्यैस्तु शोधयित्वा महीं ततः ।
मात्रकां संलिखे[4]त्तत्र गन्धाद्यैरभिपूज्य ताम् ॥ २
मन्त्रन्यासादिकं कृत्वा मन्त्रानस्यां समुद्धरेत् ।
आदिवर्णं[5] समुद्धृत्य पञ्चमं[6] तु समुद्धरेत् ॥ ३
पञ्चपञ्चान्त [विंशान्त][7] मुद्धृत्य त्रयमेकत्र योजयेत् ।
प्रणवोऽयं मनुस्तस्माद्बाह्यं न क्वचित् परम् ॥ ४
उद्धरेच्च त्रयस्त्रिंश[8]त्सबिन्दुं चाष्टमान्वितम्[9] ।
नामद्वयान्वितं चोर्ध्वं चतुर्थ्यन्तं नमोन्वितम् ॥ ५
मूलमन्त्रोऽयमाख्यातो बीजेनैवा[10]ङ्गकल्पना[11] ।

5 अकारः । 6 उकारः । 7 पञ्चविंशाक्षरं मकारं ।
8 हकारः । 9 ऋकारः ओं हूं शिवनारायणाय नमः । 11 हकारेण

1 राध्य क ग 2 मवा-ख 3 समाहितः क ग 4 सलिलैः ख
10 जार्णेर क ग

दीर्घस्वराङ्गनामाढ्य[1]जात्यन्तेनास्त्र[2]पश्चिमा ॥ ६
आद्यर्णेन तृतीयेन पञ्चम्येकादशेन च ।
त्रयोदशस्वरोपेत[3]बीजेनाजादयः[4] स्मृताः ॥ ७
आमन्तावनि[5] सर्ग्यम्भोरामन्तं नयनाग्रयुक् ।
मरुत्सप्रणवं शान्तमिषुबीजोपरि क्रमात् ॥ ८
सर्वात्मादिपदान्तास्तै:[6] परमेष्ठीशपश्चिमम् ।
संहारे च तथा सृष्टौ परमेष्ठीशपूर्वकम् ॥ ९
आद्यं द्वितीयं बिन्दुं च विसर्गं[7] मूर्तिबीजकाः ।
अन्येषां[8] हृदयं बीजं वज्रादीनामथास्त्रकम् ॥ १०
तत्पुरुषाय सङ्कीर्त्य विद्महे तदनन्तरम् ।
जनार्दनाय वै पश्चाद्धीमहे तत्[9] समुद्धरेत् ॥ ११
तन्नो विष्णुपदं प्रोक्त्वा प्रचोदयादतः परम् ।
गायत्रीयं समाख्याता वक्ष्येऽन्यां चैव तन्मयीम् ॥ १२
ओं शङ्कराय सङ्कीर्त्य विद्महे पदमुद्धरेत् ।
नारायणायेत्यस्यौर्ध्वे धीमहे तन्न इत्यपि ॥ १३
पुरुषः प्रचोदयादन्ते इयं प्रोक्ता च तन्मयी ।
मनवोऽन्ये च बहवस्तस्य तान्न वदाम्यहम् ॥ १४
तस्य[10] पूजां वदिष्येऽहं प्रकृता सा पुरा[11] यतः ।
स्नात्वा विधानतः कृत्वा देवर्षि-पितृतर्पणम् ॥ १५

---

1 बीर्घाः स्वराः– आकारादयः, अङ्ग नाम – हृदयादि, जातिः – नमः स्वाहादिः एवं च हां हृदयाय नमः इत्यादि सिद्धम् । 2 न नेत्रपश्चिमेत्यर्थः । 3 विषमस्वरसहितबीजेन हं हिं इत्यादिना । 4 सद्योजातादयः एते गुह्यमन्त्राः । 5 अवनिः – लः आमन्तः लां, अम्भो –वकारो विसर्गयुतः वः, रां, नयनं – औ तदग्रं – अं तद्युक्, मरुत् –यकारः यं, शान्तः षकारः 6 तथा च संहारे ओं हं लां सद्योजाताय सर्वात्मने नमः इत्यादि । परमेष्ठीश पश्चिमं, सृष्टौ परमेष्ठीशपूर्वकमुद्धरेत् अयं द्वितीयो गुह्यमन्त्र-प्रकारः 7 अ आ अं अः चतुर्मूर्तिबीजानि 8 इन्द्रादीनां हां, वज्रादीनांहः बीजं 11 पटलादौ

---

9 तं ख 10 अतः क ग

मनसैव विभुं ध्यात्वा गच्छेदायतनं सुधीः ।
प्रक्षाळ्य चरणौ हस्तावाचम्य विधिवत् पुनः ॥ १६
प्रविश्य मन्दिरं भूयस्तस्मिन्नासीत चासने ।
पूजाद्रव्याणि संहृत्य पूजास्थानं विशोध्य च ॥ १७
करशुद्धिमथास्त्रेण कृत्वा तालत्रयं पुनः ।
कृत्वा दिग्बन्धमस्त्रेण[1] वह्निप्राकारमेव च ॥ १८
प्राणायामत्रयं कुर्यान्मूलमन्त्रेण मन्त्रवित् ।
धारणाभिस्तनुं शोध्य मन्त्रन्यासं समाचरेत् ॥ १९
मूलेन व्यापकं पाण्योरङ्गान्यङ्गुष्ठतः क्रमात् ।
तलान्तं व्यापकं देहे मूलवर्णान्[2] विन्यसेत् ॥ २०
कें द्गवदनहृन्नाभि-गुह्यजानुपदेषु च ।
हृदयादीनि चाङ्गानि स्वेषु स्थानेषु विन्यसेत् ॥ २१
न्यस्त्वैवं[3] हृदयाम्भोजे ध्यायेत्तं मनसा विभुम् ।
मानसैरुपचारैश्च पूजयित्वा यथाविधि ॥ २२
आत्मानं तं विभुम् ध्यात्वा जपेदष्टावरं मनुम्[4] ।
अर्घ्यपात्रं[5] ततोऽस्त्रेण प्रक्षाळ्यापूर्य मूलतः ॥ २३
गन्धपुष्पयुतं कृत्वा तारमष्टावरं जपेत् ।
ताभिरात्मादिकं सर्वं प्रोक्ष[6]येत् प्रणवेन च ॥ २४
फडन्तेनाथ गन्धाद्यैरलङ्कृत्य स्वकां तनुम् ।
आराध्य कुसुमाद्यैश्च पूजाकर्म समारभेत् ॥ २५
आधारशक्तिं चानन्तं मध्ये सम्पूज्य कोणतः ।
अग्न्यादि पीठपादांश्च धर्मादीनर्चयेत् क्रमात् ॥ २६
अधर्मादीनि गात्राणि त्रिगुणां[7]स्तन्तुरूपिणः ।

---

7 सत्वादीन् ।

---

1 मन्त्रेण ख 2 मूलेनापि च ख 3 न्यस्त्वा तं ख
4 अष्टोत्तरं शतं क ग 5 पाद्यं ग 6 शोध- क ग

मायाविद्ये ततः पद्मं मण्डलात्मत्रयं पुनः ॥ २७
विमलादीस्ततः शक्तीः केसरेषु च मध्यतः ।
पूजयेद्गन्धपुष्पाद्यैर्धूपदीपैः क्रमेण तु ॥ २८
आवाह्य हृदयाम्भोजा[1]न्मूलमन्त्रेण देशिकः ।
मन्त्रन्यासं ततः कृत्वा मुद्राः[2] सन्दर्श्य पूजयेत् ॥ २९
ध्यात्वा चतुर्भुजं देवं भोगिभिर्भूषणै[3]र्युतम् ।
जटाभिर्मकुटेनैव कर्णयोः कर्णमुद्रया[4] ॥ ३०
कुण्डलेन[5] सरत्नेन मकराख्येन संयुतम् ।
रेखाभिरसितैः कण्ठे[6] हारग्रैवेयभूषणैः ॥ ३१
भोगिभिश्चाङ्गदाद्यैश्च कटकैरङ्गुलीयकैः ।
भूषितैर्बाहुभिर्दीप्तं द्वीपिचर्माशुकादिभिः ॥ ३२
भुजेषु शूलं चक्रं च कपालं शङ्खमेव च ।
दधानं सितकृष्णाभमत्यन्त[7]ललिताकृतिम् ॥ ३३
भसितेनाङ्गरागेण भोगिना नू-पुरेण च ।
अलङ्कृतमुदाराङ्गं परमेष्ठीशमव्ययम् ॥ ३४
अङ्गैर्मूर्ति-भि[8]राशेशै[9]र्वज्राद्यैर्वृषभेण च ।
वैनतेयात्मना सार्धं पाद्याद्यैरर्चयेत् क्रमात्[10] ॥ ३५
अग्नीशरक्षोवायव्यदळेष्वग्रे दिशासु च ।
अङ्गानि[11] पुरुषाघोरवामसद्यैश्च मूर्ति-भिः ॥ ३६
प्राग्याम्यसौम्यप्रत्यक्स्थैरनलादिविदिग्गतैः ।
वासुदेवादिभि[12]र्भूयो लोकपालैः स्वदिग्गतैः ॥ ३७

---

3 दक्षिणभागे सर्पैर्वामे भूषणैः । 4 वक्षे पाशाकारमुद्रया ।
5 वामे मकरकुण्डलेन । 6 कण्ठैकभागे असिताभिः रेखाभिः,
एवमुत्तरत्रापि । 8 तत्पुरुषादिभिर्वासुदेवादिभिश्च ।
11 अग्नीशादिषु । 12 अनलादिषु ।

---

1 जे ख 2 मुद्रां क ग 7 न्तं क ग
9 रिन्द्राद्यै क ग 10 विधिनार्चयेत् ख

वज्राद्यैस्तद्वहिश्चाग्रे वृषेण गरुडात्मना ।
ऐशान्यां चण्डसेनेन सार्धं सम्पूजयेद्विभुम् ॥ ३८
पाद्यार्घ्याचमनाद्यैश्च मूलमन्त्रेण भक्तितः ।
पाद्याद्यैर्भूषणान्तैश्च पूजयित्वाऽथ तं विभुम् ॥ ३९
मूर्ध्न्यास्ये हृदये गुह्ये पादयोर्गुह्यमन्त्रकान् ।
आराध्य हृदयादीनि स्वेषु स्थानेषु[1] पूजयेत् ॥ ४०
एवं सम्पूज्य[2] तं पूर्वं पूर्वोक्तेनार्चयेत् ततः ।
गन्धैः पुष्पैर्धूपदीपैर्नि-वेद्यैः सोपदंशकैः ॥ ४१
पूजयित्वा यथान्यायमग्नावपि समर्चयेत् ।
सघृतेनान्धसा हुत्वा भूतेभ्यो विकिरेद्बलिम् ॥ ४२
नत्वा प्रदक्षिणीकृत्य निवेद्यं च विसर्जयेत् ।
तोयमाचमनं दत्वा गन्धपुष्पैः समर्चयेत् ॥ ४३
जप्त्वा स्तुत्वा प्रदायार्घ्यं संहृत्य[3] हृदये न्यसेत् ।
इति संक्षेपतः प्रोक्ता पूजा सर्वार्थसिद्धिदा ॥ ४४
विसर्गं नैव कुर्वीतस्थापिते परमेश्वरे ।
कलशे पञ्चगव्येऽथ विसर्गो न विधीयते ॥ ४५
तयोः स्थितम् विभुं सम्यग्देवं देवालये नयेत् ॥ ४६

इति क्रियासारे (षड्विंशः) हारीशे षष्ठः पटलः

सप्तमः पटलः

दिशाहोमांश्च[4] विधिवत् कारयित्वा यथाविधि ।
चतुर्थदिवसे स्नानं कुर्याद्देवदेवस्य दैशिकः ॥ १

1 हृदयादिषु । 3 लयाङ्गैः । 4 चकारात् प्रायश्चित्तानि ।

2 आराध्य ख

यागभूमिं तु संशोध्य गोमयेन विलिप्य तु ।
पञ्चगव्येन सम्प्रोक्ष्य गन्धाद्यैर्वि-किरैः किरेत् ॥ २
वितानानूर्ध्वमाच्छाद्य[1] स्तम्भान् सम्भूष्य[2] चाम्बरैः ।
भूमेः परिग्रहं कृत्वा वर्धन्या[3]ऽग्निं च साधयेत्[4] ॥ ३
कलशस्यानुरूपेण पदानि परिकल्पयेत् ।
क्षिपेद्द्वादशसूत्राणि प्राक्सौम्याग्राणि मार्जयेत् ॥ ४
पुट[5]त्रयान्तरे वीथी[6] रजोभिः पञ्चवर्णकैः ।
कृत्वा पदानि निक्षिप्य शालीन् द्वौ द्वौ कुशौ न्यसेत् ॥ ५
कलशान् क्षालितान् सूत्रवेष्टितान् धूपितान् शुभान् ।
सादयेत् प्रणवेनैव न्यम्बिलान् मध्यतः क्रमात् ॥ ६
दर्भानुपरि विन्यस्य तारेणाऽथ प्रपूजयेत्[7] ।
द्रव्याणां देवतामन्त्रैस्तानि विन्यस्य मूलतः ॥ ७
मध्यादीशावसानं तु मध्यखण्डे[8] प्रपूरयेत् ।
दिग्विदिक्षु बहिर्मध्यनवके[9] मध्यतो घृतम् ॥ ८
उष्णोदकं[10] रत्नतोयं[11] फलोदं लोहवारि च ।
मार्जनं गन्धतोयं च अक्षतं यवमेव च ॥ ९
पाद्यर्घ्याचमनं गव्यं दधिक्षीरमधूनि च ।
कषायं बाह्यखण्डेषु[12] मध्यकुम्भेषु पूरयेत् ॥ १०
शेषेषु गन्धसलिलं पूरयेद्दिग्विदिक्षु च ।
पूरितान् पूरितानस्त्रमन्त्रेणाच्छाद्य पल्लवैः ॥ ११

---

3 वर्धन्येति पूर्वत्रान्वेति। 4 जनयेत्। 6 एवं च नव नवकानिभवन्ति।
8 मध्यनवके पूर्वादि प्रादक्षिण्येन। बहिर्नवकेषु दिग्विदिक्क्रमेण।
9 मध्यनवके मध्ये घृतं पूर्वादिक्रमेण उष्णोदकादि।
12 बाह्यखण्डमध्यकलशेषु दिग्विदिक्क्रमात्पाद्यादि।

---

1 यागभूमिं तु संशोध्य ख 2 सम्पूज्य ख 5 त्रिक- क
7 गन्धोदैः प्रोक्ष्य चाक्षतैः ; विकीर्य प्रणवेनैव उत्तानीकृत्य चोद्धरेत्।
गायत्र्या विन्यसेद्द्रव्यं कुम्भानन्यांश्च मूलतः क ग 10 उष्णोदं क ग 11 च क

चक्रिकाभिश्च सङ्घट्य वस्त्रैर्मूलेन वेष्टयेत् ।
गन्धोदकैश्च सम्प्रोक्ष्य पूजयेदुपहारकैः ॥ १२
सम्मार्ज्य वीथीः सम्भूष्य न्यसेदङ्कुरपालिका[ः]न् ।
मूर्तिषा जुहुयुर्दिक्षु प्रागुक्तेनैव वर्त्मना ॥ १३
जनिताग्निं च निक्षिप्य कृत्वा चाग्निमुखं क्रमात् ।
होमे समाप्ते सम्पातं कलशेषु समर्पयेत् ॥ १४
भूयोऽप्याराध्य विधिवत् कलशानभिमन्त्रयेत् ।
मूलेन देवतामन्त्रैः क्रमेणावाहितो गुरुः ॥ १५
रत्नादीनि समासेन द्रव्याणि कथयाम्यहम् ।
पद्मरागं च वैडूर्यमिन्द्रनीलं च गारुडम् ॥ १६
पुष्यकं ब्रह्मरागं च वज्रं मौक्तिकमेव च ।
सूर्यकान्तेन्दुकान्तौ च प्रवाळम् स्फटिकं तथा ॥ १७
अयस्कान्तं च रत्नानि फलानि कथयाम्यहम् ।
पनसाम्रकपित्थं च कदळ्यामलकं तथा ॥ १८
बिल्वं भव्यं मातुलङ्गं नाळिकेरं च दाडिमम् ।
बदरीकुटजं चैव लोहतोयमथोच्यते ॥ १९
सुवर्णं रजतं ताम्रमायसं त्रपु सीसकम् ।
आरं कांस्यं च लोहाम्भः पित्तलं समुदाहृतम् ॥ २०
शिरीषं च कु[1]शागन्धरजनीसूर्यवर्तिनी ।
भूस्तृणं च सदा भद्रा[2] पनसं तुळसीद्वयम् ॥ २१
सहदेवीति सम्प्रोक्तं मार्जनं गन्ध उच्यते ।
उशीरं कुङ्कुमं कुष्ठं मांसी मलयजं मुरा ॥ २२
देवदारुहरीवेरं कर्पूरं नागमु[3]स्तके ।
अगरुं[4] द्वादशैतानि वक्ष्याम्यक्षतवारि च ॥ २३
नीवारं वैणवं चैव यवसर्षपमाषकान् ।

---

1 नि ग 2 भद्रं ख 3 म-क ग 4 रु क

कङ्कुतण्डुलशालींश्च प्रोक्तं यव ![1]मतः परम् ॥ २४
तुळसीपद्मदूर्वाश्च श्यामाकं विष्णुपर्णिका ।
बिल्वगन्धाक्षतं पुष्पं कुशाग्रं पाद्यमुच्यते ॥ २५
गन्धपुष्पदधिक्षीरतिलसिद्धार्थमक्षतम् ।
वचा यव कुशाग्राणि फलं चार्घ्याङ्गमीरितम् ॥ २६
कर्पूरजातीतक्कोललवङ्गं गन्धपुष्पकम् ।
इति द्रव्याणि चैतानि प्रोक्तान्याचमनीयके ॥ २७
शमीपलाशखदिरबिल्वाश्वत्थविकङ्कताः[2] ।
उदुम्बराम्रन्यग्रोधपनसप्लक्षजम्बुकाः[3] ॥ २८
मधूपनीपशम्याकाः[4] कषायाङ्गमुदीरितम्[5] ।
द्रव्याणि कथितान्येवं विदितानीतराणि तु ॥ २९
देवताः क्रमतो वक्ष्ये घृतादीनामतः परम् ।
विष्णुः सहस्रकिरणो [दिवाकरो] ब्रह्मा[6] कुबेरो वसवस्तदा ॥ ३०
विश्वेदेवाश्च गन्धर्वो निऋत्यार्थे पितृश्रियौ ।
वाक् दक्षशुक्रसोमाश्च महेन्द्रो यम एव च ॥ ३१
उक्ताः क्रमेण तै[7]र्मन्त्रैर्द्रव्यविन्यास ईरितः ।
कलशानधिवास्यैवं गेयनृत्तादि कारयेत् ॥ ३२
ततः प्रातः समुत्थाय कृतपूर्वाह्णिकक्रियः ।
आराध्य कलशान् प्राग्वत् स्नपनाय समारभेत् ॥ ३३
द्वारदेशं[8] समासाद्य मूलमष्टशतं[9] जपेत् ।
वायुना[10] द्वारमुद्घाट्य दत्वाऽर्घ्यं वाग्यतः शुचिः ॥ ३४
मूलेन देवनिर्माल्यमपनीय बहिः[11] क्षिपेत् ।
संक्षाळ्य वारिभिः पूर्वं पञ्चगव्येन शोधयेत् ॥ ३५

---

9 अष्टोत्तरं । 10 वायुबीजेन । 11 चण्डसेनसमीपे ।

---

1 वय- ख 2-3-4 -न् क ग 5 मुबाहृतम् क
6 देवो क ग 7 ते ख 8 देशे ख

पौरुषेण च[1] सूक्तेन चूर्णैः सम्मृज्य सर्वतः ।
शुद्धोदैः क्षाळयित्वाऽथ पूजयित्वा यथाविधि ॥ ३६
अभ्यर्च्य विष्टरं पच्चाद् बिम्बं तत्वमयं स्मरन् ।
तत्वन्यासं विधायाथ देवमावाहयेद्गुरुः ॥ ३७
चिद्रूपं हृदयाम्भोजात्[2] ज्योतिरावाह्य विन्यसेत् ।
सकलीकृत्य मूलाङ्गैः पाद्यमर्घ्यं प्रदापयेत् ॥ ३८
गायत्र्या कौतुकं छित्वा हस्तौ प्रक्षाळ्य वारिभिः ।
मधुपर्कं तथाऽऽचामं दत्वा नीराज्य चास्त्रतः ॥ ३९
दूर्वाक्षतांश्च तारेण मूर्ध्निविन्यस्य पादयोः ।
उद्धृत्य मूर्ति-पैः कुम्भान् देवं[3] संस्नापयेद्गुरुः ॥ ४०
गायत्र्या द्रव्यकुम्भानामुद्धारः समुदाहृतः ।
शेषांस्तु मूलमन्त्रेण वास[4]स्तेनैव मोचयेत् ॥ ४१
मध्यकुम्भैः सहोद्धार्याः सर्वेऽन्ये[5] मध्यमं विना ।
ऋग्भिः पुरुषसूक्तस्य[6] सद्योजातादिसंयुतम् ॥ ४२
स्नापयेद्द्रव्यकुम्भांश्च ताभिर्मूलेन चेतरान्[7] ।
सद्योजातेन[8] वामेन वक्त्रेण बहुरूपिणा ॥ ४३
ईशानेन षडर्णेन[9] आप्यायस्वेत्त्यृचायुतम् ।
मधुवाता हृदा[10]युक्तमश्वत्थेवः शिरोयुतम् ॥ ४४
गायत्र्या शिखया सार्धं परं पुष्पावतीरिति ।
नेत्रेण[11] चापोहिष्ठेति[12] मार्जनं चास्त्रसंयुतम् ॥ ४५
रुद्रगायत्रिया[13] व्योमदशार्णै[14] कैकया[15] युतम्[16] ।

---

4 कलशाच्छादनवस्त्रं । 5 परिकुम्भाः ; अन्तर्नवके तु मध्यमं विना । 6 क्रमात् स्नानमन्त्रानाह । 7 परिकलशान् । 8 पुरुषसूक्ते सद्योजातादि योजनामाह । 9 प्रणवयुक्तपञ्चाक्षरेण । 10 पञ्चब्रह्महृदयेन, एवमुत्तरत्रा[illegible]ब्रह्मशिरः शिखादि ग्राह्यम् । 11 पुष्पावतीरित्यनेनान्वेति । 13 त[illegible]ति । 14 व्योमव्यापि मन्त्रेण । 15 त्रयोदश्या ऋचा ।

---

1 णै[illegible] 2 [illegible] 3 ततः ख [illegible]ठेन क ग 16 काद्वयम् ख

मध्यमोत्तममुद्दिष्टमुत्तमं कथयाम्यहम् ।
अष्टोत्तरशतं[1] मध्ये)[2] त्रिकैरष्टाभिरन्वितम् ॥ ६८
पञ्चकैश्च त्रिकैर्बाह्ये (सहितं चोत्तमाधमम् ।
बलां[3] वचामतिबलां शङ्खपुष्पं च सक्तु च ॥ ६९
सिंहीं व्याघ्रीं कुशं चैव त्रिकेष्वष्टसु मध्यतः ।
इन्द्राग्न्योर्मध्यमारभ्य शिवाङ्गैः[4] पूरयेत् क्रमात् ॥ ७०
ब्रह्मबीजेन तद्बाह्ये)[5] गुळाद्यैर्दिग्विदिक्षु च ।
त्रिकेष्वष्टाक्षरेणैव ततो नद्युदकादिभिः ॥ ७१
नद्यां समुद्रे वाप्यां च कूपे वर्षे हिमे तथा ।
तीर्थे च निर्झरे ग्राह्यं जलमष्टासु वै शुचि ॥ ७२
पञ्चकान् मूलमन्त्रेण बीजाद्यैः पूरयेत् क्रमात् ।
बीजैर्हेमजलैश्चैव दूर्वाभिः शालितण्डुलैः ॥ ७३
रजनीपुष्पतोयैश्च शेषान् शुद्धोदकैः क्रमात् ।
व्रीहिप्रियुङ्गुनीवारश्यामाकयववैणवान् ॥ ७४
गोधूमतिलमुद्गांश्च गृह्णीयाच्चणकानपि ।
पद्मं सौगन्धिकं जातिमल्लिकाबकुळं तथा ॥ ७५
प्रियङ्गुचम्पकं कुन्दं नन्द्यावर्तद्वयं तथा ।
पुष्पोदकार्थमुद्दिष्टं ग्राह्यं शुद्धासु भूमिषु ॥ ७६
ततस्तु[6] स्नापयेत् सर्वान् पूर्ववत् क्रमयोगतः ।
नवकैश्च त्रिकैर्बाह्ये मध्ये चाष्टोत्तरं शतम् ॥ ७७
पूर्वोक्तद्रव्यसंयुक्तं स्नानमुत्तममध्यमम् ।
एभिः संस्नापये देवं परमेष्ठिनमव्ययम् ॥ ७८
मध्ये[7] चाष्टशतं बाह्ये दिक्षु द्वादशकत्रयम् ।
मध्ये चतुष्कैः[8] कोणस्थैस्तथा षोडशकैर्युतम् ॥ ७९

1 त्रयोविंशतिपुटे । 3 अष्टत्रिकद्रव्याण्याह । 4 पञ्चब्रह्माङ्गैः समस्तैः । 7 पञ्चविंशतिपुटे

2-5 कंसाङ्किनो भागः क, ग पुस्तक त । 6 ततश्च ख 8 चतुष्के ख

उत्तमोत्तममुद्दिष्टं पूर्ववत् स्नपनं भवेत् ।
नवधा प्रोदितेष्वेषु द्रोणकुम्भं प्रपूरयेत् ।। ८०
शुभपात्रे समादाय सर्वद्रव्यगणं गुरुः ।
सर्वमन्त्रान्[1] समुच्चार्य तत्तस्मिन् मूलमन्त्रतः ।। ८१
क्षिपेद्गन्धोदकैः पूर्यं तस्मिन् देवं समर्चयेत् ।
साङ्गावरणसंयुक्तं वस्त्राभ्यां परिवेष्टयेत् ।। ८२
सम्पाताज्येन संस्पृश्य सहस्रमभिमन्त्रयेत् ।
स्नापनान्ते विभुं तेन[2] यथावदभिषेचयेत् ।। ८३
सङ्कीर्त्य रुद्रमखिलं व्योमव्यापिमनुं जपेत् ।
इति सम्यक् समाख्यातं स्नपनं विष्णुरुद्रयोः ।। ८४
एतत् कृत्वा यथान्यायं सर्वान् कामानवाप्नुयात् ।। ८५

इति क्रियासारे (सप्तविंशः) हारीते सप्तमः पटलः

अष्टमः पटलः

अथोत्सवविधिं वक्ष्ये गौरीपद्माप्तेः क्रमात् ।
मङ्गलाङ्कुरारोपं च कृत्वा प्रागुक्तवर्त्मना ।। १
ध्वजान् संस्थापयेत् पश्चात् नन्द्याद्यैः कुमुदादिभिः ।
ग्रामपर्यन्तदेशे च स्थापयेत् तोरणादिकान्[3] ।। २
बलिपीठं च सङ्कल्प्य चैत्यारामादिकेषु च ।
सम्मार्ज्य ग्रामवीथीश्च समालिप्य समन्ततः ।। ३
गन्धोदैः प्रोक्ष्य कुपुमैरक्षतैर्विकिरेच्छुभैः[4] ।
प्राकाराभ्यन्तरे बाह्ये विशेषेण प्रकल्पयेत् ।। ४

2 द्रोणकुम्भेन । 3 आदिपादात् ध्वजान् ॥

1 मन्त्रं ख 4 च्छनैः ख

दीपप्रासाद[1]जातीश्च दीपस्तम्भांश्च कल्पयेत् ।
दीपमालाश्च परितो यन्त्रदीपान् विशेशतः ।। ५
एतत् सर्वं विधायादौ द्रव्याद्यम् पूजयेद्विभुम् ।
संस्नाप्य शुद्धतोयैश्च पयोदध्याज्यगव्यकैः[2 3] ।। ६
पञ्चगव्यैश्च बालाद्भिः[4] कलशैश्च समर्चि-तैः ।
वस्त्रैर्नानाविधैर्देवमलङ्कृत्य नवैः शुभैः ।। ७
मुकुटाद्यैश्च रत्नाढ्यैरलङ्कुर्याच्च मण्डनैः ।
गन्धैःसुयोजितैर्हृद्यैर्लिप्त्वाऽर्चां विधिचोदितैः ।। ८
स्थलजैर्जलजैः पुष्पैरम्लानैश्च सुगन्धिभिः ।
पूजयेद्देवदेवेशं मालाभिः सुगन्धिभिः ।। ९
चन्दनागरुकर्पूरगुग्गुलाद्यैः सुशोभनैः ।
बहुलं कल्पयेद्धूपं दीपं च बहुवर्ति भिः ।। १०
एवमाराध्य तं देवं[5] निवेद्यं च प्रदापयेत् ।
भक्ष्यभोज्यादिसंयुक्तं सघृतं सोपदंशकम् ।। ११
शाल्यन्नं बहुदेवाय ततोऽग्नौ होममाचरेत् ।
पीठाद्यै[6]र्मनुभिर्हुत्वा मूलेनावृत्य होमयेत् ।। १२
दशांशमङ्गमन्त्राणामन्येषा[7]मेकशः क्रमात्[8] ।
हुतशेषान्धसा भूयो भूतेभ्यो बलिमाहरेत् ।। १३
ततः प्रदक्षिणीकृत्य नमस्कृत्य विसर्जयेत् ।
निवेदितं च सकलं चन्डसेनाय कल्पयेत् ।। १४
तोयमाचमनं दत्वा गन्धाद्यैः पूजयेत् ततः ।
पानीयं मुखवासं च निवेद्यैस्तैर्यथाविधि ।। १५
ध्यात्वा जप्त्वा ततस्तुत्वा स्तोत्रैर्नानाविधैर्विभुम् ।
अभिवाद्य क्षमस्वेति सम्प्रार्थ्यार्घ्यं प्रदापयेत् ।। १६

---

3 गोभवैः । 4 बालकेसराद्भिः । 6 आद्यपदेन पूजामन्त्रैः । 7 परिवाराणां ।

---

1 प्रसाद क ग 2 गन्धकैः क ग 5 भक्त्या तं क ग 8 ञ्च दशांशतः ख

रात्रावपि समाराध्य पत्रच्छेदादिसंयुतम् ।
कौतुकें देवमाराध्य शिश्यमूर्ध्नि निधापयेत्[1] ।। १७
गन्धपुष्पादिसंयुक्तं भूतानां बलिमाहरेत् ।
पाद्यमाचनं दत्वा गन्धपुष्पादिभिर्यजेत् ।। १८
द्वाःस्थादींश्च बलिं तेभ्यो दद्याद्भक्त्या[2]समन्वितम् ।
भूतक्रूरान्धसा पार्श्वमण्डले पार्षदां बलिम् ।। १९
दद्याद् द्वाःस्थादिकान् वक्ष्ये नाम तेषां मनुर्भवेत्[3] ।
नन्दि चण्डं[4] जयत्सेनं विष्वक्सेनं[5]वृषं तथा ।। २०
पुरतो गरुडं चापि पृष्ठेऽनन्तं समर्चयेत् ।
गणेशं दक्षिणामूर्तिं दक्षिण[6]द्वारि पूजयेत् ।। २१
इन्द्रादीन् लोकपालांश्च ब्रह्माणं शर्वसन्निधौ ।
अनन्तं नैर्ऋते भागे मातृर्याम्ये समर्चयेत् ।। २२
गन्धर्वं वीरभद्रं च गणेशं[7] पूर्वपश्चिमे ।
ब्राह्मीं माहेश्वरीं चैव कौमारीं वैष्णवीं तथा ।। २३
वाराहीं च तथेन्द्राणीं चामुण्डीमर्चयेत् क्रमात् ।
दत्वा तासां बलिं भूयः पार्षदां चापि दापयेत् ।। २४
मातृभ्यो लोकमातृभ्यः सर्वमातृभ्य इत्यपि ।
सर्वमातृगणेभ्यश्च ताभ्यश्चापि बलिं हरेत् ।। २५
शास्तारं[8] च तथा दुर्गां[9] षण्मुखं च यथाविधि ।
चण्डसेनं च सम्पूज्य बलिं दत्वा बहिर्व्रजेत् ।। २६
गोपुरद्वारि देव्यौ च[10] शूलारी[11] पूजयेद्बहिः ।
नन्द्यादीन् कुमुदादींश्च समभ्यर्च्य बलिं हरेत् ।। २७

---

4 अन्तर्द्वारपालौ । 5 बहिर्द्वारपालौ । 7 मातृद्वारपालौ ।
8 मातृपश्चिमतः । 9 वायुसन्निधौ । 10 उमाश्रियौ ।
11 शूलपाणिं, चक्रपाणिं ।

---

1 निधाय च ख 2 भक्ष- ख 3 क्रमात् क 6 णे क ग

प्राकारात्तु बहिर्दिक्षु सर्वेषां[1] परिषदामपि[2] ।
बलिपीठं तु सम्प्राप्य प्रक्षाळ्य सलिलैः शुभैः ॥ २८
पुष्पं च निक्षिपेत्तस्मिन् मन्त्रमेनमु[3]दीरयेत् ।
तत्र सम्पूजयेत् सर्वान् देवपारिषदान् गुरुः ॥ २९
आयान्तु पार्षदाः सर्वे शाङ्करा वैष्णवाश्च ये ।
बलिपीठेऽत्र सन्तुष्टा निवसन्तु यथा सुखम् ॥ ३०
ओं नमः पार्षदेभ्यश्चेत्याराध्य च बलिं हरेत् ।
विकीर्यैवं बलिं तत्र बाह्येऽनेन बलिं हरेत् ॥ ३१
गृह्णन्तु बलिमेतन्तु[4] बाह्यस्था विहगाननाः ।
ये क्रूरा येऽल्पसत्वाश्च भूतप्रेतनिशाचराः ॥ ३२
वेताळाश्चैव मातङ्गा हीनाऽहीनाश्च ये गणाः ।
तेषां सर्वेषां बलिं हरामि तेभ्यस्ताभ्यो नमो नमः ॥ ३३
देवग्रहादीनां चैवं दत्वाऽथ परितो बलिम् ।
उत्तरे क्षेत्रपालाय प्रदद्याद्भक्तिसंयुतः ॥ ३४
आरम्भ[5]दिवसे रात्रौ शेषाहस्तु दिवाऽपि च ।
अन्नाद्य[6]बलिभूयिष्ठं[7] जयनादसमन्वितम् ॥ ३५
उत्सवं विधिवत् कृत्वा यात्रापूर्वदिने निशि ।
महाबलिप्रदानं च कृत्वा सम्प्रार्थयेद्विभुम् ॥ ३६
तीर्थयात्रा त्वया देव श्वः कर्तव्या सुरेश्वर ।
तत्र प्रतिसरा[8]रम्भं[9] त्वमनुज्ञातुमर्हसि ॥ ३७
इति प्रार्थ्य ततः शय्यामास्तीर्याराध्य तां पुनः ।
कौतुकं बन्धयेत् पश्चात् घृतारोपणपूर्वकम् ॥ ३८
पुण्याहं विधिवत् कृत्वा क्षौमे निक्षिप्य सर्षपान् ।

---

1 उभयेषां । 7 अन्नदानादिना बलिना च । 9 प्रतिसरः—कौतुकम् ।

2 तेषां परिषदामपि क ग 3 मेतदु ख 4 त्तु ख
5 म्भे ख 6 द्यं ग 8 मां- क

मुक्ताफलं च कनकमूर्णासूत्रेण बन्धयेत् ॥ ३९
मूलमन्त्रेण देवस्य भुजाभ्यां दक्षिणे भुजे ।
आवाह्याराध्य वस्त्राभ्यामाच्छाद्य शयनं नयेत् ॥ ४०
गन्धाद्यैस्तत्र सम्पूज्य (मूलमन्त्रेण शाययेत् ।
अयः पुराद्यैः[1] सम्पूज्य[2] निशां जागरितो नयेत् ॥ ४१
प्रातः स्नात्वा समुत्थाप्य कर्म तत्रोचितं चरेत् ।
अन्तः प्रवेश्य सम्पूज्य)[3] पिष्टचूर्णानि कारयेत् ॥ ४२
सम्पूज्य देवं संस्नाप्य चूर्णैरुन्मृज्य सादरम् ।
संहृत्य चूर्णं सकलं भक्तानां मूर्ध्नि दापयेत्[4] ॥ ४३
संस्नाप्य गन्धपुष्पैश्च धूपदीपैः समर्चयेत् ।
यात्राहोमं च विधिवत् कृत्वा पुण्याहमाचरेत् ॥ ४४
कौतुकं तल विन्यस्य ततो विज्ञापयेद्विभुम् ।
कर्मार्चा तीर्थयात्रार्थं तवेयं कल्पिता विभो ॥ ४५
तीर्थयात्रां कुरुष्वास्यां सङ्क्रम्यानुग्रहाय नः ।
तस्मिन् तत्वानि संहृत्य चोत्पाद्य विधिपूर्वकम् ॥ ४६
आवाह्य मूलमन्त्रेण तस्मिन् देवं नियोजयेत् ।
पूजयेत् सकलीकृत्य वस्त्राभ्यां परिवेष्टयेत् ॥ ४७
दक्षिणेन तमादाय पाणिना वाग्यतः स्वयम् ।
द्वारदेशं[5] समासाद्य मङ्गलानि[6] गुरुर्वदेत् ॥ ४८
वदेयुर्ब्राह्मणाः सर्वे मङ्गलान्ते तथाऽस्त्विति ।
निर्गत्य द्वारमावृत्य शिष्यहस्ते प्रदाय ताम् ॥ ४९
द्वाःस्थादिभ्यो बलिं दत्वा निर्गच्छेत् सप्रदक्षिणम् ।
ततो वाहनमासाद्य वृषभं गरुडात्मकम् ॥ ५०

1 अगरुगुग्गुल्वाद्यैः सन्धूप्य । 2 व्याख्यानुसारेण सन्धूप्येति भाव्यम् ।
6 जगन्निर्माणेत्यादि ।

3 कंस[illegible]ः ख पुस्तके नास्ति । 4 निक्षिपेत् ख 5 शे ख

ध्यात्वा प्रोक्ष्य समारोप्य व्रजेद्यत्र तु निम्नगा ।
छत्रव्रातैस्ततो दीपैर्ध्वजैर्वाद्यैः समस्तकैः ॥ ५१
द्विजैश्च दासैर्दासीभिः सेनाभिश्च समन्वितः ।
गन्धं पुष्पं जलं धूपं दीपमन्नं च पालिकाः ॥ ५२
आदाय विप्रा गच्छेयुः सोत्तरीयाः स्वलङ्कृताः ।
क्ष्वेलैर्वा-द्यैस्ततो नृत्तैः सिंहनादैश्च पुष्कलैः ॥ ५३
पथि घोषं जनाः सर्वे[1] गच्छेयु[2]र्मुदिता भृशम् ।
तीर्थतीरं समासाद्य स्थण्डिले[3] कौतुकं न्यसेत् ॥ ५४
पूजयित्वा यथान्यायं पाद्यार्घ्याचमनं ददेत् ।
तीर्थमावाह्य मूलेन सर्वेणा[4]दाय तं पुनः ॥ ५५
परमेष्ठ्यात्मना[5] मज्जेत् त्रिः कृत्वः प्रणतो विभुम् ।
वेद्यां निवेश्य तं देवं पाद्यमाचमनं ददेत् ॥ ५६
अङ्गिरङ्गैः[6] पञ्चभिः[7] प्रोक्ष्य चूर्णै[8]रुन्मृज्य सादरम् ।
कृत्वाघमर्षणं स्नायात्[9] जनौघैः सहितो गुरुः ॥ ५७
वेद्यां निवेश्य विधिवत् पूजयित्वा यथाक्रमम् ।
यानमारोप्य तं देवं गच्छेद्द्रुततरम् गृहम् ॥ ५८
अर्वागस्तमयाद्देवं मूलबिम्बे नियोजयेत् ।
गन्धपुष्पाक्षतोपेते तोये चावाह्य पञ्चभिः ॥ ५९
मूलमन्त्रेण संयुक्तं यात्रादावन्ततस्तथा ।
सकळीकृत्य सम्पूज्य रात्रौ भूतबलिं हरेत् ॥ ६०
प्रभाते स्नपनं कुर्यादुत्तमादि स्वशक्तितः[10] [11] ।
ब्राह्मणान् भोजयेत् पश्चाद्दद्याच्च गुरुदक्षिणाम् ॥ ६१

---

1 कुर्वन्त इति शेषः । 3 वेदिकायां । 4–5 तत्वरूपेण ।
6 आपोहिष्ठादिभिः । 7 गुह्यमन्त्रैः । 8 पञ्चतत्वहुतसम्पातसहितैः ।
10 उत्तममध्यमाधमान्यतमप्रकारेण ।

---

2 कुर्युर्गच्छन्तः क ग 9 स्नात्वा क ग 11 उत्तमादिक्रमेण तु घ

मूर्तिपांश्च सदस्यांश्च ततः शक्त्या समर्चयेत् ।
नृत्तं गीतं च वाद्यं च विविधं कारयेत्ततः ॥ ६२
समासात् स्थापनं[1] प्रोक्तं शम्भुविष्ण्वोर्महात्मनोः ।
एतत् कृत्वा च विधिवच्छाश्वतीं गतिमाप्नुयात् ॥ ६३
उत्पातं [तो] यदि जायेत तत्र कुर्याच्च निष्कृतिम् ।
उत्पातस्यानुरूपेण गुरुः शैवीं च वैष्णवीम् ॥ ६४

इति क्रियासारे (अष्टविंशः) हारीशे अष्टमः पटलः



दुर्गाभागः[2]

प्रथमः पटलः

शिरसाऽहं नमस्कृत्य दुर्गां दुर्गार्तिहारिणीम् ।
प्रतिष्ठां प्रकृते[3]र्वक्ष्ये धर्मकामार्थमोक्षदाम् ॥ १
सर्वशास्त्रेषु निर्दिष्टं सर्वं सङ्गृह्य लक्षणम् ।
विशेषतस्तु यत्तेषु प्रोक्तं वक्ष्ये समासतः ॥ २
नै[4]कस्मिन्नागमे प्रोक्ताः प्रायशः सकलाः क्रियाः ।
तस्मात् संक्षेपतो वक्ष्ये साधकानां हिताय वै ॥ ३
या या क्रियाऽऽगमेषूक्ता स्थापनार्थं मनीषिभिः ।

2 यद्यपि क, गयोरादर्शयोर्द्वयोरपि दौर्गात् पूर्वं स्कान्दमुक्तं तथाऽपि दौर्गे पटलसंख्यानिर्देशः दौर्गपूर्वतायामेव युज्यते । प्रायशः अनुष्ठान-पद्धतितन्त्रसमुच्चयौ ख पाठमेवानुसरतः । प्रकृतितन्त्रानन्तरं तत्पुत्रतन्त्रकथनं च न्यायसिद्धमिति मयाऽपि ख पाठ एवाद्रियतः ।
3 दुर्गायाः ।

1 स्नपनं क ग 4 ए- क ग

तां तामादाय सन्धाय वक्ष्ये कर्म यथाक्रमम् ॥ ४
स्वशाखोक्तां क्रियां कर्तुमशक्तः परशाखिनाम् ।
क्रियामाचरतो यद्वत् तद्वत् कर्मोच्यते मया ॥ ५
दुर्गायाः स्थापनं कर्तुं भक्तो यत्नं करोति यः ।
स गुरुं प्राप्य विधिवत् तेन कर्माणि कारयेत् ॥ ६
सोऽपि भूमिं परीक्ष्याग्रे ज्ञात्वा लक्षणसंयुताम् ।
प्रासादं कारयेत् तत्र शिल्पिभिः शास्त्रकोविदैः ॥ ७
स्निग्धा रन्ध्रविहीना या बहुपुष्पफलद्रुमा ।
बहु[1]पांसुरशुष्काम्बुः क्षिप्रं व्रीह्यादिरोहणा ॥ ८
न्यायार्जिता समतळा क्षीरवृक्षसमन्विता ।
या रम्या पशुमर्त्यानां पूर्वतो जलसंयुता ॥ ९
प्राक् सौम्येशप्लवा रम्या सर्वकालं मनोरमा ।
सुवर्णा सर्ववर्णानामानु[2]पूर्व्येण वा यदि ॥ १०
मधुरा चतुरश्रा या श्वेता च घृतगन्धिनी ।
विप्राणां क्षत्रियाणां च रक्तेष्टांशाधिकायता ॥ ११
असृग्गन्धा कषाया च वैश्यानां पीतवर्णिनी ।
षड्भागाधिकमायामा तिक्तगन्धाऽजमूत्रवत् ॥ १२
सुरागन्धा च कटुका[3] चतुरंशाधिकायता ।
कृष्णा या सैव शूद्राणां भूमिः प्रोक्ता विजानता ॥ १३
एवं विधां महीं प्राप्य प्राकारान्तं प्रकल्प्य तु ।
भूतकूरबलिं दत्वा[4] ततो विज्ञापयेद्गुरुः ॥ १४
देवदानवगन्धर्वपिशाचाश्चापि राक्षसाः ।
नागाः सर्पास्तथा कीटा येऽत्र तिष्ठन्ति जन्तवः ॥ १५
ते सर्वेऽन्ये च जानन्तु प्रयान्त्वस्माद्यथासुखम् ।

---

4 देवताभ्यः इत्यनेन ।

---

1 भूरि क ख 2 मन्तः क 3 कटका क

देव्यर्थं प्रतिगृह्णामि साऽस्माकं क्षम्यतामिति ॥ १६
विज्ञाप्यैवं ततः शङ्कूंश्चकेणाराधितान् क्रमात् ।
स्थापयेद्दिक्षु तेनैव[1] सूत्रं तेन प्रसारयेत् ॥ १७
दुष्टं द्रुमं यदि भवेत् तत्र तच्छोद्धृत्य[2]मज्जसा ।
अन्तरे विहितान् वृक्षान् स्थापयेद्वा प्रयत्नतः ॥ १८
एवं ज्ञात्वा प्रयत्नेन गृह्णीयाच्छुभलक्षणाम् ।
भूमेः परिग्रहं चैवं कृत्वा मूलेन देशिकः ॥ १९
कर्षणं बीजवपनं सेचनं रक्षणं तथा ।
दत्वाऽथ फलिते गोभ्यः सुमुहूर्ते खनेत् क्षितिम् ॥ २०
जलान्तं वा शिलान्तं वा पुरुषमात्रमथापि वा ।
वास्तुपूजां क्रमात् कृत्वा गर्तं संशोध्य यत्नतः ॥ २१
निधिं कूर्मशिलां चापि[3] न्यस्त्वा गर्तं प्रपूरयेत् ।
द्वारस्य दक्षिणे भागे विन्यसेत् प्रथमेष्टकाम् ॥ २२
तत्रोत्तरेऽग्निकार्यं तु कृत्वा सर्वत्र चोक्तवत् ।
कृत्वा चाग्निमुखं पक्वहोमा[4]न्मूलाक्षरै[6]र्हुनेत् ॥ २३
घृतं हुत्वा च दुर्गाया[6] मूलेन समिदादिकम् ।
अन्यदन्यत्र चोक्तेन समं मूलेन चेष्टकाः ॥ २४
सम्पाताज्येन संस्पृश्य प्रादक्षिण्येन विन्यसेत् ।
गर्भविन्यासमप्येवं सर्वत्रोक्तेन वर्त्मना ॥ २५
विधाय शिल्पिभिर्भूयः प्रासादं कल्पयेद्दृढम् ।
प्राकारगोपुरोपेतं पूजामण्ड[7]संयुतम् ॥ २६
प्रतिमां कारयेद्यत्नात् सर्वलक्षणसंयुताम् ।
एवं सर्वं समापाद्य ततः कर्म समारभेत्[8] ॥ २७
उत्तरेत्वयने शुक्लपक्षे शुभदिने तिथौ ।

1 सुदर्शनेनैव । 4 पूर्वं । 6 आद्यया पक्वं हुत्वेति शेषः ।

2 च्छेद्य क 3 वाऽपि क 5 तै क 7 ल क 8 चरेत् क

शुभग्रहोदये दृष्टे रात्रौ कर्म समाचरेत् ॥ २८
प्राक् शुभेऽहनि सप्ताहादङ्कुरार्पणमाचरेत् ।
मूलेन सेचनं भूयस्त्रिसन्ध्यमुपचारतः[1] ॥ २९
पात्राणां देवताश्चापि बीजानां च समर्च-येत् ।
रात्रीशेभ्यो बलिं दद्याद्रात्रौ द्रव्यसमन्वितम् ॥ ३०
गन्धपुष्पादिभिः सम्यगाराध्य विधिवद्गुरुः ।
भूताश्च पितरो यक्षा नागा ब्रह्मग्रहास्तथा ॥ ३१
शैवाश्च वैष्णवास्तत्र पूज्यास्तेभ्यो बलिं हरेत् ।
नालिकेरपयः सक्तुशालिपिष्टविमिश्रितैः ॥ ३२
लाजसक्तुनिशाचूर्णदधिभिः कृसरा[2]न्वितैः ।
पूजयित्वा बलिं पूर्वेदिने रात्रौ समाचरेत्[3] ॥ ३३
तण्डुलैश्च तिलैर्दद्यात् द्वितीयेऽह्नि[4] बलिं गुरुः ।
धानोड्डम्बिक[5]लाजैस्तु ततो यक्षबलिं हरेत् ॥ ३४
नालिकेरपयःसक्तुशालिपिष्टविमिश्रितैः ।
चतुर्थेऽह्नि शिवे [दिवसे] दद्यात्ततो नागबलिं बुधः ॥ ३५
पद्माक्षतैस्ततो[6] ब्राह्ममपूपेनान्धसा पुनः ।
षष्ठं शैवं[7] गुळान्नेन सप्तमं वैष्णवं[8] तथा ॥ ३६
ध्वजं संस्थापयेदग्रे सिंहमन्त्रेण देशिकः ।
तन्मूले वेदिकां कृत्वा मन्त्रेणानेन पूज[9]येत् ॥ ३७
ओं वज्रनखदंष्ट्रायुधाय महासिंहाय[10] हुं[11] नमः ।
प्रतिष्ठादिवसात् पूर्वं पञ्चमेऽह्नि गुरुः स्वयम् ॥ ३८
स्नात्वाऽऽचम्य विधानेन सकलीकृत्य संयतः[12] ।

---

1 ओं ह्रीं ओं । 2 तिलैः सह पक्वमोदनम् । 4 रात्रौ।
5 ईषद्भ्रष्टसितलाजा इति नारायणः । 6 पञ्चमेह्नि ।
7 अपूपेनेत्यनेनान्वेति । 8 वैष्णवग्रहाणां । 11 हुंफडन्तत्वमपि ।

3 बलिं हरेत् ख 9 सिंहमन्त्रेण चार्च- ग 10 सिंह ख
12 संयुतः ख

प्रतिमां परि[1]गृह्णीयात् प्रणवेन विचक्षणः ॥ ३९
प्लुतप्रणवमुच्चार्य पादयोस्तां तदा स्पृशेत् ।
क्षाळयेद्गाळितैस्तोयैर्द-र्भैः सङ्कृष्य[2] सर्वतः ॥ ४०
गोवालैर्मधुसर्पिर्भ्यामालिप्य क्षाळयेत् पुनः ।
गन्धपुष्पै रलङ्कृत्य वह्निकार्यं[3] समाचरेत् ॥ ४१
शमीदळाक्षतैर्हुत्वा व्याहृतीभिः शतं शतम् ।
भूरादिसत्यपर्यन्तैर्दद्यात् पूर्णाहुतिं पृथक् ॥ ४२
प्रतिमां समुपस्थाय कौतुकं बन्धयेदथ ।
नमस्तेऽर्चे सुरेशानि विश्वावासेऽसुरारिणि ॥ ४३
प्रभाविताशेषजगद्धात्रि तुभ्यं नमो नमः[4] ।
त्वयि सम्पूजयामीशे देवीं नारायणीं सदा ॥ ४४
रहिता योनिदोषैस्त्वमृद्धियुक्ता सदा भव ।
इति पुष्पं विकीर्याग्रे बध्नीयात् कौतुकं पुनः ॥ ४५
क्षौमे वाससि निक्षिप्य सिद्धार्थं चक्रमन्त्रतः ।
ऊर्णासूत्रेण बध्नीयात् पाणिभ्यां दक्षिणे करे ॥ ४६
तारेण निक्षिपेद्दूर्वां साक्षतां[5] मूर्ध्नि पादयोः ।
नीराज्य वस्त्रयुग्मेन संवेष्ट्य फलकोपरि ॥ ४७
विन्यस्य प्रतिमां भूयः शाकुनेन नयेज्जलम् ।
बहुदीप[6]ध्वजच्छत्रवाद्यैः कोलाहलान्वितम् ॥ ४८
न्यस्त्वा तोयसमीपे तां[7] जलं संशोधयेदथ ।
योगपीठं प्रकल्प्यास्मिन् बिम्बं संहारमार्गतः ॥ ४९
संहृत्याग्निमयं ध्यात्वा तोये तारेण विन्यसेत् ।
प्राक् शिरस्कं ततश्चक्रमन्त्रमष्टावरं जपेत्[8] ॥ ५०

---

3 अक्षतहोमम् । 8 बिम्बं स्पृशन् ।

---

1 प्रति ख 2 सम्मृज्य ख 4 स्तुते ग
5 तान् ग 6 रूप ख 7 तत् क ग

लोकपालान् बहिर्ध्यात्वा कुर्याच्चाळत्रयादिकम् ।
दीपमप्यहतं न्यस्त्वा रक्षार्थं योजयेद्भटान् ॥ ५१
त्रिरात्रं वासयेद्देवीबिम्बं तोये विचक्षणः ॥ ५२

इति क्रियासारे (एकोनत्रिंशः) दौर्गे प्रमथः पटलः

द्वितीयः पटलः

प्रासादं तक्षकैर्मुक्तं शोधयेच्च विधानतः ।
सूत्रेण दर्भ[1]दाम्ना च वेष्टयित्वा समन्ततः ॥ १
मार्जयेत् सर्वतो गेहमस्त्रमन्त्रेण यत्नतः[2] ।
संक्षाळ्यालिप्य सर्वत्र सर्षपान् विकिरेदथ ॥ २
भूयः संमार्ज्य गन्धोदैर्वि-लिप्य विकिरेत्पुनः ।
धान्यानि पूर्णकुम्भं च न्यस्त्वास्मिन् चक्रमर्चयेत् ॥ ३
राक्षोघ्नसूक्तमसकृज्जप्त्वा तालत्रयादिकम् ।
कृत्वा निर्गत्य चाग्नेय्यां राक्षोघ्नं होममाचरेत् ॥ ४
यथोद्दिष्टेन मार्गेण चक्रेण समिदादिकम् ।
हुत्वा होमं समाप्याथ तेन सम्पातसर्पिषा ॥ ५
अपामार्गरसोपेतं हुतमन्त्रैश्च सर्वतः ।
सम्प्रोक्ष्य भवनं भूयो वास्तुहोमं समाचरेत्[3] ॥ ६
तमग्निमीशे निक्षिप्य सर्वत्रोक्तेन वर्त्मना ।
समिदादिचतुर्द्रव्यमाधयैवेह[4] होमयेत् ॥ ७
दूर्वाश्च शन्न मन्त्रेण शेषं सर्वत्र चोक्तवत् ।
पुण्याहान्तं क्रमात् कृत्वा मण्डपं शोधयेदथ ॥ ८

4 जातवेदस इत्यनया ।

1 णैव च क 2 देशिकः क ख 3 श्लोकद्वयं क ख पुस्तकयोर्नास्ति

प्रासादस्याग्रतः कृत्वा मण्डपं लक्षणान्वितम् ।
अलङ्कृत्य यथाशोभं कुर्यात् कुण्डानि दिक्ष्वथ ॥ ९
चतुरश्रं धनुर्वक्रं वृत्तं चैव त्रिकोणकम् ।
पद्माकारं[1] क्वचित् प्रोक्तं कुण्डमुत्तरतः स्थितम् ॥ १०
कृत्वैवं वेष्टयेत् सूत्रैर्मालया दर्भकल्पया ।
तोरणानि चतुर्दिक्षु स्थापयेद्द्वारदेशतः ॥ ११
अश्वत्थं वटजं तद्वदौदुम्बरमथापरम् ।
प्लाक्षं वेदादिमन्त्रैश्च[2] स्थापयेत्पूर्वतः क्रमात् ॥ १२
एषु सम्पूजयेत्तेषां देवताश्च स्वनामभिः ।
यज्ञेशं पूर्वतो याम्ये प्रभाकरमथार्चयेत् ॥ १३
पश्चिमे चोत्तरे तद्वन्मङ्गलं सुप्रभं यजेत् ।
द्वौ द्वौ द्वारि ध्वजौ स्थाप्यौ तोरणाभ्यन्तरे क्रमात् ॥ १४
सितारुणौ पीतकृष्णावापीतो धूम्र[3] एव च ।
कर्बुरा[4]वष्टवर्गादिबीजयुक्तैः[5] स्वनामभिः[6] ॥ १५
काळ्यादिभिर्ध्वजाः स्थाप्यास्तेषु तास्ताभि[7]रर्चयेत् ।
तेषां बलिं क्रमात् कृत्वा प्रविश्य कलशेर्चयेत् ॥ १६
लोकपालान् क्रमात् भूयो मार्जयेदस्त्रमन्त्रतः ।
आलिप्य सर्षपान् जप्त्वा विकीर्याथ प्रजापयेत् ॥ १७
भूयो विलिप्य विकिरान् जपेदष्टोत्तरं शतम् ।
मूलमन्त्रं ततो गव्यं योजयेत् प्रोक्षयेत् पुनः ॥ १८
विकिरान् विकिरेत् तिष्ठन् मूलेनोत्तानपाणिना ।
त्रिधा तानथ सम्मृज्य लेपयेद्गन्धवारिणा[8] ॥ १९

---

1 उत्तरस्थमेव ; शिरःस्थाने चतुरश्रं सामान्यतः सिद्धम् ।
2 अग्निमीळे, इषेत्वा, अग्न आयाहि, शन्नो देवीति ।
3 पश्चिम एव । 5 अकचटतपयशात्मकैर्यथा – अं काळ्यै, कं कराळ्यै इत्यादि । 7 तोरणदेवताभिः सह ।

4 कर्पुरा- ख 6 तः ग 8 भिः क ग

अक्षतांश्च विकीर्याथ यजेन्मध्ये च दिक्षु च[1] ।
मूलेन लोकपालानां नामभिश्च यथाक्रमम् ॥ २०
ताळत्रयं दिशाबन्धमग्निप्राकारमेव च ।
कल्पयित्वाऽस्त्रमन्त्रेण शाङ्कर्यां कलशेऽर्चयेत् ॥ २१
हेमपुष्पा[2]क्षतोपेतगन्धपुष्पसमन्विते[3] ।
मूलेन देवीं गन्धाद्यैः साङ्गां सावरणां क्रमात् ॥ २२
वर्धनीं पूरयेत् पश्चाच्चक्रेणास्यां समर्चयेत् ।
वर्धन्या पातयेद्धारां कुड्यश्लेषां[4] प्रदक्षिणाम् ॥ २३
ऐशानीं दिशमारभ्य तदन्तं चक्रमन्त्रतः ।
कलशं पृष्ठतो नीत्वा स्थापयेद्विकिरोपरि[5] ॥ २४
पूरयित्वा[6]ऽथ वस्त्राभ्यामेकेनाच्छाद्य चोभयम् ।
ततोऽग्निं जनयेत् कुण्डे प्रतीच्यां[7] मूलवर्णकैः ॥ २५
व्रतबन्धादि पर्यन्तं[8] पूर्णां मूलेन वै ददेत् ।
आवाह्य पूजयित्वाऽथ मूलेनाङ्गैश्च होमयेत् ॥ २६
शयनं कल्पयेद्भूयो लिखित्वा स्वस्तिकं शुभम् ।
धान्यानि निक्षिपेत्तस्मिन्नास्तरेदम्बरैः शुभैः ॥ २७
तण्डुलानपि[9] मूलेन तत्र निक्षिप्य चास्तरेत् ।
शय्यामास्तरणोपेतां पादगड्डुक[10]शोभिताम् ॥ २८
शिरोपधानसंयुक्तां मूलमन्त्रेण देशिकः ।
शय्यामाराध्य विधिवत् कलशान् परितो न्यसेत् ॥ २९
तेषु सम्पूजयेद्दूतीर्गन्धपुष्पादिभिः क्रमात् ।
शय्याकुम्भान्तरे दिक्षु विन्यसेदष्टमङ्गलम् ॥ ३०

5 वर्धनीं सर्षपोपरि स्थापयित्वा । 6 वर्धनीं । 7 आचार्यकुण्डं विना होमपक्षे । 8 सप्तक्रियाः केचनाष्टक्रिया इच्छन्ति ।
9 अपि शब्दात्तिलान् सर्षपान् ।

1 वै क ग 2 रत्ना ग 3 तं ग
4 कुड्यश्लेषं ख 10 गण्डुक- ख

श्रीवत्सं पूर्णकुम्भं च भेर्यादर्शनमत्स्यकम् ।
अङ्कुशं शङ्खमावर्त[1]मेतद्देव्यष्टमङ्गलम् ॥ ३१
दीपांश्च परितो न्यस्येत्तथैवाङ्कुरपात्रकान्[2] ।
मण्डलं संलिखेत् सौम्ये शक्ति[3]दण्डं तु भद्रकम् ॥ ३२
चतुष्करं तु संगृह्य चतुरश्रं प्रसाधयेत् ।
तदष्टदशधा भूयो विभजेत् सुसमं यथा ॥ ३३
षट्त्रिंशद्भिर्लिखेत् पद्ममष्टपत्रं सुशोभनम् ।
बहिः पङ्क्त्यैकया पीठं तत्र कोष्ठानि[4] मार्जयेत् ॥ ३४
कोणेषु त्रितयं दिक्षु चतुष्कं पादगात्रकम् ।
द्वाभ्यां वीथीं[5] तथा द्वाभ्यां द्वारादीनि चतुर्दिशम् ॥ ३५
कल्पयित्वा बहिः पङ्क्त्या कुर्याच्छक्ति-चतुष्टयम् ।
दिक्षु मध्यमसूत्राणां पार्श्वगोभयकोष्ठयोः ॥ ३६
अन्तः सन्धिगतं सूत्रं तृतीयस्य तु मध्यगम्[6] ।
तिर्यक् प्रसार्य चास्फाल्य भ्रामयेन्मुष्टिमञ्जसा ॥ ३७
उभयोः पार्श्वयोर्मध्ये च्छोटिकां[7] [8] विन्यसेद्गुरुः ।
भ्रामयेत्तेन मानेन तदर्धेनास्य कोणगम् ॥ ३८
कोणकोष्ठचतुष्काणां पार्श्वको[9]ष्ठं तु[10] सन्धिगम् ।
सूत्रमास्फालयेत् तिर्यक् तृतीयस्य तु मध्यगम् ॥ ३९
मुष्ट्यर्धं सन्धिगं कृत्वा रजसा पूरयेत् क्रमात् ।
कर्णिकां पीतवर्णेन पत्रं शुक्लेन पूरयेत् ॥ ४०
दले दलेऽरुणेनैव केसराणां द्वयं द्वयम् ।
आपीतमूलं पीताग्रं पृथुलग्नं प्रपूर[11]येत् ॥ ४१

---

1 नन्द्यावर्तं । 2 छान्दसो लिङ्गव्यत्ययः, पात्रोपेतपदार्थान् वा ।
4 उत्तरेणान्वेति । 7 मुद्रां ।

---

3 शक्ति क ख 5 वीथीः ग 6 कं ख 8 च्छेदिकां ख
9 गो- ग 10 कोणं तु क 11 सिताग्रम् तत्प्रकल्प- क ख

श्यामेन दळसंधिं तु कोणं रक्तेन पूरयेत् ।
तत्र कूलं ! समालिख्य शक्तीः सम्पूजयेदथ[1] ॥ ४२
रक्तेन गात्रं कृष्णेन कोणं पीतेन वीथिकाम् ।
सितेन द्वारमापूर्य शोभां पीतेन पूरयेत्[2] ॥ ४३
शक्त्यग्रमरुणेनैव मध्यं पीतेन पूरयेत्[3] ।
हरितेनोपशोभां तु कोणं कृष्णेन पूरयेत्[4] ॥ ४४
तत्र शूलं समालिख्य शक्तिं[5] सम्पूजयेदथ[6] ।
असितेन लतासंधिं मुष्टिं[7] रक्तेन पूरयेत् ॥ ४५
कोणकोष्ठचतुष्कं तु श्यामेनाथ प्रपूरयेत् ।
तत्र देवीं समालिख्य गुणरेखास्तु तद्बहिः ॥ ४६
कल्पयेच्छुक्लरक्ताभ्यामसितेन क्रमेण तु ।
कृत्वैवं मण्डलं सम्यग्देवीप्रियमनुत्तमम् ॥ ४७
मण्डपं कारयेदन्यमैशान्यां मण्डपस्य तु ।
स्नानार्थं परमेशान्याश्चतुरश्रं मनोरमम् ॥ ४८
कलशान् पूरयेत् पश्चात् पञ्चविंशतिसंख्यकान् ।
एकोनार्धशतं वापि एकाशीतिमथापि वा ॥ ४९
क्षालयित्वाऽस्त्रमन्त्रेण सूत्रैः संवेष्ट्य वर्मणा ।
धूपयित्वा तु कलशान् साद[8]येत् प्रणवेन तु ॥ ५०
उत्तानीकृत्य संप्रोक्ष्य कूर्चान् विन्यस्य पूरयेत् ।
गव्यैर्व्यस्तैश्च मृत्तोयैः कषायै रत्नवारिभिः ॥ ५१
गन्धतोयैश्च शिष्टांश्च पूरयेच्छुद्धवारिभिः ।
पूर्वादिमध्यपर्यन्तं प्रादक्षिण्येन साधकः ॥ ५२
पूरयित्वाऽथ सम्पूज्य जुहुयात् सर्पिषा शतम् ।

---

1 अर्धं क, ग पुस्तकयोर्नास्ति । 2 अयं श्लोकः ख पुस्तके नास्ति ।
3-4-6 अर्धत्रयं क, ख पुस्तकयोः नास्ति । 5 मुष्टिं क
7 शक्तिं क (प्रथमतृतीयपादयोर्व्यत्यासः क पुस्तके) 8 पूर- क ख

अष्टोत्तरं च सम्पातं कलशे सेचयेत् पुनः ॥ ५३
सम्पूज्य वस्त्रैरस्त्रेण कलशान् च्छा[1]दयेत् क्रमात् ।
तारेण पूरणं प्रोक्तमर्चनं मूलमन्त्रतः ॥ ५४
होमं च तेन दुर्गाभिर्जपमस्त्रेण[2] वेष्टनम्[3] ।
स्नानमण्डपमध्ये तु स्थापयेत् स्नान[4]पीठिकाम् ॥ ५५
यदत्र वांछितं सर्वं संहृत्य स्नानमण्डपे ।
आसाद्य बिम्बं संहृत्य मन्त्रांस्तोयात् समुद्धरेत् ॥ ५६
विसृज्य वाससी पूर्वे क्षाळयित्वा शुभैर्जलैः ।
गन्धादिभिरलङ्कृत्य वस्त्राभ्यां परिवेष्ट्य च ॥ ५७
आनीय मण्डपं मन्त्री स्नानार्थं पूर्वचोदितम् ।
शङ्खदुन्दुभिनिर्घोषैस्तुमुलैः पटहस्वनैः ॥ ५८
स्नानपीठे न्यसेद्बिम्बं प्रासादाभिमुखं यथा ।
विमुच्य वसनं मन्त्री बिम्बं प्रक्षाळ्य वारिभिः ॥ ५९
नयनोन्मीलनं कुर्यात् प्रतिमायाः पुरः स्थितः ।
हेमपात्रे घृतं गृह्य मधुना च समन्वितम् ॥ ६०
आद्यं[5] मन्त्रमनु[6]स्मृत्य हेमसूच्या विधानवित् ।
पाद्यमाचमनं दत्वा कलशैः स्नापयेत् पुनः ॥ ६१
स्नापयेत् पञ्चभिर्गव्यैर्दुर्गामन्त्रैश्च पञ्चभिः[7] ।
दुर्गामन्त्रांस्ततो वक्ष्ये संक्षेपात् सर्वसिद्धिदान् ॥ ६२
दुर्गाऽऽर्या देवी भगवत्यन्या कन्या समीरिता ।
चतुर्थ्यन्तान् नमोन्तां[8]स्तु प्रणवाद्यान्[9] यथाक्रमम् ॥ ६३
नामप्रणवयोर्मध्ये स्थिताः स्युः सेदवेतजाः ।
वेद्या नद्यास्तथा तीर्थात् पर्वताद्वृषशृङ्गतः ॥ ६४

---

3 बिम्बन्धनम् । 5 जातवेदसे इति । 7 क्रमात् ।

---

1 सा- क ख 2 मन्त्रेण क ख 4 स्तेन क ख
6 मन्त्रं मनुं क 8 न्ताः क 9 द्याः क

वराहगजदन्ताभ्यां मृदमादाय निर्मलाम् ।
मृत्तिकाभिरथालिप्य स्नापयेत् पञ्चवारुणैः ॥ ६५
अश्वत्थस्य पलाशस्य प्लक्षौदुम्बरयोस्त्वचः ।
न्यग्रोधस्य च[1] शम्यायाः खदिरस्य पुनस्तथा ॥ ६६
त्वग्रसैरभिषिच्याथ पवमानेन[2] साधकः ।
शालितण्डुलपिष्टेन बिम्बमालिप्य सर्वतः[3] ॥ ६७
स्नापयेद्गलतोयेन दुर्गामन्त्रैश्च पञ्चभिः ।
गन्धतोयेन चाप्येवं स्नापयेत्तदनन्तरम् ॥ ६८
पुण्याहं[4] तत्र कुर्वीत दीक्षितैः सह साधकः ।
पुण्याह[5]घटतोयेन स्नापयेदथ पञ्चभिः ॥ ६९
वस्त्रयुग्मेन संवेष्ट्य रक्तेन मृदुना ततः ।
गन्धं पुष्पं तथा धूपं दीपमाभरणानि च ॥ ७०
वितानं चामरं छत्रं[6] दद्यान्मन्त्रैश्च पञ्चभिः ।
दूर्वाक्षतानि तारेण पादयोः शिरसि न्यसेत् ॥ ७१
नीराजनं ततः कुर्याद्यथावत् साधकोत्तमः[7] ।
अयं पुरा[8]दि[9]मन्त्रैश्च पञ्चभिः परितः[10] क्रमात् ॥ ७२
दत्वाऽर्घ्यं परया भक्त्या उत्तिष्ठेति समु[11]द्धरेत् ।
ततो मण्डपमानाय्य बिम्बं तद्दीक्षितैर्गुरुः ॥ ७३
प्रवेशयेत्ततो मन्त्री प्राग्द्वारेण[12] समाहितः ।
प्रासादाभिमुखं कृत्वा शयने सन्निवेशयेत् ॥ ७४
आदिमन्त्रमनुस्मृत्य दुर्गामुद्रां च दर्शयेत् ।

---

2 पवमानः सुवर्जनः इत्यादिना । 4 पिष्टलेपनानन्तरं गन्धतोय-स्नानात्पुरा पुण्याहमुक्तं नारायणेन । 8 अयं पुरो, अयं दक्षिणो, अयं पश्चात्, अयमुत्तरा, अयमुपरि इति । 10 चतुर्दिक्षु ऊर्ध्वं च । 12 प्रधानद्वारेण ।

---

1 स- ख ग 3 यत्नतः ग 5 हं ग 6 नृत्तं ख
7 कः स्वयम् क ख 9 रेति ग 11 तदु क ख

तारेण वाऽथ शय्यां[1] तां कृत्वा पूर्वं प्रदक्षिणम् ॥ ७५
ततोऽधिवासनं कुर्याद्यथावद्देशिकोत्तमः ॥ ७६

इति क्रियासारे (त्रिंशः) दौर्गे द्वितीयः पटलः

तृतीयः पटलः

अथाधिवासनं वक्ष्ये देव्याः पावनमुत्तमम् ।
यस्मिन् कृते हि तत्रस्था देवी सर्व[2]करी भवेत् ॥ १
आचार्यस्तत्वसम्पन्नो मद्देहे संव्यवस्थितः ।
कुर्यात् सर्वं यथावत्तु भावनादिक्रमेण वै ॥ २
भावयेत् प्रतिमादेहे जीवं तत्वेन देशिकः ।
ध्यात्वैवं विधिवत्तत्त्वं संहृत्यात्मनि योजयेत् ॥ ३
शोष[3]येत्तु ततः क्षोणीं वायुना तत्वमूर्तिना ।
सन्दहेत्तां तु शुष्कां वै वह्निना तत्वरूपिणा ॥ ४
प्लावयेत् तत्पुनर्भस्म वरुणेनाम्भसा क्रमात् ।
शोषितं तु ततो दग्धं प्लावितं क्षितिसंज्ञितम् ॥ ५
मुनिद्वययुतं[4] पश्चात् पञ्चभिश्च गुणै[5]र्युतम् ।
संहरेत् कारणे[6] पश्चात् स्वकीये तच्च देशिकः ॥ ६
स्वकारणे स्वरूपे वै संहरेत् भावनान्वितः[7] ।
एवं क्रमेण भूतानि संहृत्य विषयैः सह ॥ ७
पञ्चमं[8] मनसि स्थाप्य मनश्चाहङ्कृतौ पुनः ।
अहङ्कारं पुनर्बुद्धौ बुद्धिं प्रकृतितां नयेत् ॥ ८

4 घ्राणोपस्थात्मकं । 5 शब्दादिभिः । 6 गन्धतन्मात्रके एवं स्व स्व कारणे । 8 आकाशं ।

1 शक्त्या क ख 2 सर्वं क 3 शोष ग 7 तं ग

तां च देवे[1] समायोज्य पश्चात् सृष्टिमुपक्रमेत् ।
एवं लीने जगत्यस्मिन् पुनः सृष्टौ प्रवर्तते[2] ॥ ९
जन्तूनामुपकाराय क्रीडया परमेश्वरः ।
स्वामेव मायां प्रकृतिमधिष्ठायाविकारिणीम् ॥ १०
अव्याकृतात्मना विश्वं पुनरेवमजीजनत् ।
पञ्चमी तु स्वतः सिद्धा शक्तिस्तदनुवर्तिनी ॥ ११
तामालोड्य स्वयं तस्यां नादशक्ति[3]मजीजनत् ।
[तामप्यालोड्य सहसा] स्पर्शशक्तिं च वायवीम् ॥ १२
तामप्यालोड्य सहसा तेजःशक्तिमजीजनत् ।
तेजःशक्त्या तथाप्शक्तिमप्शक्तौ [क्त्या] पार्थिवीमनु ॥ १३
एवं तु शक्तयः ख्याताः पञ्चसंख्याः पुरातनाः ।
संसारविषयातीता योगगम्याः सनातनाः ॥ १४
श्रेष्ठा च पौरुषी चैव विश्वरूपा निवर्ति-[4]नी ।
पञ्चमी सर्वरूपा[5] तु कारणं जगतस्त्विमाः ॥ १५
आभिर्व्याप्तं जगद्वस्तु सर्वं हि सचराचरम् ।
अत्र स्थित्वा जगत्येषः ब्रह्माख्यः[6] पुरुषोत्तमः ॥ १६
अपूर्वाम्भसि देवेशः अप्[7]संज्ञे परमेश्वरः ।
अण्डं तदन्तस्तत्पश्चाद्बुद्धितत्वमथासृजत् ॥ १७
अष्टप्र[8]कारविपुलं[9] त्रिगुणं तत्वनायकम् ।
बोद्धव्यमधिभूतं तु ब्रह्मा[10] तस्याधिदैवतम् ॥ १८
तत्र स्थित्वाऽप्यहङ्कारं गुणमध्यमयन्ततः[11] ।
अधिभूतं तु तस्यापि अहङ्कर्तव्यमेव च ॥ १९

---

1 जीवे । 3 शब्दतन्मात्रां ।
9 धर्मादि चत्वारः, अधर्मादि चत्वारः ।

---

2 येत् ख 4 निवृत्ति ग 5 भूता क 6 ख्यं ग 7 स्व ग
8 प्रा- ख 10 ब्रह्म ख 11 त्नतः ख, न्तमः ख

अधिदैवं ततस्तत्र रुद्रो रौद्रवपुस्तदा ।
अहङ्कारात्मनस्तत्वमधिभूतं तु कथ्यते ॥ २०
मन्तव्यं चन्द्रमास्तस्य दैवं मात्र[1]स्तु [मात्रास्तु] पञ्च वै ।
कार्यकारणरूपेण सम्भूतास्तु खपूर्वका:[2] ॥ २१
आद्याया[3]स्त्वम्बरं जातमिन्द्रियद्वयसंयुतम् ।
शब्दाख्यगुणसंयुक्तम् वायुमात्रं[4] तथैव च ॥ २२
इन्द्रिये द्वे समाख्याते श्रोत्रवाक् संज्ञिते[5] मुनी ।
श्रोतव्यमपि वक्तव्य[6]मधिभूतं तयोरपि ॥ २३
दिशश्चाग्निश्च दैवास्यौ तयोरेवं द्विजोत्तम[7] ।
या मात्रा निर्गता तस्या[8] वायुमात्रा[9] महाबला: ॥ २४
तस्यास्तु वायु: सम्भूतो भूताख्यस्तु मुनीयुत: ।
गुणेन स्पर्शसंज्ञेन शब्दाख्येन तु भूतराट् ॥ २५
मात्रा[10] तु तेज:संज्ञा वै सम्भूता सुमनोहरा ।
त्वक् पाणी चेन्द्रिये त्वत्र वायुजे तु तयो: पुन: ॥ २६
अधिभूतं भवेत् स्पृश्यमादातव्यं तथैव च ।
इन्द्रवायू तथा देवौ तयोरेव महाबलौ ॥ २७
या पुनस्तेजो मात्रा च (निर्गता वायुत: पुन: ।
जातस्तस्या महानग्निर्गुणत्रयसमन्वित: ॥ २८
चक्षुषी चरणौ चैव इन्द्रियेत्वत्र भूतजे ।
अधिभूतं च गन्तव्यं द्रष्टव्यं च यथाक्रमम् ॥ २९
आदित्यश्च तथा देवो विष्णुश्च)[11] विबुधोत्तम: ।

---

2 आकाशपूर्वका: । 3 शब्दतन्मात्राया: । 8 स्पर्शतन्मात्राया: ।
10 रूपतन्मात्रा ।

---

1 मन्त्रा: ग 4 मन्त्र: ग 5 संज्ञके ख 6 मन्तव्य क
7 मा: ख, मं ग 9 संज्ञा ग
11 कंसाङ्कितो भाग: क, ख पुस्तकयोर्नास्ति ।

माता च तस्यां सञ्जाता अप्संज्ञा च महाबला ॥ ३०
जातं तस्या[1]स्तथाप्संज्ञं भूतं पूर्ववदेव हि ।
द्विद्विकं च गुणस्तस्य[2] मुनिद्वययुतं तथा ॥ ३१
जिह्वापायू[3]मुनी तत्र अधिभूतं तयोः शृणु ।
रसितव्यं च जिह्वायां पायो[4]र्मोच्यं[5] [सर्गः] तथाऽमुना ॥ ३२
वरुणश्चाधिदेवश्च मित्रश्च तदनन्तरम् ।
तस्यास्तु पार्थिवी जाता महामात्रा महाबला ॥ ३३
तस्याः क्षोणी समुत्पन्ना गुणपञ्चकसंयुता ।
द्वाभ्यामपि मुनिभ्यां च च[6]र[7]मा भूतसंज्ञिता ॥ ३४
घ्राणोपस्थे मुनीत्वत्र अधिभूतं तयोः शृणु ।
घ्रातव्यं तु भवेदाद्ये आनन्दस्तु द्वितीयके ॥ ३५
क्षितिक्षेत्रज्ञकौ चापि दैवतं समुदाहृतम् ।
एवं क्रमेण तत्वानामुत्पत्तिः समुदाहृता ॥ ३६
एवं मद्रूपतापन्न उत्पत्तिं भावयेत्ततः ।
एवं क्रमेण सम्पाद्य सूक्ष्मस्थानविभागतः ॥ ३७
प्रा[8]णानां कारणानां च वृत्तिलाभौ विचिन्तयेत् ।
सञ्चिन्त्यैवं क्रमेणैवं तत्र[9] तत्वा[10] [11]न्यसेद्बुधः ॥ ३८
कोपादिद्विपञ्चकं[12] तत्वं जीवं तु व्यापकं न्यसेत् ।
चिद्रूपं परमं तत्वं सर्वस्य निलयं प्रभुम् ॥ ३९
आधूम्रं च तुरीयं[13] तु प्राणतत्वं हृदि न्यसेत् ।
यत्प्रसादात् प्रवृत्तिः स्यात् सर्वस्य कारणस्य तु ॥ ४०
बुद्धितत्वं सितं पाच[14] तृतीयं विन्यसेद्धृदि ।

---

9 बिम्बे । 11 तत्वान् इति लिङ्गव्यत्ययः छान्दसः अथवा तत्वानि असेविति च्छेदः । 12 क्षकारात् दशमं मं – मं नमः पराय जीवात्मने । 13 भकारं । 14 पकारात् ।

---

1 तस्यां ख 2 स्यां ग 3 वायू ग 4 वायोः ग
5 मुख्यं ख 6 प-क ग 7 रथ क 8 घ्रा-क 10 तत्वं क

सर्वस्या अपि लोकेऽस्मिन् प्रवृत्तेः कारणं महत् ॥ ४१
पद्द्वितीयं तथा रक्तमहङ्कारं न्यसेद्धृदि ।
कर्ता समस्तवस्तूनां हर्ता चैव स एव हि ॥ ४२
सङ्कल्पनिलयं पं तु[1] मनस्तत्वं हृदि न्यसेत् ।
वस्तुद्वयस्पृगे[2] कस्मिन्नसितं बुद्धिनायकम् ॥ ४३
अशरीरं[3] न्यसेन्मूर्ध्नि मात्रामम्बर[4]संज्ञकाम् ।
वर्णशून्यं तु तं बीजं सर्वस्यापि च वृत्तिदम् ॥ ४४
तद्द्वितीयं विलोमेन[5] न्यसेद्वक्त्रे यथाविधि ।
आधूम्रवर्णमात्राख्यं प्रागुक्तत्रय[6] [7] कारणम् ॥ ४५
एतज्जानीहि पञ्चानां वक्तव्यमिति निश्चयः ।
तत्तृतीयं[8] न्यसेन्नाभौ तेजोरूपं सुदीप्तिमत् ॥ ४६
स्थितिहेतुः[9] प्रकृत्या वै तत्वमेतदुदाहृतम् ।
वस्तौ थं विन्यसेद्विप्र[10]सितमाप्यायनं सदा ॥ ४७
अदेहात्तु[11] विलोमेन पञ्चमं[12] त्वङ्मयो[13]न्यसेत् ।
आधारभूतं सर्वस्य श्यामवर्णं जडात्मकम् ॥ ४८
कर्णयोस्तु न्यसेद्विप्र त्रिवर्गान्त[14]मरूपकम् ।
येन शब्दं विजानाति शोभनं वाप्यशोभनम् ॥ ४९
गात्रे ढं विन्यसेद्विप्र पिङ्गलं स्पर्शकारणम् ।
तत्तृतीयं[15] न्यसेत् पश्चाच्चक्षुषोर्ज्योतिरुत्तमम् ॥ ५०
जिह्वायां तु न्यसेत् पश्चाद्वर्तुलं[16] सितमुत्तमम् ।
तदर्धं[17] विन्यसेत्तत्र नासिकायां सितेतरम् ॥ ५१

---

3 नकारं । 5 धकारं । 7 इन्द्रियतेजस्तन्मात्राणां । 8 वकारं ।
10 विप्रेति नारदसम्बोधनं विष्णूक्तं । 11 न कारात् । 12 तकारं ।
13 चरणयोः । 14 णं । 15 डं । 16 ठं । 17 टं ।

---

1 पस्तु ख 2 चैग, ग्लोक 4 मचर ख, त्रां चरम ग
6 द्वय ग 9 तु ख

विन्यसेद्दशमं[1] वक्त्रे[2] तेजोरूपं प्रभान्वितम् ।
येन शक्नोति वक्तुं वै शोभनं वाप्यशोभनम् ॥ ५२
पीतं वै नवसंख्यं[3] तु विन्यसेत् करयोः पुनः ।
येनाऽदातुं तथा त्यक्तुं शक्नोति करणं यथा ॥ ५३
द्विचतुष्कं[4] सितं श्यामं पादयोरुपरि न्यसेत् ।
मुनिसंख्यायुतं[5] पश्चात् श्यामलं पायुतो[6] न्यसेत्[7] ॥ ५४
सितमेवं तथा षष्ठं[8] [9] योना[10]वानन्ददं बुधः ।
ब्राह्मं[11] तु विन्यसेद्बीजं मस्तके तत्वरूपिणम् ॥ ५५
आद्यद्वितीयं[12] वक्त्रे वै तृतीयं नाभिदेशतः ।
वस्तौ चतुर्थं[13] विन्यस्य पञ्चमं त्वङ्घ्रिगोचरे ॥ ५६
एतेषामपि वर्णानां मात्रावर्णाः समाः स्मृताः ।
आरक्तं विन्यसेद्बीजं त्रिंश[15]तं कमलस्य[16] तु ॥ ५७
सूर्यबिम्बं त्रयस्त्रिंशत्[17] सूर्याभं विन्यसेद्धृदि ।
सिराजालसहस्राणि व्याप्य नाडीव्यवस्थितम् ॥ ५८
तत्रैव वि[सं]न्यसेद्बीजं सुधास्रावीन्दुमण्डलम् ।
अतिरक्तं पुनर्बिन्दुं[18] वह्निमत्रैव चिन्तयेत् ॥ ५९
एवं जीवादितत्वैश्चसम्पन्नां तां विचिन्तयेत् ।
सञ्चिन्त्यैवं यथावत्तु शक्ति[19] बीजैर्नियोजयेत् ॥ ६०
एकत्रिंशं[20] च वायुं[21] च वह्निसोमौ[22] तथा हरिम्[23] ।

---

1 ञां। 2 वागादि पञ्चकमाह । 3 झं। 4 ञं।
5 छ। 6 पायो। 8 चं। 10 गुह्ये। 11 कं।
12 आद्यात् द्वितीयं अथवा आद्यमिति छेदः तदा पूर्वंत्रान्वेति ।
13 गुह्ये घं अत्र व्युत्क्रमो युक्त इति भाति। 14 शं।
16 हृत्पुण्डरीकस्य। 17 हं। 18 मं ? रमिति युक्तम् ।
20 षं। 21 यं। 22 रं वं। 23 लं।

---

7 एतदर्धत्रयं ख पुस्तके नास्ति। 9 पश्चात् ख 15 विंश ख
19 शक्ति ग

एते बीजवराः प्रोक्ताः शक्तीनां पञ्च पञ्चभिः[1] ॥ ६१
द्विसप्तकलया[2]ऽऽढ्या वै बिन्दुयुक्ताः परात्मकाः[3] ।
एतान्[4] समुच्चरन् स्पृष्ट्वा हृदयं[5] भावयेत् सुधीः ॥ ६२
एवं[6] समाप्य तत्वानि तत्रैव सकलं क्रमात् ।
मूलेन योजयेत् पश्चादङ्गप्रत्यङ्गयोगतः ॥ ६३
पूजयेद्गन्धपुष्पैस्तां बलिनैवेद्ययोगतः ।
वस्त्रैराभरणैः पश्चात् पूजयेत् तां समाहितः ॥ ६४
एवं तु पूजयित्वा वै मण्डले पूजयेदथ ।
आसनं विधिवद्ध्यात्वा सम्पूज्य च यथाविधि ॥ ६५
देवीतनौ तु विन्यस्तं तत्सर्वमभि[7]चिन्त[8]येत् ।
एवं ध्यात्वा तु विधिवत् पूजयेत् परमेश्वरीम् ॥ ६६
गन्धपुष्पैस्तथा धूपैर्दीपैश्च चरुभिः क्रमात् ।
साङ्गावरणसंयुक्तां प्रणिपत्य प्रसाद्य च ॥ ६७
होमयेच्च पुनस्तत्र तत्वानां जनियोगतः[9] ।
धेनुयुग्मं चतुष्कं वा संस्थाप्यामन्त्र्य दक्षिणे ॥ ६८
प्रणवेन दुहेत् क्षीरं तेनैव श्रपयेच्चरुम् ।
निवेदयेच्च तेनैव जुहुयात्तेन मन्त्रवित् ॥ ६९
ब्राह्मणान् भोजयेत् पश्चान्नव तेनैव साधकः ।
सुवर्णं दक्षिणां तेभ्यो दद्याच्चैव स्वशक्तितः ॥ ७०
धेनुयुग्मं सुवर्णं च आचार्याय तदैव तु ।
दद्यात् प्रकृतितुष्ट्यर्थं तेन सातिप्रसीदति ॥ ७१
भूयो[10]ऽग्नि दिक्षु निक्षिप्य मूर्तिपा जुहुयुः क्रमात् ।

---

1 श्रेष्ठाबिभिः सह । 2 चतुर्दशस्वरेण । 3 आत्मविद्या परतत्वेषु परतत्वभेदकाः । 4 बीजवरान् । 5 प्रतिमाया हृदयम् । 6 कोपतत्वमपि सूचितम् । 9 सृष्टिक्रमात् ।
10 तत्वहोमानन्तरम् ।

---

7 मिह ग 8 षे च क

उपस्थाय पुरो वह्निमग्निं दूतमिति ऋचा [मृचैव च] ? ७२
अग्निमीळे त्वमग्ने च अग्न आयाह्यतः परम् ।
अग्निमग्नि[1]मतस्त्वेभिः प्रणयेत् तेन साधकः ॥ ७३
आद्यया पक्वहोमं तु जुहुयुः पञ्जभि[2]र्धृतम् ।
पलाशाश्वत्थखदिरबिल्वानां समिधः क्रमात्[3] ॥ ७४
वेदाद्यैर्दुर्गया[4] पश्चादाज्यादीन्यथ होमयेत् ।
आज्यं हविर्यवव्रीहितिलसिद्धार्थकान् पुनः ॥ ७५
दूर्वाश्चैवाथ जुहुयुः शतमष्टोत्तरं पृथक् ।
स्वकुण्डे जुहुयाद्विद्वान्[5] शान्तिहोममतः परम् ॥ ७६
घृतेन दध्ना पयसा मधुना च यथाक्रमम् ।
सह सर्वं ततो हुत्वा शक्तिमन्त्रैस्तु पञ्चभिः ॥ ७७
अष्टाष्टसंख्यया पूर्णां द्रव्यान्ते जुहुयुः पृथक् !
शान्तिहोमं [तोयं] ततः सिञ्चेत् तारेण प्रतिमातनौ ॥ ७८
अर्चायाः पादयोर्नाभौ हृदये मूर्ध्नि सर्वतः ।
शान्तिहोमे तु[6] सम्पातं शक्तिमन्त्रैस्तु[7] संस्पृशेत् ॥ ७९
गन्धपुष्पैः समाराध्य गेय[8]नृत्तादि कारयेत् ।
अधिवाससमाप्तिस्तु भवेदेवं हुते [कृते] सति ॥ ८०

इति क्रियासारे (एकत्रिंशः) दौर्गे तृतीयः पटलः

चतुर्थः पटलः

कृत्वैवमधिवासं तु प्रतिष्ठां तत[9] [10] आरभेत् ।

---

2 जातवेदा इत्यादि पञ्चभिः । 3 आचार्यकुण्डे पालाश्य एव ।
4 आद्यया । 9 परेद्युः ।

---

1 मग्न- क 5 जुहुयुर्विप्राः क 6 च ग 7 श्च ग
8 गेहे क, गेहं ख 10 तत्र ख ग

प्रासादं शोधयेत् पश्चात् सम्मार्ज्यान्तर्बहिस्तथा ॥ १
संक्षाळ्य शक्र[1]दालिप्य गन्धेन प्रोक्षयेत्ततः ।
गन्धतोयैश्च तदनु विकिरेत् कुसुमाक्षतैः ॥ २
प्रसिद्ध्येनैव मानेन विभजेत् सप्तधा गृहम् ।
मध्यमं तु विरिञ्चस्य सोमपानां[2] द्वितीयकम्[3] ॥ ३
तृतीयं[4] मानुषं प्रोक्तं (पैशाचं च[5] चतुर्थकम् ।
एवं विभज्य क्षेत्रं तु ज्ञात्वा चैव यथाविधि ॥ ४
वैरिञ्चं भयदं प्रोक्तं)[6] पैशाचं मृत्युदं स्मृतम् ।
तस्मात् ज्ञात्वा द्वयोर्दोषं द्वयोर्मध्ये[7] निवेशयेत् ॥ ५
तृतीयं[8] पादपीठं स्यात् स्त्रीशिला योनि[9]रुच्यते ।
एवं ज्ञात्वा पादशिलां स्थापयेत् तत्र देशिकः ॥ ६
क्षाळितां च शुभैस्तोयैरर्चितां[10] गन्धपुष्पकैः ।
स्थापयित्वा तु तद्[11]गर्ते[12] रत्नन्यासं समारभेत् ॥ ७
प्रथमे तु भवेद्बीजं द्वितीये रत्नमेव च ।
तृतीये तु भवेद्धातुश्चतुर्थे लोहमेव तु ॥ ८
अष्टोत्तरशतं चाज्यं दुर्गया[13] जुहुयाद्गुरुः ।
हुत्वैवं मूलमन्त्रेण मध्ये दिक्ष्वथ दुर्गया ॥ ९
विन्यसेत्[14] तानि वस्तूनि कृत्वा पुण्याहवाचनम् ।
पुण्याहवाचनात्पूर्वं कृत्वा नान्दीमुखं गुरुः ॥ १०
यवान् व्रीहींश्च निष्पावान् प्रियङ्गुतिलमाषकान् ।
नीवारांश्च तथा शालीन् मध्ये सिद्धार्थकान् क्रमात् ॥ ११

---

2 देवानां। 3 विरिञ्चिपार्श्वतः स्थितं। 4 तदुभयपार्श्वतः स्थितं। 5 मानुषबाह्यतः। 7 वैकिमानुषयोर्मध्ये।
8 नपुंसकं। 9 पीठिका। 10 प्रणवेनेति शेषः।
12 नपुंसकशिलागर्ते। 13 त्रिष्टुभा। 14 मध्ये मूलेन, दिक्षु त्रिष्टुभा द्रव्याणि न्यसेत्।

---

1 सक्र- क 6 कंसाङ्कितो भागः ग पुस्तके नास्ति। 11 तां ग

वज्रमौक्तिकवैडूर्यशङ्खस्फटिकपुष्यकान् ।
चन्द्रकान्तं महानीलं ब्रह्मरागं तु मध्यतः ॥ १२
पुळकं[1] विद्रुमं चापि (अञ्जनं श्यामसीसके ।
मनःशिलां हरीतालं गैरिकं पारतं तथा ॥ १३
हिरण्यं रजतं ताम्र,[2]मायसं त्रपुसीसके ।
तथा सुवर्णरूपं[3] च तप्तहेममयं तथा ॥ १४
आरकूटं तथैशाने निक्षिपेच्च विधानतः ।
शङ्खं चक्रं तथा शूलं दण्डं खड्गं तथैव च ॥ १५
पाशं शरं पिनाकं च सौ[4]वर्णं कारयेत् पृथक् ।
मध्यगर्ते न्यसेदेतान्न्यायुधानि विचक्षणः ॥ १६
बीजानामप्यलाभे तु शालिबीजं प्रशस्यते ।
रत्नानामप्यलाभे तु वज्रं तत्र तु निक्षिपेत् ॥ १७
धातूनामप्यलाभे तु हरितालं प्रशस्यते ।
लोहानामप्यलाभे तु सुवर्णं शस्यते परम् ॥ १८
एवं रत्नानि विन्यस्य ध्रुवसूक्तं जपेदथ ।
दुर्गाभिर्मूलमन्त्रेण जप्त्वा गन्धादिनार्चयेत् ॥ १९
संशोध्य पीठम् विन्यस्य समाराध्य जपेदथ ।
रक्तेन वाससाऽऽच्छाद्य रक्षां कृत्वा बहिर्व्रजेत् ॥ २०
गत्वा तूर्यनिनादेन ब्रह्मघोषेण चाप्यथ ।
इडेरन्तेत्यु[5]पस्थाय ! उत्थाप्यार्घ्यं प्रदाय च ॥ २१
मण्डलं कलशं वह्निं त्रिरात्रं रक्षयेदिति ।
पञ्चप्रश्ने स्फुटं चोक्तं कर्तुर्न स्याच्चथा यदि ॥ २२
शक्तिस्तदैव सकलं[6] तारेणास्यां नियोजयेत् ।

---

1 सौराष्ट्री । 3 सुवर्णकल्पितगरुडं, व्याख्यात्रा तु सिंहमित्युक्तम् ।

2 कंसाङ्कितो भागः ग पुस्तके नास्ति । 4 सु क ग
5 इडेरन्तेरु- ग, इषे घ 6 स्तथैव कलशं क ख

उत्थाप्योत्तिष्ठमन्त्रेण शाकुनेन नयेद्गृहम् ।। २३
प्रदक्षिणं नयित्वाऽर्घ्यं द्वारदेशे ददे[1]द्गुरुः ।
अन्तः[2] प्रवेशयेद्यत्नादध ऊर्ध्वं न संस्पृशेत् ।। २४
पीठं प्रदक्षिणीकृत्य ज्ञात्वा लग्नबलं गुरुः ।
हेमरत्नादि विप्रेभ्यो दत्वा स्वस्ति प्रवाचयेत् ।। २५
स्वयं देवीमयो भूत्वा स्थापयेत् परमेश्वरीम् ।
दुर्गायां मूलेमन्त्रेण प्रणवान्तेन चा[3]परम् ।। २६
एवं संस्थाप्य तां देवीं स्थिरीकुर्यादनेन तु ।
ध्रुवाद्यौरिति मन्त्रेण मूर्तिपैः पाठ[4]येत् सुधीः ।। २७
श्रीसूक्तं देवीसूक्तं च मत्सूक्तं[5] च रथन्तरम् ।
गायत्रं शाक्वरं पश्चाच्छिवसङ्कल्पमेव च ।। २८
प्रतिष्ठासि प्रतिष्ठेति स्तुत्वा चैवं समासतः ।
उपविश्य शनैः पश्चात् कुर्यात् सकलनिष्कलम् ।। २९
अर्चायां यानि तत्वानि पूर्वं न्यस्तानि वै क्रमात् ।
विन्यस्य तानि सर्वाणि शक्ति[6]बीजै[7]र्नियोजयेत् ।। ३०
मूलेन विद्यया[8] चैव साङ्गेन[9] सकलं क्रमात् ।
न्यस्यैवं पूजयेत् पश्चादुपहारैश्च भक्तितः ।। ३१
मुद्रां[10 11] प्रदर्श्य विधिवत् स्तुत्वा प्रार्थ्य बहिर्व्रजेत् ।
परिवारान् स्वकैर्मन्त्रैः स्थापयित्वाऽर्चयेत् क्रमात् ।। ३२
चण्डिकामम्बिकां सिंहं गणाध्यक्षं च शङ्करम्[12] ।
दिक्पान् मातृश्च शास्तारं तां[13] स्कन्दं मुण्डिनीमनु ।। ३३

---

2 पादपूर्वं । 5 विष्णुना प्रोच्यते, अतः विष्णुसूक्तपुरुषसूक्तादिकं ।
7 षौमित्यादिभिः । 8 जातवेदसे इत्याद्यया । 9 मूलेन ।
10 योन्याख्यां, आवाहनादि मुद्रा वा । 12 अत्र बहिर्द्वारिपालभूते जया-विजये व्याख्योक्ते । 13 दुर्गां ।

---

1 नये क ख 3 चात्* क ख 4 स्थाप क ख ग
6 शक्ति क 11 मुद्राः क ख ग

ह्लादिनीं म्लोदिनीं[1] द्वारि वैजयन्तीं बहिस्तथा ।
कात्यायनीं च सम्पूज्य काळ्याद्याः परितः क्रमात् ।। ३४
काळी कराळी विरजा मन्दरा विन्ध्यवासिनी ।
सुप्रभा सिंहवक्त्रा च अष्टमी दैत्यमर्दिनी ।। ३५
एताः सम्पूज्य परितो बलिपीठे बलिं हरेत् ।
बलिपीठं समासाद्य संक्षाळ्य सलिलैः शुभैः ।। ३६
ब्रह्मघोषीं सुघोषीं च वज्रमुष्टिं[2] सुरङ्गिणीम् ।
सुमुखां[3] सुभुजां चैव पूजयेच्च प्रमोदिनीम् ।। ३७
आत्मानं[4] परितोऽभ्यर्च्य ब्राह्मी मध्ये समर्चयेत् ।
काळ्याद्याश्चापि सम्पूज्यास्तत्र गन्धादिभिः क्रमात् ।। ३८
आसां बलिं विधायाथ प्रार्थयेत्तदनन्तरम् ।
प्रणिपत्याग्रतः स्थित्वा मूर्ध्नि बद्धाञ्जलिर्गुरुः ।। ३९
यावदत्र जगन्नाथा बिम्बमाश्रित्यतिष्ठति ।
तावदत्रैव रक्षार्थं यूयं तिष्ठत[5] सर्वदा ।। ४०
इति प्रार्थ्य प्रविश्यान्तर्मूलमन्त्रं जपेत् सुधीः ।
शतमष्टोत्तरं स्तुत्वा स्तोत्रैर्नानाविधैः गुरुः[6] ।। ४१
अभिवाद्य बहिर्गत्वा दण्डवत् प्रणमेत् क्षितौ ।
ब्राह्मणान् भोजयेत् पश्चाद्गेयनृत्तादि कारयेत् ।। ४२
अनुत्तारितनिर्माल्यां पूजयेच्च दिनत्रयम्[7] ।
तुरीयेऽह्नि संप्राप्ते स्नानं कुर्याद्यथाविधि[8] ।। ४३
एषा प्रतिष्ठा कथिता भुक्तिमुक्तिप्रदायिनी ।
एतां कृत्वा विधानेन सर्वान् कमानवाप्नुयात् ।। ४४

इति क्रियासारे (द्वात्रिंशः) दौर्गे चतुर्थः पटलः

---

1 मोहिनीं क घ, मोहिनीं ग 2 यज्ञवेष्टीं क ग 3 खीं ग
4 त्मनीं क ग 5 थ ख 6 °रवि ग 7 त्रये ख
8 एतदर्धं ख पुस्तके नास्ति ।

पञ्चमः पटलः

अथार्चनविधिं वक्ष्ये दुर्गायाः सार्वकामिकम् ।
स्नात्वा विधानतः कृत्वा देवर्षि पितृतर्पणम् ।। १
प्राक्षाळ्य पाणिपादौ तु शुचिराचम्य वाग्यतः ।
पूजामन्दिरमासाद्य करशुद्धिं विधायच ।। २
अस्त्रमन्त्रेण तेनैव कुर्यात्ताळत्रयादिकम् ।
ताळत्रयं दिशाबन्धमग्निप्राकारमेव च ।। ३
प्राणायामत्रयं कुर्यात् मूलमन्त्रेण देशिकः ।
धारणा[1,2] धारयेत् पश्चाद्वाय्वग्न्यमृतबीजकैः ।। ४
विन्यसेत्करयोर्मूलं प्राङ्मुखो विहितासनः ।
अङ्गानि करशाखासु अङ्गुष्ठादितलान्तिकम् ।। ५
व्यापकं विन्यसेद्देहे बिन्द्वन्तान्यक्षराणि तु ।
तारसम्पुटितं न्यस्येन्मूर्धादिषु यथाक्रमम् ।। ६
मूर्वेक्षणास्यहृदयनाभिगुह्याङ्घ्रिषु[3] क्रमात् ।
अङ्गानि विन्यसेत् पश्चात् स्वेषु स्थानेषु[4] देशिकः ।। ७
बध्वा मुद्रां ततो ध्यात्वा[5] जपेदष्टावरं बुधः ।
हृत्पद्मे मनसाभ्यर्च्य स्वतनुं तां विचिन्तयेत् ।। ८
अर्घ्यपात्रं ततोऽस्त्रेण संक्षाळ्याद्भिः प्रपूरयेत् ।
गन्धपुष्पयुतं कृत्वा तारमष्टावरं जपेत् ।। ९
ततः[6] सम्प्रोक्ष्य तत्तोयै[7]रात्मानं कुसुमादि च ।
अथात्मानमलङ्कृत्य योगपीठं प्रकल्पयेत् ।। १०
प्रकृतिं[8] विन्यसेन्मध्ये कूर्मं च तदनन्तरम् ।

---

1 शोषणाद्याः । 4 हृदयादिषु । 8 गुरुगणपतिपूजानन्तरं ।

2 णां क ख 3 दिषु क ख 5 ज्ञात्वा ग 6 तेन ग 7 तैस्तोयैं ग

माया[1] ब्रह्म[2] युतौ स्यातां गात्रं प्रागादिषु न्यसेत् ॥ ११
सौम्या भद्रा जयाऽऽर्यास्तु पादान् कोणेषु विन्यसेत् ।
आद्यर्णं केवलं तासां बीजार्णं बिन्दुसंयुतम् ॥ १२
कोणेषु विन्यसेत् पादानाग्नेय्यादिष्वनुक्रमात् ।
बलश्च प्रबलश्चैव सुबलोऽथ महाबलः ॥ १३
एतैः[3] पादाः समाख्याताः पृथग्वर्णाः[4] प्रकीर्तिताः ।
पादानां च [पकरात्तु] चतुर्थैं[5] तु नपुंसकविभेदितम्[6] ॥ १४
बिन्दुयुक्तं क्रमाद्बीजं गुणान् गात्रोपरि न्यसेत् ।
सत्वं रजस्तमश्चैव[7] बीजमाद्यर्णमिष्यते ॥ १५
कन्दं नाळम् तथा पद्मं मण्डलानि क्रमात् पुनः ।
कन्दादीनां तु बीजानि क्ल[8]नलाः बिन्दुसंयुताः ॥ १६
दरावे ? [अउरा] मण्डलानां तु द्वे चाद्ये[9] बिन्दुसंयुते [वर्जिते] ।
केसरेष्वर्चयेच्छक्ती[10]र्नवमीं कर्णिकोपरि ॥ १७
प्रभा माया जया सूक्ष्मा विशुद्धा नन्दिनी तथा ।
सुप्रभा विजया चैव नवमी सर्वसिद्धिदा ॥ १८
आसां स्वरास्तु बीजानि हित्वा ह्रस्वनपुंसकम्[11] ।
बिन्दुयुक्तास्तु ते सर्वे वर्जयित्वा तथाऽन्तिमम्[12] ॥ १९
एवं सम्पूज्य गन्धाद्यैस्तस्मिन् प्रतिकृतिं[13] स्मरेत् ।
चतुर्भुजां प्रसन्नास्यां सर्वाभरणभूषिताम् ॥ २०
तस्यामावाहयेत् पश्चादुपचारेण देशिकः ।
मूलेन योजयित्वा तां[14] मन्त्रन्यासं समाचरेत् ॥ २१

---

1 ह्रीं । 2 कं । 4 आद्यक्षरभिन्नाः । 5 पकारात् चतुर्थं भं नपुंसकस्वरैः – ऋ ॠ ऌ ॡ रूपैर्विभेदितं, तथा च भं इत्यादि । 9 अर्कसोममण्डले अ उ वर्णे बिन्दुयुते, तन्त्रसमुच्चये तु बिन्दुरहिते पठिते । 12 विसर्गं । 13 विग्रहं ।

---

3 एते क ग 6 दतः ख 7 पां ग 8 क ग
10 क्ति ख 11 कान् ग 14 थ ग, च क ख

पूर्ववत्[1] करवर्ज्यं तु मुद्राः सन्दर्शयेदथ ।
अञ्जलिं वन्दनीं चैव योनिमुद्रां सहेति[2]काम् ।। २२
गन्धावसानमर्घ्यादि प्रदद्यादुपचारतः ।
दत्त्वैवं भक्तितस्तस्यै ततोऽङ्गादीनि पूजयेत् ।। २३
अङ्गानि विन्यसेत् पश्चात् पूर्वादिषु दलेषु वै ।
कोणेष्वस्त्रं नेत्रमध्ये[3] दूतीरपि दलेषु वै ।। २४
जया च विजया चैव कीर्तिः प्रीतिस्तथा प्रभा ।
श्रद्धा मेधा श्रुतिश्चैव दूतीनां नाम कीर्तितम्[4] ।। २५
आसां नामादि बीजं तु बिन्दुना च विभूषितम् ।
कीर्तेः प्रीतेश्च मेधाया विनाग्निं[5] विष्णुसंयुतम्[6] [7] ।। २६
वीथ्यामस्त्राणि[8] सम्पूज्य दिक्पानस्त्राणि पूजयेत्[9] ।
चक्रं शङ्खम् गदां खड्गं पाशाङ्कुशशरान् धनुः ।। २७
एषामपि च नामादि बीजं बिन्दुयुतं स्मृतम् ।
चक्रस्याग्निस्ततः पुष्पधारिणीमपि पूजयेत् ।। २८
सोमेशानान्तरस्थां तु न्यासक्रम उदाहृतः ।
स्नानादि चायुधान्तानामन्येषां[10] गन्धपूर्वकम्[11] ।। २९
उपचारेण पुष्पं तु दद्याद्देव्यै[12] समाहितः ।
अन्येषां नामभिर्देव्यै मूलेनाङ्गादिभिः सह ।। ३०
भूयोऽप्यङ्गादिभिः सार्धं विद्यया[13] च पुनर्ददेत् ।
धूपं दीपं निवेद्यं च दद्याद्भक्त्या समाहितः ।। ३१
पूजामन्त्रान् प्रकृत्यादीन् हुत्वा चैव सकृत् सकृत् ।
मूलेनाष्टोत्तरशतमष्टाविंशतिमेव वा ।। ३२

---

1 करन्यासरहितं । 5 इकारं विना । 6 अकारयुतमांद्यक्षरं बीजं ।
8 आयुधानि । 10 इन्द्रादीनां । 13 वक्ष्यमाणया ।

---

2 सहेतु- क 3 मूर्ती क ख 4 कीर्तिताः ख
7-9 एतदर्धद्वयं क, ख पुस्तकयोर्नास्ति । 11 पुष्पकं ख 12 द्रव्यैः ख

अष्टौ वाङ्गेषु होमस्तु[1] तद्दशांशः प्रकीर्तितः ।
हुतशेषं बलिंदत्वा निवेद्यं च विसर्जयेत् ॥ ३३
तोयमाचमनं दत्वा मुखवासं प्रकल्पयेत् ।
गन्धादिभिः समभ्यर्च्य ध्यात्वा मुद्रां[2] च[3] दर्शयेत् ॥ ३४
जप्त्वा प्रदक्षिणीकृत्य प्रणिपत्य प्रसाद्य च ।
अर्घ्यं दत्वोपचारेण देवीमुद्वासयेत् पुनः ॥ ३५
अस्त्रादि[4] संहृतां देवीं मूलेन स्वात्मनि न्यसेत् ।
मण्डले स्थण्डिले चैव कलशादिषु पूजनम् ॥ ३६
स्थापिते तु[5] विशेषः स्यात् सर्वैरावरणैर्विना ।
नोद्वासनं च तत्र स्यादेकवेरे प्रतिष्ठिते ॥ ३७
बहुवेरे तु किञ्चित्तु कर्मार्चायां समर्चयेत् ।
आवाह्य मूलबिम्बात्तु मूलबिम्बे विसर्जयेत् ॥ ३८
इति क्रिया[6]विधिः प्रोक्तो भुक्तिमुक्तिफलप्रदः ।
पूजायां येऽत्र मन्त्राः स्युस्तेषामुद्धार उच्यते ॥ ३९
त्रितत्त्वतारमुद्धृत्य शक्तिबीजं समुद्धरेत् ।
अष्टादशं[7] [8] पञ्चयुतं[9] [10] तृतीयं[11] वह्निशेखरम्[12] ॥ ४०
द्वितीयस्वरसंयुक्तं[13] वायुमैकारसंयुतम् ।
अनङ्गं[14] सविसर्गं तु स्पर्शान्तं[15] मूल[16] उद्धृतः ॥ ४१
प्रणवद्वयसंयुक्तां शक्तिं विद्धच्युपचारके ।
व्योमबीजं सबिन्दु च साग्निमेभिः स्वरैर्युतम् ॥ ४२
द्वितीयेन चतुर्थेन षष्ठेन द्वादशेन च ।

---

2 अञ्जलिमंत्रां । 4 हृदयान्तैः । 7 दकारं ।
9 उकारयुतं । 11 गकारं । 12 रेफयुतं ।
13 आकारयुतं । 14 नकारं । 15 मकारं ओं दुर्गायै नमः इति सिद्धम् । 16 मूलः – मूलमन्त्रः ।

---

1 होमे तु ग 3 मुद्राश्च ग 5 तेषु क ख 6 याग क ख
8 युतं क ख 10 दशं क ख

अन्त्येन च द्विसप्तेन[1] दुर्गाया नाम संयुतम् ॥ ४३
चतुर्थ्यन्तं तु नाम स्यात् सर्वत्र नमसायुतम् ।
अङ्गमन्त्रा इमे प्रोक्ता नेत्रान्तास्तु समासतः[2] ॥ ४४
आयुधानामथो वक्ष्ये मन्त्रं परमदुर्लभम् ।
तारं बीजं ततो नाम सम्बुद्ध्यन्तं फडन्वितम्[3] ॥ ४५
नमोन्तं हेतिमन्त्राणां लक्षणं परिकीर्तितम् ।
प्रणवद्वयमध्यस्थं क्लीं कारं मुण्डिनीमनुम् ॥ ४६
विद्यामन्त्रमथो वक्ष्ये सर्वसिद्धिप्रदायकम् ।
तारं नमो भगवति दुर्गे[4] सम्बुद्धिना सह ॥ ४७
उद्धरेदुर्गेति[5] पुनस्तारिणीति पदं तथा ।
मायां सम्बुद्धिनोद्धृत्य[6] महापूर्वं पुनश्च तत् ॥ ४८
दुष्टेत्युद्धृत्य च भयङ्करीति च समुद्धरेत् ।
विन्ध्येति च समुद्धृत्य निलयेति पदं पुनः ॥ ४९
जम्भेति च समुद्धृत्यासुरमर्दिनी पदं तथा ।
महाफल[7]पदं पश्चात्तच्च सम्बुद्धिनैव तु[8] ॥ ५०
महिषासुरपदं भूयो विनाशिनि[9] पदं तथा[10] ।
देवासुरपदं तद्वद्दैत्येति पदमुद्धरेत् ॥ ५१
पूजिते वरदे पश्चान्नारायणिपदं तथा ।
दामोदरपदं चापि प्रियेति च समुद्धरेत्[11] ॥ ५२
शक्तिबीजं ततो[12]द्धृत्य भूयश्चैतत्समुद्धरेत्[13] ।

---

1 चतुर्दशेन ओं ह्रां दुर्गायै हृदयाय नमः इत्यादि। 3 ओं रं चक्रफण् नमः इत्यादि। 6 महामायेति। 9 एतदनन्तरं दुष्टभयङ्करीति क पाठः व्याख्यासम्मतः।
12 अत्रोभयत्र द्विरिति पाठमाश्रित्य व्याख्यात्रा ह्रीमिति द्विवारमुक्तम्।

---

2 स्समुदाहृताः क ख 4 विद्यां क 5 दुर्गति क ख
7 फलावल क, फणावले घ 8–10 एतदर्धद्वयं ग पुस्तके नास्ति। क पुस्तके तु एतदनन्तरं दुष्टेति पूर्वोक्तश्लोकः पठितः।
11–13 एतदर्धपञ्चकं क, ख पुस्तकयोर्नास्ति।

अम्बरं[1] पञ्चमान्तेन बिन्दुना[2] च तथो[3]द्धरेत्[4] ॥ ५३
भूतग्रहपदं भूयो वेताळपदमेव च[5] ।
दुष्टेति पदमुद्धृत्य राक्षसेति पदं तथा[6] ॥ ५४
पिशाचांस्त्रासयेत्येवं भूयोऽपि त्रासयेति च ।
बन्धद्वयं समुद्धृत्य मारयेति समुद्धरेत् । ५५
भक्तेति च पदं भूयो वत्सले इति चापरम् ।
भक्तप्रिये पदं तद्वत् परे इति[7] बलं तथा ॥ ५६
मथनीति पदं भूयस्तद्वच्छत्रुनिकृन्तनि ।
सौभाग्यपदमुद्धृत्य प्रदे इति पदं तथा ॥ ५७
जयप्रदे पदं तुद्वद्भूयो वित्तप्रदे इति ।
यशोवति पदं भूय आयुष्येति पदं पुनः ॥ ५८
प्रदे इति समुद्धृत्य (कीर्तिशब्दं समुद्धरेत् ।
प्रदे पदं समुद्धृत्य श्रीप्रदे पदमेव च ॥ ५९
सर्वप्रदे पदं तद्वच्छान्तिशब्दं समुद्धरेत् ।
प्रदे पदं समुद्धृत्य)[8] महारूपे[9] पदं पुनः ॥ ६०
महाबले पदं तद्वदम्बरं बिन्दुना सह ।
आद्येन[10] च द्वितीयेन तृतीयेन परेण च ॥ ६१
चतुर्थेन च संयुक्तं शक्तिबीजं त्रिधोद्धरेत् ।
महामायेति नत्यन्तं[11] विद्यामन्त्रमुदाहृतम् ॥ ६२
पूजायां विनियुक्ता ये[12] तै[13]र्मन्त्राः कीर्तिताः क्रमात् ।

---

1 हकारं । 2 षष्ठस्वरयुतं हूमिति द्विवारमित्युद्धृतम् ।
3 अत्रोभयत्र द्विवेति पाठमाश्रित्य व्याख्यात्रा ह्रीमिति द्विवारमुक्तम् ।
10 स्वरेण – एवमुत्तरत्रापि, हं हां हिं हीं । 11 ह्रां ह्रीं ह्रीं महामाये नम इति सप्ताशीत्यधिकशताक्षरो विद्यामन्त्र इति नारायणः ।
13 ब्रह्मादिभिः ।

4–5–6 एतत् अर्धपञ्चकं क, ख पुस्तकयोर्नास्ति । 7 ति च ग
8 कंसाङ्कितो भागः ख पुस्तके नास्ति । 9 महाभूपे क ख ग
12 ते क ग

गोपनीया प्रयत्नेन साधकैः सिद्धिकांक्षिभिः ॥ ६३

इति क्रियासारे (त्रयस्त्रिंशः) दौर्गे पञ्चमः पटलः

षष्ठः पटलः

अथ तुर्येऽहनि प्राप्ते स्नपनं च समाचरेत् ।
पूर्ववन्मण्डपं सम्यग् भूषयित्वा विशोध्य च ॥ १
अग्निं संस्कृत्य विधिवत् पदानि परिकल्पयेत् ।
कलशस्यानुरूपेण व्रीहिभिः पीठिकाः[1] क्रमात् ॥ २
तेषु कृत्वा कुशौ द्वौ द्वौ न्यसेत्तासु[2] यथाक्रमम् ।
कलशान् सादयेत् पश्चात् क्षालितान् सूत्रवेष्टितान् ॥ ३
धूपितान् प्रणवेनैव न्यम्बिलांश्च यथाक्रमम् ।
दर्भानुपरि विन्यस्य गन्धोदैः प्रोक्ष्य चाक्षतान् ॥ ४
विकीर्योद्धृत्य विन्यस्य सर्वान्[3] तारेण वै क्रमात् ।
सम्प्रोक्ष्य कूर्चान् विन्यस्य तेषु द्रव्याणि पूरयेत् ॥ ५
हेमरत्नौषधीभिस्तु गन्धपुष्पफलैर्युतम् ।
तारेण गालितैस्तोयैर्मध्यकुम्भं प्रपूरयेत् ॥ ६
मूलेनावाह्य विधिवत् तस्मिन् देवीं प्रपूजयेत् ।
साङ्गां सपरिवारां च सर्वैश्चैवोपहारकैः ॥ ७
दुर्गाभिः शन्नवर्गैश्च रुद्रैर्होतृभिरेव च ।
संस्पृश्य कलशं जप्त्वा वस्त्रयुग्मेन वेष्टयेत् ॥ ८
अस्त्रमन्त्रेण विधिवत् कुर्यात्ताळत्रयादिकम् ।
एवमापाद्य शर्वादिकलशान्[4] पूरयेत् क्रमात् ॥ ९

4 दैविके ।

1 पीठिकं क 2 त्तेषु क ख 3 सर्वं क ग

सक्तुकं भस्मकं क्षौद्रं तैलमिक्षुरसं तथा ।
अश्वत्थं दौर्व्वरौप्ये[1] च बाह्ये[2] दिग्विदिगन्तरान् ।। १०
पाद्यार्घ्यगव्यगोमूत्रगोमयं च पयो दधि ।
सर्पिः कौशं कषायं च रत्नकाञ्चनधातुकम् ।। ११
गन्धं पुष्पं फलं [3] [4] सर्वानापूर्य्यायोज्य पल्लवैः ।
चक्रिका[5]न्यस्य संवेष्ट्य वस्त्रैरस्त्रेण च क्रमात् ।। १२
सम्प्रोक्ष्य सर्वान् सम्पूज्य परितो होममाचरेत् ।
पूर्वोक्तविधिना दिक्षु सम्पाताज्येन संस्पृशेत् ।। १३
सम्पूज्य जप्त्वा कलशान् रक्षां कुर्याद्विधानतः[6] ।
प्लक्षादिपञ्चकं दग्धं भस्मोदं सकरीषकम् ।। १४
दूर्वाश्यामाकसिद्धार्थं पाद्यद्रव्यमुदाहृतम् ।
गन्धपुष्पाक्षतांश्चैव कुशाग्रं तिलमेव च ।। १५
क्षीरं सिद्धार्थकं तोयमर्घ्यमष्टाङ्गमुच्यते ।
प्लक्षादीनां[7] चतुर्णां तु खदिरं च कषायकम्[8] ।। १६
मणिमुक्ताप्रवालानि वज्रं वैडूर्यनीलके[9] ।
ब्रह्मरागं महानीलं रत्नोदकमुदाहृतम् ।। १७
मनःशिलां हरीताळमञ्जनं श्यामसीसकें ।
सौराष्ट्रीं रोचनां चैव गैरिकं पारतं[10]तथा ।। २८
चोरवानरकर्पूरकुङ्कुमागरुचन्दनैः ।
जटागोरोचनाभ्यां तु संयुक्तं गन्धवारि च ।। १९
बकुळं नन्दि[11]संज्ञं च जातीमल्लिक[12]संज्ञितम् ।
चम्पकाशोकपुन्नागं[13] सप्तपुष्पाणि चार्च[14] तु ।। २०

---

2 मानुषे । 4 एवं । 6 दूर्वाकुशव्याघ्रीसिंहीशतगुणाओषध्यः व्याख्योक्ताः । 7 बिम्बकलशोक्तानां प्लक्षौदुम्बरन्यग्रोधशमीनां ।

---

1 रौप्यवौर्व्ये क ख ग 3 गन्धपुष्पाक्षतफलाम् क ख 5 कां क
8 के क ख 9 कं क 10 कं ख ग 11 जाति क ख
12 नन्दिक क ख 13 नागानां क ग 14 चात्र- क ग

नारङ्गं नाळिकेरं च कादलं[1] बीजपूरकम्[2] ।
बदरं जातिसंज्ञम् च फलपट्कमुदाहृतम् ।। २१
प्रभाते कृतनित्यस्तु[3] द्विजाहोनं विधाय च ।
सम्पूज्य कलशान् भूयः स्नपनाय समारभेत्[4] ।। २२
आचम्य द्वारमासाद्य मूलमन्त्रं जपेच्छतम् ।
वायुना द्वारमुद्घाट्य दत्वाऽर्घ्यं विधिवद्गुरुः ।। २३
निर्माल्यमपनीयाथ प्रक्षाळ्य सलिलैः शुभैः ।
आराध्य पीठं विधिवत् तत्वानि न्यस्य सादरम् ।। २४
आवाह्य सकलीकृत्य पाद्यार्घ्यं विनिवेदयेत् ।
छित्वा कौतुकमस्त्रेण दद्यादाचमनं पुनः ।। २५
दूर्वाक्षतांश्च तारेण विन्यसेन्मूर्ध्नि पादयोः ।
नीराज्य कलशान् शिष्यैरावाह्य [रानाय्य] स्नापयेद्गुरुः ।। २६
इदं विष्णुरिति[5] पाद्यमापोहिष्ठार्घ्यमेव च ।
अग्निर्मीळे तथा गव्यं[6] दध्यन्तानि स्वमन्त्रकैः ।। २७
इषेत्वेति घृतस्नानं सावित्र्या तु कुशोदकम् ।
अश्वत्थेवः कषायाम्भस्त्र्यम्बकं रत्नवारि च ।। २८
हिरण्यगर्भो[7] हेमाम्भो मानस्तोके च धातुकम् ।
शन्नो[8] गन्धस्ततः पुष्पफले पुष्पावतीरिति ।। २९
सुमित्रान[9] [ध्यान] स्तथा सक्तून् भूतिश्रीर्भस्मवारि च ।
मधुवातास्तथा क्षौद्रं तैलं विश्वानिनस्तथा ।। ३०
अग्नें त्वं गौळमाश्वत्थमश्वत्थेव ऋचैव तु ।
शन्नो देवीस्तथा दौर्ग्यं रौप्यमग्ने त्वमेव च ।। ३१
मध्यमं दशहोत्रा[10] च स्नापयेद्गुरुरादरात् ।

---

2 बाडिमं । 3 पूर्वमकृतश्चेत् । 6 गोमूत्राबीनि । 8 शन्नोदेवीति ।
9 एवं बाह्यकलशैरभिषिच्य बैखिके आह । 10 चित्तिः स्रुगाहुति ।

---

1 बकुळं ख 4 चरेत् क ख 5 रितिः क ग 7 गर्भ ख

एकैकेन[1] सहैकैकं शिष्टैर्वर्णैस्तु मध्यमम् ।। ३२
आद्यायाः[2] शुद्धतोयैश्च दुर्गाभिः[3] स्नापयेत् पुनः ।
ब्रह्मसूक्तेन वै [वा] कुर्यादन्तरा स्नानमेव च ।। ३३
खण्डशः पूजयित्वा तां नीराज्य प्रणवेन च ।
पूजयेत् परया भक्त्या बहुभिश्चोपहारकैः ।। ३४
कामतः स्नपनं कुर्यादासहस्रान्तमेव च[4] ।
अवस्रुतेन तोयेन प्रोक्षयेदङ्गदेवताः[5] ।। ३५
बलिं च विकिरेदन्ते मुण्डिं तेनाभिषिच्य च ।
कृत्वैवमभिषेकं तु गुरुं सम्पूज्य दक्षिणाम् ।। ३६
दद्यान्मूर्तिधरेभ्यश्च विद्वद्भ्यश्च स्वशक्तितः ।
निमित्तार्थानुसारेण यः[6] कुर्याद्भक्तिसंयुतः[7] ।। ३७
तस्येष्टं सिद्ध्यति क्षिप्रं परत्रेह च सर्वदा ।
निमित्तं यदि जायेत क्षिप्रं निष्कृतिमाचरेत् ।। ३८

इति क्रियासारे (चतुस्त्रिंशः) दौर्गे षष्ठः पटलः

सप्तमः पटलः

दोषे जातेऽर्चना देव्या न कार्येत्यागमोदितम् ।
तस्मात्तत्परिहारार्थं प्रायश्चित्तं समाचरेत् ।। १
खननाद्यैर्भुवः शुद्धिः कार्या स्थाने[8] निमित्तके ।
दोषे बिम्बगते बिम्बं शोधयेत् क्षाळनादिभिः ।। २

---

1 आद्यायाः त्रिष्टुभः एकैकं वर्णं एकैककलशाभिषेके विनियोज्याव-शिष्टवर्णैर्मध्यकलशमभिषेचयेदिति शेषः । 2 पूर्वशेषः ।
3 प्रति खण्डमन्तरा स्नानमन्त्रानाह । 5 क्षेत्रपालान्ताः ।
4 अर्धद्वयं क पुस्तके नास्ति । 6 यत् ख ग 7 तं ख 8 स्थानं ख

शोधिते चोभये भूयः प्रायश्चित्तं समाचरेत् ।
त्रिकोणमुत्तरे कुर्यादर्धचन्द्रं तु दक्षिणे ।। ३
कुण्डं कृत्वा यथान्यायमग्निम् सञ्जनयेत्[1] ततः ।
कृत्वा चाग्निमुखं पश्चात् पक्वहोमं तु दुर्गया ।। ४
अष्टो [दशो] तरशतं[2] पश्चाद्दुर्गाभिर्जुहुयात् घृतम् ।
ततस्तु समिदादीनि हुनेदष्टोत्तरं शतम् ।। ५
खादिरं ब्राह्ममाश्वत्थं प्लक्ष[3]न्यग्रोधसम्भवम् ।
अपामार्गं तु बैल्वं च औदुम्बरकृताञ्जली ।। ६
दुर्गाभिर्मूलमन्त्रेण[4] विलोमात्तिस्रभिस्तथा ।
तिलसर्षपनीवारान् मूलेन मधुरत्रयम्[5] ।। ७
मृत्युञ्जयेन होतव्यमष्टोत्तरशतं पृथक् ।
ततः स्विष्टकृदादीनि हुत्वा शेषं समापयेत् ।। ८
हुतभस्म च सम्पातं प्रणीताजलमेव च ।
सिक्त्वा तु कलशे जप्त्वा देवीं तैरभिषेचयेत् । ९
धेनूनां दशकं चापि[6] दक्षिणां गुरवे ददेत् ।
एवं कृते तु दोषाणां भूयः शान्तिर्भविष्यति ।। १०
दोषे महति तुर्य-श्रे वृत्ते पूर्वापरे तथा[7] ।
होमं कृत्वा प्रयत्नेन कुर्यात् स्नानं च शक्तितः ।। ११
शान्तिहोमं तु कर्तव्यं प्रयत्नाद्दोषशान्तये ।
तुर्यश्रं कुण्डमैशान्यां कृत्वाऽग्निं जनयेत्पुनः ।। १२
कृत्वा चाग्निमुखं पश्चात् पक्वं पूर्ववदाचरेत् ।
यागमन्त्रेण जुहुयादष्टोत्तरसहस्रकम् ।। १३
घृतं स्विष्टकृदादीनि हुत्वा शेषं समापयेत् ।

---

1 उभयत्र । 2 दशोत्तरमिति युक्तम् । 4 दुर्गाभिः खदिराबि पञ्च समिधः, मूलेनापामार्गं, प्रतनेति बैल्वं, विश्वानिन इति उदुम्बर समिधः, अग्नेत्वमित्यञ्जलिसमिधः । 5 दधिक्षौद्रघृतात्मकम् ।

3 प्लक्षं ख ग 6 वाऽर्धं ग 7 थ वा क ख

देवोद्भवोदितौ[1] देव्याः शान्तिहोमः प्रकीर्तितः ॥ १४
तारं दुर्गापदं पश्चाद्रूपिणीति समुद्धरेत् ।
कुमारी रूपिणीत्येवमार्यावर्तिनि चोद्धरेत् ॥ १५
मायारूपिणि भूयोऽत्र उत्सवादि[2] च वासिनि ।
यागभक्त[3]पदं तद्वत् कारिणीति पदं पुनः ॥ १६
सर्वमन्त्रपदं भूयो व्यापिनीत्युद्धरेत् पुनः ।
सर्वक्रियेति सङ्कीर्त्य वर्धिनीति समुद्धरेत् ॥ १७
सर्वदोषपदं तद्वन्मर्दिनीति पदं पुनः[4 5] ।
तथा सर्वफलेत्युक्त्वा दायिनीत्युद्धरेत् पदम् ॥ १८
तथा सर्ववरं चोक्त्वा दायिनीत्युद्धरेत् पदम् ।
चतुर्विंशाक्षरं[6] भूयस्तृतीयं[7] वतिसंयुतम्[8] ॥ १९
प्रसादमा समुद्धृत्य पादयत्विति ठद्वयम् ।
यागमन्त्र इति ख्यातः क्रियामन्त्रेति कीर्तितः ॥ २०
एवं संक्षेपतः प्रोक्तं प्रायश्चित्तम् विशुद्धये ।
ब्राह्मणान् भोजयेत् पश्चात् स्नानमुत्सवमाचरेत् ॥ २१

इति क्रियासारे (पञ्चत्रिंशः) दौर्गे सप्तमः पटलः

अष्टमः पटलः

उत्सवस्य विधिं वक्ष्ये संक्षेपेण विभूतिदम् ।
पञ्चाहं वाऽथ सप्ताहं नवाहमथ वाऽऽचरेत् ॥ १
बीजाङ्कुरार्पणोपेतं ध्वजस्थापनसंयुतम्[9] ।

---

1 तन्त्र नाम । 5 एतदनन्तरं सर्वक्रियेत्याद्युक्तं व्याख्या ।
6 भः । 7 गः । 8 भगवतीति सिद्धम् ।

---

2 नि ग 3 जाग्रदुक्त्वा क ख 4 अर्धद्वयं क पुस्तके नास्ति । 9 मुत्तमं ख

स्थानशुद्ध्यादिसंयुक्तं कुर्यादुत्सवमञ्जसा ॥ २
द्रव्याढ्यं पूजयेद्देवीं बहुवाद्यसमन्वितम् ।
पत्रच्छेदादिसंयुक्तं रात्रौ सम्पूज्य भक्तितः ॥ ३
आराध्य[1] कौतुके देवीं तदादाय बलिं हरेत् ।
पूर्वोक्तानां तु देवीनां देवानां च यथाविधि ॥ ४
पर्षदां च ग्रहाणां च बहुभक्ष्य[2]समन्वितम् ।
दिवापि[3] च बलिं कुर्याच्छेषेषु दिवसेषु च ॥ ५
यात्रापूर्वदिने रात्रौ महाबलिमथाचरेत् ।
बलिं दत्वा प्रविश्यान्तर्देवीं सम्प्रार्थयेत्ततः ॥ ६
तीर्थयात्रा त्वया देवि श्वः कर्तव्या सुरेश्वरि ।
तत्र प्रतिसरारम्भं त्वमनुज्ञातुमर्हसि ॥ ७
घृतस्यारोपणं कृत्वा पुण्याहं पुनराचरेत् ।
चक्रेण कौतुकं बध्वा मङ्गलानि च दर्शयेत् ॥ ८
आवाह्य कौतुके देवीमाराध्याच्छाद्य वाससा ।
शाययेन्मण्डपे पश्चात्सायाह्ने पूर्वकल्पिते ॥ ९
मण्डपेऽलङ्कृते सम्यग्दीपाङ्कुरविराजिते ।
अष्टमङ्गलसंयुक्ते मूलमन्त्रेण देशिकः ॥ १०
सन्धूप्य धूपै[4]र्वि-धिवद्गेयवाद्यादिसंयुतम् ।
रात्रिशेषं समासीत अनिर्वाणप्रदीपकम्[5] ॥ ११
स्नात्वा प्रभाते सञ्जप्य कृतनित्यः स्वलङ्कृतः ।
उत्थाप्य शयनाद्बिम्बं दत्वाऽर्घं पाद्यमेव च ॥ १२
दन्तकाष्ठं निवेद्यास्यै[6] तोयमाचमनं ददेत् ।
संस्नाप्य वाससाऽऽच्छाद्य दद्यादाचमनं पुनः[7] ॥ १३

3 अपि शब्दाद्रात्रावपि ।

1 आवाह्य ग 2 भक्ति ख 4 दीपै ग
5 कैः क ख 6 स्ये ख 7 अर्घं क, ख पुस्तकयोर्नास्ति ।

दूर्वादिभिरलङ्कृत्य ददेद्गन्धाञ्जनादिकम् ।
दर्पणं दर्शयित्वाऽस्यै विघ्नार्चनमथाचरेत् ॥ १४
गोभ्योऽथ यवसं दत्त्वा विप्रेभ्यो दानमाचरेत् ।
नीत्वाऽन्तर्भू[1]लविम्बस्थां पूजये त्परमेश्वरीम् ॥ १५
यात्राहोमं ततः कुर्यात् कृत्वा चूर्णं विधानतः ।
पूजयित्वाऽभिषिच्याद्भिश्चूर्णैरुन्मृज्य सादरम् ॥ १६
भूयोऽभिषिच्य गन्धाद्यैर्दीपान्तं पुनरर्चयेत् ।
पुण्याहं मूर्तिपैः सार्धं कुर्यात् संस्थाप्य कौतुकम् ॥ १७
कौतुकं शोधयित्वाऽथ[2] त[3]स्मिन्नावाहयेच्च ताम् ।
सम्पाताज्येन संस्पृश्य सकळीकृत्य पूजयेत् ॥ १८
सञ्छाद्याहतवस्त्राभ्यां तदादाय बहिर्व्रजेत् ।
द्वारि मङ्गलवादं च कृत्वा विप्रगणैः सह ॥ १९
गच्छेत् प्रदक्षिणीकृत्य गेहं कृत्वा बलिं क्रमात् ।
आसाद्य वाहनं भूयः सिंहवद्वाऽनयेच्च तत्[4] ॥ २०
प्रोक्ष्याऽरोप्य ततो गच्छेन्नदीं वाऽन्य जलाशयम् ।
बहुवाद्यसमायुक्तं सेनाभक्तजनान्वितम् ॥ २१
तीर्थपार्श्वे न्यसेद्बिम्बं सञ्छाद्यालिप्य सर्वतः ।
पूजयित्वाऽग्निमाधाय संस्कृत्याज्यं[5] यथाविधि ॥ २२
चतुर्गृहीतं जुहुयाद्दुर्गाभिर्वारुणैरपि ।
तैरेव तीर्थमावाह्य[6] स्नापयेत् परमेश्वरीम् ॥ २३
उत्तीर्य पीठे विन्यस्य पाद्यार्घ्याचमनं ददेत् ।
अब्लिङ्गैः प्रोक्षयेत् पश्चादुर्गाभिर्वारुणैरपि ॥ २४
चूर्णैरुन्मृज्य भूयोऽपि स्नापयेत्तैर्जनै[7]स्सह ।

---

2 संहारसृष्टिभ्यां ।

---

1 न्तं मू ख 3 शोधयित्वा तथा तस्मिन्न- ग 4 तम् ग
5 त्य च क ख 6 र्थं सङ्कल्प्य-ग 7 जलै ग

उत्तीर्य मन्त्रैः सम्प्रोक्ष्य पूजयेद्विधिनैव तु ।। २५
हुत्वा मन्त्रैर्बलिं दत्वा जले सञ्छाद्य वाससा ।
दक्षिणां च ददेद्धेनुं चषकम्[1] वसनद्वयम् ।। २६
दत्वाऽऽचमनमारोप्य यानम् गच्छेद्द्रुतम् सुधीः ।
प्रदक्षिणं समासाद्य दत्वाऽर्घ्यं द्वारि वाग्यतः ।। २७
प्रवेश्य देवीं विन्यस्य गन्धपुष्पाक्षतोदकैः ।
आवाह्य तेन विधिवन्मूलार्चां स्नापयेद्गुरुः[2] ।। २८
सकळीकृत्य सम्पूज्य निवेद्य च महद्धविः ।
रात्रौ भूतबलिं दत्वा भोजयेच्चाशनार्थिनः ।। २९
श्वोभूते स्नपनं कुर्यादुत्तमादिक्रमेण तु ।
गुरुं सम्पूजयेत् पश्चान्मूर्तिपांश्च सदस्यकान् ।। ३०
इति संक्षेपतः प्रोक्तं देव्याः स्थापनमुत्तमम् ।
एतत् कृत्वा विधानेन विष्णोः सायुज्यमाप्नुयात् ।। ३१

इति क्रियासारे (षड्त्रिंशः) दौर्गे अष्टमः पटलः

स्कन्दभागः

प्रथमः पटलः

अहं वक्ष्ये समासेन गुहस्य स्थापनादिकम् ।
शिरसा तं नमस्कृत्य देवीं च गिरिजात्मजाम्[3] ।। १
देव्या सम्प्रार्थितो देवस्तस्यै यद्य[4]दुवाच ह ।

1 वोहनपात्रं । 3 गिरिजां– आत्मना स्वयमेव जातां ।
2 चार्यां नियोजयेत् न 4 यद्व- ख

गुह्यस्य स्थापनाद्यं यत् तत्समासाद्वदाम्यहम् ॥ २
देव्युवाच – भगवन् भूतभव्येश पुराणपरमेश्वर ।
स्थापनं षण्मुखस्याद्य कथयस्व महेश्वर[1] ॥ ३
देव्या सम्प्रार्थितो देवः कथयामीति चाब्रवीत् ।
तस्यै यद्वाञ्छितं सर्वमाचष्टाखिलमीश्वरः ॥ ४
मन्त्रोद्धारं तथा पूजामग्निसंस्कारमेव च ।
भूशुद्धिमिष्टकाधानं गर्भस्य स्थापनं तथा ॥ ५
बीजाङ्कुरं बिम्बशुद्धिमधिवासमतः परम् ।
स्थापनं स्नपनं तद्वदुत्सवं निष्कृतिं तथा ॥ ६
जीर्णोद्धारमिदं सर्वं कथयामि समासतः ।
हरेण यत्क्रमादेतत् प्रोक्तं तेनैव वर्त्मना ॥ ७
मन्त्रैरेव क्रियाः सर्वाः प्रायशः कथिता बुधैः ।
तस्मात् तदधुना वक्ष्ये मन्त्रोद्धारं समासतः ॥ ८
विविक्ते सुसमे रम्ये दुष्टपाषिष्ठवर्जिते ।
शोधिते मातृकां देवीं चन्दनेन सुगन्धिना ॥ ९
वर्गी[2]कृत्य त्रिधा सम्यगालिखेत् साधकः स्वयम् ।
आदिपङ्क्तौ[3] स्वरांस्तद्वत् स्पर्शांश्च व्यापकानपि[4] ॥ १०
पङ्क्तिद्वये समालिख्य पूजयेद्गन्धपुष्पकैः ।
उद्धरेत् तेषु मन्त्रांश्च सकलीकृतविग्रहः ॥ ११
स्वरादिमुद्धरेत् पूर्वं पुनस्तत्रैव पञ्चमम् ।
स्पर्शान्तं चादिवर्णोनं[5] [6] त्रयमेकत्र योजयेत् ॥ १२
प्रणवोऽयं मनुः साक्षाद्वेदसारमनुत्तमम् ।
तेन पूजा जपो होमो मोक्षदः परिकीर्तितः ॥ १३

---

4 द्वितीयपङ्क्तौ स्पर्शान् तृतीयपङ्क्तौ यान्यक्षरान् । 6 अकाररहितं ।

---

1 अर्धं ख पुस्तके नास्ति । 2 वर्शी घ, गकी क ग
3 वक्त्रौ क ग 5 वर्गोनं ख

चतुर्थं[1] व्यापकात् स्पर्शात् षष्ठं[2] तं षोडशान्वितम्[3] ।
पञ्चमस्वरसंयुक्तं चतुर्विंश[4]मथो[5]द्धरेत् ॥ १४
आद्यर्ण[6]मेयुतं ते[7]षां विंशति[8]स्तदनन्तरम् ।
आद्यन्तयुक्तं[9] स्पर्शान्तं[10] मूलमन्त्रमुदाहृतम् ॥ १५
अङ्गानि कल्पयेद्बीजैः षड्भिर्बिन्दुसमन्वितैः ।
चतुर्थीनामजात्यन्तै[11]र्नेत्रान्तं पञ्चमं[12] तु तत्[13] ॥ १६
मूलमन्यत् प्रवक्ष्येऽहमुपचाराय साम्प्रतम् ।
पूर्वं तारं समुद्धृत्य व्यापकात् षष्ठ[14]मुद्धरेत् ॥ १७
स्पर्शान्तं पञ्चमोपेत[15]मूर्ध्वं पञ्चदशान्वितम्[16] ।
द्वितीयस्वर[17]संयुक्तं[18] स्पर्शाद्यस्योपरि स्थितम्[19] ॥ १८
उद्धरेद्वायुमस्योर्ध्वे तारान्ते नमसायुतम् ।
उपचाराय निर्दिष्टः सप्तार्णोऽयं मनुः स्मृतः ॥ १९
गायत्रीमथ वक्ष्यामि स्कन्दस्य परमात्मनः ।
शक्तिहस्ताय तारान्ते उद्धरेद्विद्महे पदम् ॥ २०
तद्वत् षडाननायेति धीमहे तदनन्तरम् ।
तन्नः स्कन्दः पदं पश्चादुद्धरेच्च प्रचोदयात् ॥ २१
आकारबिन्दुसंयुक्ता[20] याद्यर्णाः[21] शक्तिबीजकाः ।
अन्येषां पीठमन्त्राणां हृद्बीजं बीजमुच्यते ॥ २२
आद्यर्णं मूर्तिशक्तीनां[22] बिन्दुयुक्तमुदाहृतम्[23] ।
सनत्कुमारस्कन्देन्द्रविशाखाः[24] षष्ठ[25]षण्मुखौ ॥ २३

---

1 वः । 2 चः । 3 त् । 4 भं । 6 वः । 8 नः ।
9 आदिवर्गेन्त्यो विसर्गः । 10 मः । 12 नकारः । 13 नेत्रबीजं ।
14 षं । 15 उकारेण । 16 णकारः । 18 आकारः ।
19 खः । 20 यां रां इत्यादीनि नवशक्तिबीजानि । 22 सनत्कुमारादि मूर्तीनां, देवसेनादेवयान्योः शक्त्योश्च आद्यक्षरं बिन्दुकारयुतं बीजं ।

---

5 त्तयो क ग 7 मयुतस्त्वे क 11 र्णं क 17 याक्षर ख
21 र्णं क ग 23 बिन्दुकारसमायुतं घ 24 विशिखाः ख 25 षष्ठि ख

षण्मन्त्राः प्रणवाद्याश्च चतुर्थ्यन्ता नमोन्विताः ।
वक्ष्ये द्वादशनामानि षण्मुखस्य महात्मनः ॥ २४
स्कन्दो बाणो हेमचूडो भद्रसेनो भवस्तथा ।
भवपुत्रोऽन्नाद्यशीलो कुक्कुटध्वज एव च ॥ २५
मयूरवाहनगुहौ सनत्कुमार एव च ।
महासेनेन सहिताश्चतुर्थ्यन्ता नमोन्विताः ॥ २६
ताराद्याः पूजने होमे स्वाहाकारसमन्विताः ।
ज्वालापदं समुद्धृत्य मालिनीति समुद्धरेत् ॥ २७
हुमन्तः शक्तिमन्त्रोऽयं वर्णैरस्याङ्गकल्पना ।
(तारं ज्वलज्वलास्योर्ध्वं ज्वालिनीति समुद्धरेत्[1] ॥ २८
अयं च शक्तिमन्त्रः स्यात् पादैरस्याङ्गकल्पना ।
नामजातियुतैः षड्भिस्ताराद्यैरस्त्रपश्चिमैः)[2] ॥ २९
मन्त्रोद्धारमिदं प्रोक्तं गोपनीयं च साधकैः ॥ ३०

इति क्रियासारे (सप्तत्रिंशः) स्कान्दे प्रथमः पटलः

द्वितीयः पटलः

पूजामथ[3] समासेन वक्ष्ये सर्वार्थसिद्धये ।
स्नात्वाऽऽचम्य शुचिर्भूत्वा देवागारं प्रविश्य च ॥ १
करशुद्धिमथास्त्रेण कृत्वा ताळत्रयादिकम् ।
कुर्यादस्त्रेण[4] दिग्बन्धमग्निप्राकारमेव च ॥ २
प्राणायामत्रयं कुर्याद्धारणात्रयसंयुतम् ।

4 अङ्गमन्त्रास्त्रेणेति नारायणः ।

1 हुं फट्कारं समुद्धृत्य वह्निजायां ततो वदेत् । घ पुस्तकेऽधिकं ।
2 कंसाङ्कितो भागः क, ग पुस्तकयोर्नास्ति । 3 मपि क

मूलेन पञ्चविंशत्या यावच्छक्तिजपेन वा ।। ३
वाग्भवन्यमृतबीजैश्च धारणा धारयेत्ततः ।
मन्त्रन्यासं यथा[1] कुर्यात् करे देहे यथाक्रमम् ।। ४
व्यापकं करयोर्मूलमङ्गान्यङ्गुष्ठतः क्रमात्[2] ।
नेत्रं तलद्वये न्यस्य शरीरे व्यापकं न्यसेत् ।। ५
मूर्धास्यहृदये गुह्ये जानुपादद्वये न्यसेत् ।
तारसम्पुटितान् मूलमन्त्रार्णान् बिन्दुसंयुतान् ।। ६
नमोन्तान् हृदयाद्यङ्गस्थानेष्वङ्गानि[3] विन्यसेत् ।
मुद्राः[4] सन्दृश्य हृत्पद्मे ध्यात्वा देवं समर्चयेत् ।। ७
मानसामृतजैर्दिव्यैरुपहारैश्च भक्तितः ।
ध्यात्वाऽऽत्मानं गुहं पश्चान्मूलमष्टावरं जपेत् ।। ८
अर्घ्यपात्रं ततोस्त्रेण प्रक्षाळ्यापूर्य मूलतः ।
अस्त्रेण क्षाळयेत्पात्रं पूरयेन्मूलमन्ततः ।। ९
गन्धपुष्पयुतं कृत्वा तारमष्टावरं जपेत्[5] ।
प्रोक्षयेदद्भिरात्मानं स्थण्डिलं कुसुमानि च ।। १०
फट्कारान्तेन तारेण अलङ्कुर्यात् स्वविग्रहम् ।
मण्डले स्थण्डिले वाऽपि योगपीठं प्रकल्पयेत् ।। ११
आधारशक्तिं चानन्तं मध्येऽभ्यर्च्यानलादिषु ।
कोणेषु पादान् धर्मादियोगपीठस्य कल्पयेत् ।। १२
धर्मं ज्ञानं च वैराग्यमैश्वर्यं च यथाक्रमम् ।
पूर्वादि दिक्ष्वधर्मादीन् गात्राणि परिकल्पयेत् ।। १३
सत्वं रजस्तमश्चैव[6] तन्तुरूपांस्तथोपरि ।
मायाविद्ये ततः पद्मकेसरेष्वष्टशक्तयः ।। १४

---

3 नेत्रान्तान्येव । 4 अञ्जल्याद्याः 6 गुणान् ।

---

1 क्रमात् ख 2 -ङ्गन्यासमतः क्रमात् क 5 तस्मिन् मन्त्रं तु विन्यसेत् क ग

मध्ये तु नवमी कल्प्या बीजैर्नामसमन्वितैः ।
विद्या शान्तिः स्मृतिर्मेधा प्रज्ञा कान्तिर्द्युतिर्धृतिः ॥ १५
व्यापिनी नवमी ज्ञेया मण्डलात्मत्रयं क्रमात् ।
एवं सङ्कल्प्य सम्पूज्य तस्मिन् प्रतिकृतिं स्मरेत् ॥ १६
उपचारेण हृत्पद्मादावाह्यास्मि[1]न्नियोजयेत् ।
मूलेन तेन विन्यस्य ध्यात्वार्घ्यादिभिरर्चयेत् ॥ १७
भूषावसानं मूर्तीनामङ्गानां स्नानपूर्वकम् ।
गन्धादीनि तु सर्वेषामुपहाराणि कल्पयेत् ॥ १८
सनत्कुमारं स्कन्दं च बाणं वै हेमचूडकम् ।
दिक्ष्वीशे भद्रसेनं च भवपुत्रं तथाऽनले ॥ १९
देवसेनां देवयानीं नैर्ऋतानिलयोर्यजेत्[2] ।
अग्नीशरक्षो वायव्यदिक्ष्वङ्गानि च पूजयेत् ॥ २०
[दिक्ष्वस्त्रं पूजयित्वाऽथ नेत्रमध्ये च पूजयेत्]
इन्द्रादींश्च तदस्त्राणि पूजयेच्च ततः क्रमात् ।
धूर्तसेनमथैशान्यां सर्वान् सम्पूज्य वै क्रमात् ॥ २१
अस्त्रेण क्षाळयेत् पात्रमाज्येनास्मिन्नुपस्तरेत् ।
चतुर्विधं क्षिपेत्तस्मिन्निवेद्यं च निवेदयेत् ॥ २२
परिषिच्य तु मूलेन तेनैवाचमनीयकम् ।
दत्वा मुद्राश्च[3] सन्दर्श्य होमकर्म समाचरेत् ॥ २३
पीठमन्त्रैः सकृद्धुत्वा[4] मूलेनावर्त्य[5] होमयेत् ।
दशांशमङ्गमूर्तीनामन्येषां च सकृत् सकृत् ॥ २४
शेषान्नेन बलिं दद्याद्भूतेभ्यो भक्तिसंयुतः[6] ।
ततः प्रदक्षिणीकृत्य नमस्कृत्य स्वयं गुरुः ॥ २५

---

3 प्राणादि । 4 आज्याप्लुतहविषा ।
5 अष्टसंख्यमष्टाविंशति-संख्यमष्टोत्तरशतसंख्यं वा ।

---

1 स्या क 2 त्यामनिलेऽर्चयेत् ख, नले क 6 तं ख ग

आचम्याचमनं दत्वा निवेद्यं च विसर्जयेत् ।
धूर्तसेनाय तं दद्याद्गन्धपुष्पादिसंयुतम् ॥ २६
तोयमाचमनं दत्वा ताम्बूलाद्यं प्रदापयेत् ।
गन्धपुष्पादिभिः सम्यक् पूजयेच्च गुहं प्रभुम् ॥ २७
ज्ञात्वा स्तुत्वा मुदा देवं संहृत्य हृदये न्यसेत् ।
नमः स्कन्दाय बाणाय हेमचूड नमोऽस्तु ते ॥ २८
भद्रसेन नमस्तुभ्यं भवाय भवसूनवे ।
नमस्तेऽन्नाद्य[1]शीलाय नमः कुक्कुटकेतवे ॥ २९
मयूरवाहनायाऽस्मै गुहाय परमात्मने ।
नमः सनत्कुमाराय महासेन नमो नमः ॥ ३०
सुब्रह्मण्य नमस्तेऽस्तु विप्रप्रिय नमो नमः ।
शश्वद्बाल नमस्तेऽस्तु कौमारब्रह्मचारिणे ॥ ३१
तरुणार्कायुतप्रख्य करुणाकर सुन्दर ।
तव पादाब्जयोर्भक्तिर्मम जन्मनि जन्मनि ॥ ३२
अविच्छिन्ना भवत्वेषा संसारभयहारिणी ।
याऽरणिः सर्वभोगानां मुक्तेरपि च केवला ॥ ३३
तामेकामेव याचेऽहं प्रसीद परमेश्वर ।
उपचारेण मूलेन संक्षेपेणोदिताऽर्चना ॥ ३४
एतां कृत्वा यथान्यायमिष्टान् कामानवाप्नुयात् ॥ ३५

इति क्रियासारे (अष्टत्रिंशः) स्कान्दे द्वितीयः पटलः

तृतीयः पटलः

अथाग्निसंस्कृतिं वक्ष्ये गुहस्येह समासतः ।

1 नाटच क ग

संस्कृताग्नौ कृते होमे साधकः सिद्धिमाप्नुयात् ॥ १
सुसंस्कृते यथा क्षेत्रे फलं प्राप्नोति कर्षकः ।
हुतभुक् च तथा ज्ञेयः संस्कृतः फलदो नृणाम् ॥ २
संस्कृताग्नौ हुनेत् तस्माच्छक्तो नाऽसंस्कृतेऽनले ।
कुण्डं लक्षणसम्पन्नं कृत्वाऽग्निं जनयेत् ततः ॥ ३
स्रुक्स्रुवौ कारयेत्तत्र तयोर्लक्षणमुच्यते ।
चतुर्दशाङ्गुलायामं तत्पञ्चांशक[1]विस्तरा ॥ ४
तदर्धोत्सेधसंयुक्तं तुर्यश्रं पुष्करं भवेत् ।
पुष्कराग्रे गळं[2] तारा[3]त्तस्मादर्धोपमं भवेत् ॥ ५
तारार्धायामसंयुक्तं तारद्विगुणितं मुखम् ।
कण्ठतारायतं मूलमग्रं कण्ठायतं भवेत् ॥ ६
अग्रं त्रिभागं कुल्या स्यान्मध्ये कार्या सुशोभना ।
पुष्करे बिलनिम्नं स्याद्गळतारार्धसम्मितम् ॥ ७
तस्यायामार्धकं वाऽपि बिलास्यं परितः स्थितम् ।
पुष्करस्य तु सप्तांशाद्बिलपृष्ठे तु पीठिका ॥ ८
चतुरश्राऽथ वा वृत्ता बिलनिम्नोन्नता भवेत् ।
पुष्करार्धोपमं दण्डं मूलेऽग्रे त्र्यंशहीनकम् ॥ ९
वृत्तं सुशोभनं दण्डं स्रुगियं परिकीर्तिता ।
रत्निमात्रः स्रुवः कार्यो दैर्घ्यादग्रेऽङ्गुलं मुखम् ॥ १०
अग्रेऽस्य द्वे बिले कार्ये प्रत्येकं षड्यवायते ।
तदर्धविस्तारयुते मध्ये चार्गळसंयुते ॥ ११
पृष्ठे स्रुवस्य धारा स्याद्दण्डमूलेऽग्रविस्तृतम् ।
चतुर्थांशविहीनाग्रं वृत्तम् गोपुच्छवच्छुभम् ॥ १२
ईदृग्विधं स्रुवं कृत्वा ततः कर्म समारभेत् ।
सम्मार्ज्यालिप्य संशोध्य[4] संवाप्या[5] [6] यतनं पुनः ॥ १३

1 विस्तारषड्वांशविस्तारा। 2 कर्णः। 3 विस्तारात्। 6 अग्निबीजेन।

4 ध्य क ख 5 च्या ग

उल्लिख्यास्त्रेण सम्प्रोक्ष्य कवचेनात्र विष्टरम् ।
तारेण कल्पयित्वाऽस्मिन् देवयानीं यजेत्पुनः ।। १४
आदाय वह्निं मूलेन[1] वि [नि] धायाभ्युक्ष्य तं यजेत् ।
तेनास्य योनिमार्गेण निक्षिपेदग्निमात्मवान् ।। १५
अग्निं सन्धुक्ष्य मूलेन गर्भाधानादि कल्पयेत् ।
परिसमुह्य परिस्तीर्य पर्युक्ष्याभ्यर्चयेत् क्रमात् ।। १६
आज्यस्य संस्कृतिं कृत्वा तथा स्रुक् स्रुवयोरपि ।
एकामेकां क्रियां भूयः सङ्कल्प्याभ्यर्च्य होमयेत्[2] ।। १७
गर्भाधानं पुंसवनं सीमन्तं जातनामनी ।
तथाऽन्नप्राशनं चौळं व्रतबन्धं यथाक्रमम्[3] ।। १८
कुर्यादष्टाष्ट हुत्वाऽऽज्यं पूर्णां दद्यात् क्रियान्तरे ।
षण्मन्त्रैर्मूलमन्त्राभ्यां पूर्णां मूलेन वै ददेत्[4] । १९
एवं कृते ततो मन्त्रन्यासं कृत्वा समर्चयेत् ।
पूजामन्त्रैर्घृतं हुत्वा मूलेनावृत्य होमयेत् ।। २०
मूलेन पूर्णां विधिवद्दत्वा कर्म समाप[5]येत् ।
सामान्येनाग्निसंस्कार उक्तोऽयं सर्वकर्मसु ।। २१
दीक्षितैरेव कर्तव्यो नैव मूर्खैरदीक्षितैः ।
योग्यैरेव तु कर्तव्यो यत्नादेवं शुभं भवेत्[6] ।। २२

इति क्रियासारे (एकोनचत्वारिंशः) स्कान्दे तृतीयः पटलः

चतुर्थः पटलः

देव्युवाच–भगवन् देव देवेश भक्तानामभयप्रद ।

---

2 एकां समिधं ।

---

1 वह्निमूले तु ख 3 मिति क्रमात् क ग 4 हुनेत् क
5 मर्च क, मांच ख 6 अर्धत्रयं क, ग पुस्तकयोः नास्ति ।

त्वामहं प्रष्टुमिच्छामि भूयोऽपीदं वद प्रभो ।। १
या पूजा मे त्वया प्रोक्ता गुह्यस्य परमात्मनः ।
सर्वत्र विहिता सा नु सर्वैर्वा सर्वदाऽपि वा ।। २
नैवं विप्रादीनामस्यां दीक्षितानां च वर्णिनाम्[1 2] ।
नैवमस्य द्विजातीनामधिकारो हि वर्णिनाम्[3] ।। ३
अधिकारो नु सर्वत्र विहितो नैव सर्वदा ।
देव्युवाच – विप्रादिभिश्चतुर्वर्णैः कुत्र सा विहिता कदा ।
एतद्विस्तरतो देव वक्तुमर्हसि शङ्कर ।। ४
इति पृष्टो हरस्तस्यै यथैतत् प्रोक्तवांस्तथा ।
वक्ष्ये सर्वं समासेन भूम्यादीनां च लक्षणम् ।। ५
सिद्धक्षेत्रेषु सर्वेषु पर्वतेषु वनेषु च ।
उद्यानेषु च रम्येषु तथैवोपवनेषु च ।। ६
महोदधितटे वाऽथ सरितां सङ्गमेऽपि वा ।
ग्रामे वा नगरे वाऽपि पुरे वा पत्तनेऽपि वा ।। ७
तोयासन्ने समीपे वा केदारस्य प्रयत्नतः[4] ।
श्रीकदम्बवनाकीर्णे पूजयेत् षण्मुखं विभुम् ।। ८
ध्यात्वा सम्पूजनं पश्चात् सर्वेषां तत्र तत्र वै[5 6] ।
परीक्ष्य भूमिं गृह्णीयात् प्रयत्नाच्छुभलक्षणाम् ।। ९
भूतक्रूरबलिं दद्यादष्टदिक्षु वनौकसाम् ।
ये वसन्ति वनस्थाश्च भूत [ताः] क्रूराश्च राक्षसाः ।। १०
कूष्माण्डाश्च पिशाचाश्च वेताळा ब्रह्मराक्षसाः ।
निर्गच्छन्त्वन्यतः शीघ्रमितः क्रूराः सुखं पुनः ।। ११

2 सर्वदेशकालकर्तृ-विषयः प्रश्नः, नैवमिति च्छेदः न सर्वाधिकारिकः । किन्तु दीक्षितानां त्रैवर्णिकानामित्युत्तरं । 6 वृद्धानामर्भकाणां च स्त्रीणां वा रोगिणामपि ध्यातः (ने) नं शक्तितः प्रायेण कृतप्रतिकृतिं च ताम् । संस्थाप्यैवं विधानेन पूजयेत् षण्मुखं विभुम् ।

1–5 अर्धं ख पुस्तके नास्ति । 3 ख पाठः । 4 समीपतः ख

भवनं कुर्महे त्वत्त गुहस्य परमात्मनः ।
वने सति वनच्छेदं कृत्वाऽष्टास्वस्त्रमन्त्रतः ॥ १२
शङ्कून् संस्थापयेत् तेन पूजितान् सर्वतः क्रमात् ।
सूत्रं तेन[1] प्रसार्याथ मुहूर्ते करणान्विते ॥ १३
कर्षयेन्मूलमन्त्रेण नववस्त्राद्यलङ्कृतः ।
ब्राह्मणान् भोजयित्वाऽऽदौ तैः कृत्वा स्वस्तिवाचनम् ॥ १४
बीजानि वापयेत् तत्र मुद्गादीन्यथ मूलतः ।
सिक्त्वा संरक्ष्य फलिते[2] तेन[3] गोभ्यः प्रदाय च ॥ १५
सुमुहूर्ते खनेद्भूमिं यावद्हार्धं तु दृश्यते ।
पांसून्निर्हृत्य गव्येन सेचयेन्मूलमन्त्रतः ॥ १६
गर्ते यद्रिहितं सर्वं कृत्वा मृच्छर्करादिभिः ।
दृढीकृत्य पुनः कुर्यादिष्टकाधानमञ्जसा ॥ १७

इति क्रियासारे (चत्वारिंशः) स्कान्दे चतुर्थः पटलः

पञ्चमः पटलः

अनुकूले दिने कर्तुः शुभलग्ने शुभे तिथौ ।
ग्रहाणामनुकूले तु काले कर्म[4] समारभेत् ॥ १
कृत्वा वास्तुबलिं पूर्वं स्थानस्योत्तरतो गुरुः ।
रेखादि[5]चरुहोमान्तं कृत्वा चाज्याहुतीर्हुनेत् ॥ २
स्कन्दादीनां[6] च दिक्पानां भूतानां महतामपि[7] ।
चन्द्रार्ककालवह्नीनां ग्रहाणां च दिशां तथा ॥ ३
नक्षत्राणां तु नामानि जुहुयात् सर्पिषा क्रमात् ।

1 अस्त्रेण । 3 मूलेन । 4 इष्टकानिधानरूपं ।
5 उल्लेखनादि । 6 द्वादशनामभिः । 7 महाभूतेभ्य इत्येकं पदं ।

2 परितः ख

आदौ तारसमायुक्तमन्ते स्वाहा समन्वितम् ॥ ४
होतव्यं नाम सर्वासां चतुर्थ्यन्तं[1] यथाविधि ।
एवं निवृत्ते होमे तु विन्यसेत् प्रथमेष्टकाः ॥ ५
द्वारदक्षिणशाखायां मूले मूलेन देशिकः ।
अष्टौ वाऽथ चतस्रो वा सम्पाताज्येन संयुताः ॥ ६
पादुकोपरि विन्यस्य समाः[2] पूर्वादितः क्रमात् ।
पूजयेच्छिल्पिनं तत्र गुरुमूर्तिधरानपि ॥ ७
हेमरत्नाक्षतोपेतैर्गन्धोदैः कलशे[3]ऽर्चि-तैः ।
नाभिदेशं[4] [5] प्रपूर्यास्मिन्[6] विन्यसेत् कुसुमाक्षतान् ॥ ८
तारेण च पुनर्जप्त्वा प्रणम्यावर्तमीक्षयेत् ।
शुभाशुभाविहावर्तौ ज्ञातव्यौ दक्षिणेतरौ[7] ॥ ९
ततः प्रच्छादयेन्नाभिं धान्यैर्मृद्भिः प्रयत्नतः ।
स्थपतिं पूजयेत्तत्र गुरुमूर्तिधरानपि ॥ १०
कृत्वैवमिष्टकाधानं ततो गर्भं तु विन्यसेत् ॥ ११

इति क्रियासारे (एकचत्वारिंशः) स्कान्दे पञ्चमः पटलः

षष्ठः पटलः

गर्भपात्रं प्रमाणेन कृत्वा ताम्रमयं दृढम् ।
चतुरश्रं तदर्धोच्चं पादहीनो[8]त्तरच्छदम् ॥ १
प्रक्षाळ्य पञ्चगव्येन पात्रं मूलेन देशिकः ।
अक्षतोपरि विन्यस्य पात्रं दर्भेषु वाग्यतः ॥ २
एतानि मूलमन्त्रेण सौवर्णानि न्यसेद्गुरुः ।

---

2 पादुकासमा वा । 5 इष्टकामध्यगर्तं । 6 जले ।

1 चतुर्थ्या तु ख 3 शा ख 4 शे क ग
7 अर्धं क, ग पुस्तकयोर्नास्ति । 8 तावदेवो ख

दिक्षु मध्ये मयूरं च शक्तिं कुक्कुटवज्रकौ ॥ ३
मातङ्गं पारतं[1] तद्वत् पद्मरागं[2] तु मध्यतः ।
वज्रमौक्तिकवैडूर्यं[3] स्फटिकं[4] शङ्खमेव च ॥ ४
नीलं च पुष्यरागं च प्रवालं पूर्वतः क्रमात् ।
सुवर्णं रजतं ताम्रमायसं त्रपुमेव च ॥ ५
नागं च पित्तलं कांस्यं न्यसेत् पूर्वादितः क्रमात्[5] ।
मनःशिलां हरीताळमञ्जनं माक्षिकं तथा ॥ ६
श्यामं सौराष्ट्रकं चापि राजावर्तं तु गैरिकम् ।
लोहानां बाह्यतो न्यस्येद्धातूनीमानि देशिकः ॥ ७
व्रीहिभिर्यवगोधूमतिलमाषप्रियङ्गुकान् ।
मुद्ग[6]सिद्धार्थकौ वाऽपि विन्यसेत् पूर्वतः क्रमात् ॥ ८
समुद्राद्रिसरित्तीर्थह्रदकेदारदन्तिनाम् ।
खलजा मृत्तिकास्तद्वद्बाह्यतो विन्यसेत् क्रमात् ॥ ९
नील[7]रक्तोत्पलाम्भोजकुमुदानां च कन्दकम् ।
एतानि सर्ववस्तूनां बाह्ये मूलानि विन्यसेत् ॥ १०
सर्वमन्त्रेण संशोध्य कवचेनावगुण्ठ्य च ।
अमृतीकृत्य भावेन[8] पूर्ववद्धोममाचरेत् ॥ ११
इष्टकाधानहोमान्तु[9] वक्ष्ये वैशेशिकम् मनाक् ।
रत्नशब्दो[10] लोहशब्दो धातुशब्दस्तथैव च ॥ १२
बीजानां मृत्तिकाशब्दो मूलानां च यथाक्रमम् ।

1–2 वज्राद्यनन्तरं मध्ये पद्मरागं, सुवर्णाद्यनन्तरं मध्ये पारदमित्यन्वयः । अथवा मध्येऽष्टलोहानि विन्यसेत् । मनःशिलाद्यनन्तरं मध्ये पारदमिति वा । धान्यमृत्तिकासु मध्ये नोक्तं, सर्वद्रव्यं वा मध्यतः । 7 नीलोत्पलं । 8 ध्यानेन । 10 पूर्वोक्तवत् स्कन्दादिनक्षत्रान्तं हुत्वा ओं रत्नेभ्यस्स्वाहा इत्यादि मूलेभ्य इत्यन्तं जुहुयात् ।

3–4 अनयोर्व्यत्ययः ख पुस्तके । 5 अर्धद्वयं क, ग पुस्तकयोर्नास्ति । 6 मृत्सा ख 9 होमे तु क ख ग

प्रणवादिचतुर्थ्यन्तं स्वाहाकारसमन्वितम् ॥ १३
हुत्वा संस्पृश्य सम्पातं वर्मणा तद्विधाय[1] च ।
वहन्नञ्जलिना पात्रं ध्यायेत् कृत्स्नां वसुन्धराम् ॥ १४
पात्रं तु विन्यसेद्भूयो रात्रौ काले सुशोभने ।
एतन्मन्त्रं समुच्चार्य सर्वबीजैः समन्वितम् ॥ १५
सर्वभूतालये भद्रे सागराम्बरभूषिते ।
उत्तुङ्गाद्रिस्तनभरे देवि गर्भं समाश्रय[2] ॥ १६
अवटं पञ्चगव्येन संशोध्यैतत् पुनर्न्यसेत् ।
शिलाभिरिष्टकाभिर्वा भाजनं गोपयेत् पुनः ॥ १७
एवं विन्यस्य गर्भं[3] तु ततः प्रासादमारभेत् ॥ १८

इति क्रियासारे (द्विचत्वारिंशः) स्कान्दे षष्ठः पटलः

सप्तमः पटलः

प्रासादे तु कृते सम्यङ्मुहूर्ते कल्पिते सति ।
स्थापनार्थं पुनस्तत्र वाञ्छितं[4] तन् समाहरेत्[5] ॥ १
सप्तमान्नवमाद्वाऽपि पञ्चमाद्वा शुभेऽहनि ।
मङ्गलाङ्कुरारोपं च कुर्यान्मूलेन देशिकः ॥ २
सेचयेदुपचारेण गन्धहारिद्रवारिणा ।
त्रिकालं पूजयेन्नित्यं रात्रौ तत्र बलिं हरेत् ॥ ३
शक्तिं वा प्रतिमां वाऽस्यां शालायां न्यस्य पूजयेत् ।
रात्रौ शेभ्यो बलिं दद्यात्पात्राणामष्टदिक्षु वै ॥ ४
गन्धादिभिरथाभ्यर्च्य भूतक्रूरान्धसा पृथक् ।

---

1 उत्तरतः । 4 पालिकादि साधनं ।
2 विश ख 3 गर्तं ख 5 रभेत् ख

भूताः[1] प्रेतास्तथा यक्षा नागा ब्रह्मशिवग्रहाः ॥ ५
वैष्णवाश्च ग्रहास्तत्र प्रोक्ता बलिभुजः क्रमात्[2] ।
बीजाङ्कुरार्पणं चैवं[3] कृत्वालङ्कृत्य मन्दिरम् ॥
शय्यां प्रकल्प्य तस्यां तु शाययेत् प्रतिमां शुभाम् ।
पायसेन बलिं तत्र दद्याद्राज्या [लाजा] ज्यसंयुतम् ॥

इति क्रियासारे (त्रिचत्वारिंशः) स्कान्दे सप्तमः प

अष्टमः पटलः

अथाचार्यः शुचिर्भूत्वा संलिखेत् कृष्णमण्डलम् ।
हेमसूच्या दृशोर्मध्ये त्रिभागेन समं यथा ॥
तन्मध्ये तु लिखेज्ज्योतिर्यवमात्रं सुशोभनम् ।
एवं कृत्वा स्वयं शास्त्रैर्भूयो नयनमोक्षणम् ॥
कारयेत् प्रतिमायाश्च शिल्पिभिः शास्त्रकोविदैः ।
साज्येन मधुना तत्र गुरुः सम्पूरयेद्दृशौ[4] ॥
सम्पूर्य मधुसर्पिर्भ्यां दृशोर्मुखपटं त्यजेत्[5] ।
दर्शयेद्गां सवत्सां च तां शय्यां मधुपात्रकम् ॥
अत्रोपयुक्तमन्यच्च सर्वं तच्छिल्पिने ददेत् ।
कृत्वैवं शिल्पिनं ब्रूयादुतैतल्लक्षणान्वितम्[6] ॥
इत्युक्तो गुरुणा दद्याद्गृह्णीयात् तद्यथाविधि[7] ।
ब्राह्मणान् भोजयित्वा तैः कृत्वा स्वस्तिप्रवाचनम् ॥

---

1 भूतग्रहादयः सप्तग्रहाः । 2 क, ग पुस्तकयोरत्र पटलसमाप्तिः कृत
3 चकारात् ध्वजांसंस्थाप्य ।

---

4 अर्धं क, ग पुस्तकयोर्नास्ति । 5 अर्धं ख पुस्तके नास्ति ।
6–7 एतदर्धद्वयं क, ग पुस्तकयोर्नास्ति ।

हेमवस्त्रादिकं दत्वा गृहीतां [1] [2] प्रतिमां शुभाम् ।
सम्प्राप्य पश्चादाचार्यो गृहीत्वा प्रणवेन ताम् ।। ७
क्षाळयेन्मूलमन्त्रेण दर्भैः संघृष्य वारिभिः ।
गोवालैश्च घृताक्तां तां शुभा[3]भवति वै तथा ।। ८
अलंकृत्य च गन्धाद्यैर्वस्त्राभ्यां वेष्ट[4]येदथ ।
फलकायां तु[5] विन्यस्य आश्वत्थायां नयेज्जलम् ।। ९
संशोध्य तत् प्रकल्प्यास्मिन् योगपीठम् विचक्षणः ।
संहृत्य प्रतिमां भूयो ध्यात्वा वह्निमथों तु ताम् । १०
शाययेन्मूलमन्त्रेण पीठे तां प्राक् शिरो जले ।
अस्त्रेण कृत्वा रक्षां तु दीदमग्निंच विन्यसेत् ।। ११
दिग्विदिक्षु भटांस्तत्र जागरूकान् प्रकल्पयेत् ।
एवं जलाधिवासं तु कुर्यादेव निशामुखे[6] ।। १२
प्रासादं तक्षकैर्मुक्तं सूत्रैः संवेष्टयेत त्रिधा ।
मालया च ततो दर्भैक्लप्तया मार्जयेद्गृहम् ।। १३
संक्षाळ्यालिप्य सर्वत्र सर्षपांस्तत्र मन्त्रितान् ।
विकीर्य मार्जयेद्भूयः क्षाळयित्वा विलेपयेत् ।। १४
धान्यैस्तथाऽक्षतैः पुष्पैर्विकीर्यार्यं[7] पुरादिभिः ।
सन्धूप्य पूर्णकुम्भं च न्यस्त्वाऽस्मिन्नस्त्रमर्चयेत् ।। १५
अन्तर्बहिस्तथा गन्धतोयैरपि विलेपयेत् ।
राक्षोघ्नसूक्तमसकृज्जप्त्वा तत्र समाहितः ।। १६
ताळत्रयं दिशाबन्धमग्निप्राकारमेव च ।
सर्वमस्त्रेण कृत्वैवं निर्गच्छेन्मन्दिराद्बहिः ।। १७
राक्षोघ्नहोममाग्नेय्यां कुर्याच्च विधिवत् पुनः ।

---

2 यजमानेनेति शेषः । 3 शुद्धा यथा भवति । 6 सूर्यास्तमयात्पूर्वं ।

---

1 त्वा ग 4 छाद क ग 5 फलकोपरि ख
यः क ग

समिदादि चतुर्द्रव्यं: शक्ति[1]मन्त्रेण वै हुनेत् ॥ १८
शेषं सर्वत्र निर्दिष्टमार्गेणैव समापयेत् ।
सम्पाताच्छेषभस्मादिद्रव्यैः सम्प्रोक्षयेद्गृहम्[2] ॥ १९
हुतमन्त्रैस्ततो वह्निमीशे निक्षिप्य तं पुनः ।
वास्तुहोमं यथोदृष्टमार्गेण कलशान्वितम् ॥ २
प्राक् शन्नवर्गात् षण्मन्त्रैर्वास्तुहोमे घृताहुतीः ।
कुर्याच्च समिदादीनि स्कन्दगायित्रिया[3] हुनेत् ॥ २
शन्नमन्त्रेण वा तानि हुत्वा शेषं समापयेत् ।
कृत्वा वास्तुबलिं होमशेषेण हविषाऽऽप्तः ॥ २
वेहः कुशेषु विकिरेन्नमो रुद्राय मन्त्रतः ।
सम्पाताच्छेषभस्मादृग्यगव्य[4]शान्तिजलैर्गृहम् ॥ २
त्वं विप्र यजुषा प्रोक्ष्य ततः पुण्याहमाचरेत् ।
कृत्वैवं गेहशुद्धिं तु कुर्यान्मण्डपसंस्कृतिम् ॥ २
प्रासादस्याग्रतः कृत्वा मण्डपं लक्षणान्वितम् ।
चतुर्द्वारयुतं रम्यं घनच्छन्नं सुसंवृतम् ॥
मध्ये वेदिकया युक्तं दिक्षु कुण्डानि कारयेत् ।
चतुरश्रं भगाकारं धनुर्वक्रं च वृत्तकम् ॥
त्रिकोणं च तथाऽष्टाश्रं चतुरश्रं तथेतरत्[5] ।
कृत्वैवं मण्डपं सम्यगलंकृत्य यथाविधि ॥
सम्मार्ज्यान्तर्बहिस्तद्वद्गोमयेन विलिप्य तु ।
सूत्रेण दर्भदाम्ना च वेष्टयित्वा समन्ततः ॥
तोरणानि चतुर्दिक्षु स्थापयेच्च स्वनामभिः ।
(प्लाक्षमौदुम्बरं चैव पैप्पलं वटसम्भवम् ॥

---

4 दूर्वाहोमशिष्टं गव्यं विवक्षितम् ।
5 पूर्वाग्नेयदक्षिणपश्चिमोत्तरेशानेषु षट्, शिरःस्थाने चतुरस्रमपरमिं

---

1 शक्र क ख 2 गुहम् ख 3 गायत्र्या स्कान्दया

वरदश्च यशोदश्च पुष्टिदः श्रीदः क्रमात् ।
ध्वजांश्च स्थापयेद्दिक्षु दिक्पालानां च नामभिः ॥ ३०
चिह्नवर्णयुतां[1]स्तेषु पूजयेच्च यथाक्रमम् ।
द्वाररक्षकुम्भांश्च सम्पूर्यैतानि [तांश्च] पूजयेत् ॥ ३१
वीरसेनं महासेनं सुसेनं भद्रसेनकम् ।
चारुषेणं सुषेणं च पूर्णचित्रादिकौ[2] तथा ॥ ३२
सम्मार्ज्य संशोध्यालिप्य सर्षपास्त्रमन्त्रितान् ।
विकीर्य भूयः संमृज्य विलिप्य च विधानतः ॥ ३३
शक्तिरूपं गृहं ध्यात्वा विकिरानभिमन्त्रयेत् ।
मूलेनाष्टोत्तरशतं पञ्चगव्येन योजयेत् ॥ ३४
तेन संप्रोक्ष्य विकिरान् विकिरेत् प्राङ्मुखः स्थितः ।
सम्मृज्य भूयो गन्धोदैः सम्प्रोक्ष्यास्त्रेण सर्वतः ॥ ३५
मध्ये दिक्ष्वथ मूलेन दिगीशान्नामभिस्तथा)[3] ।
गन्धपुष्पैरथाराध्य सन्धूप्यायं[4] पुरादिभिः ॥ ३६
अस्त्रमन्त्रेण कृत्वैवं तेन ताळत्रयादिकम् ।
कृत्वा कुम्भेशमैशान्यां मूलमन्त्रेण पूरयेत् ॥ ३७
धान्यकूर्चस्थितं रत्नहेमगन्धाक्षतान्वितम् ।
तस्मिन् साङ्गं गुहं देवं सम्यगाराध्य भक्तितः ॥ ३८
तत्पार्श्वेऽस्त्रेण सम्पूर्य वर्धनीं तेन पूज[5]येत् ।
अष्टोत्तरशतं जप्त्वा भ्रामयेद्वर्धनीं ततः ॥ ३९
अच्छिन्नधारया सिञ्चेत् कुडयश्लेषं प्रदक्षिणम् ।
ईशानान्तं परिभ्रम्य[6] तत आरभ्य साधकः ॥ ४०
कलशं पृष्ठतो नीत्वा स्थापयेद्विकिरोपरि ।

---

1 ऐरावताविचिह्न शुक्लादि वर्णयुतान् । 2 पूर्णसेनम् चित्रसेनम् ।

3 कंसाङ्कितो भागः ख पुस्तके नास्ति । 4 यः क ग
5 पूर- क ग 6 भ्राम्य ख

उमावाराध्य कुम्भेशं वस्त्रयुग्मेन वेष्टयेत् ॥ ४१
एकेन वर्धनीं पश्चादग्निं सञ्जनयेत् ततः ।
कृत्वैवं मण्डपं भूयो मध्ये कमलमालिखेत् ॥ ४२
चतुरश्रं विधायाग्रे भक्त्वा षोडशधा पुनः ।
चतुर्भिर्मध्यगैः पद्मं वृत्तमालिख्य कल्पयेत् ॥ ४३
पीठा वृत्तं समं भक्त्वा विभजेत्तत्त्रिधा पुनः ।
मध्यमं कर्णिकाक्षेत्रं केसराणां द्वितीयकम् ॥ ४४
तृतीयं तु दळक्षेत्रं यत् क्षेत्रं केसरस्य तु ।
त्रिधा विभज्य तद्भूयः सूत्राण्यास्फाल्य यत्नतः ॥ ४५
उभयोः सूत्रयोर्मध्ये वर्तयेद्दलसन्धयः ।
कल्पनीयाः पुनस्तस्मिन् पद्मे वै षडदलानि तु ॥ ४६
द्वाभ्यां द्वाभ्यां पदाभ्यां तु द्वाराण्याशासु कल्पयेत् ।
कोणं कोण[1]पदेनैव गुणरेखा बहिः स्थिताः ॥ ४७
एवं कृत्वा रजोभिस्तु पूरयेत् क्रमशो गुरुः ।
कर्णिका पीतवर्णा स्यात् केसराण्यपि तेन च[2] ॥ ४८
दळानि पीतवर्णेन च्छादयेच्च सि[3]तेन वा ।
दळसन्धिस्तथा द्वाराण्याच्छाद्य हरितेन तु ॥ ४९
कोणे कोणे[4] चतुष्कं तु शुक्लेनैव प्रपूरयेत् ।
वृत्तस्य बाह्ये य[5]त्कोणं चतुरश्रस्य चान्ततः ॥ ५०
कृष्णेन पूरयेद्बाह्ये गुणवर्णैर्गुणात्मकाः ।
एवं मण्डलमालिख्य तण्डुलैः पीठिकामपि ॥ ५१
कृत्वा तस्यां विधानेन कलशान् पूरयेद्गुरुः ।
आराध्य पीठमध्ये तु तस्योर्ध्वे पूजयेदिमान्[6] ॥ ५२
ब्रह्माणं भद्रकाळीं च विघ्नेशं विष्णुमेव च ।

---

6 षड्दलेषु ।

---

1 णं क 2 रक्तत: क ग 3 दसि ग 4 ततः कोष्ठ ख 5 ह्यतः ख

ईश्वरं चापि तद्भूतं[1] प्रागादिषु दलेषु वै ॥ ५३
सम्पूज्य कर्णिकायां तु सादयेत् कलशं शुभम् ।
पूरयेन्मूलमन्त्रेण गन्धपुष्पाक्षतान्वितम् ॥ ५४
वस्त्रपल्लवसञ्छन्ने क्षिपेद्धेममयान्यथ ।
पद्मं गजं मयूरं च शक्तिं वज्रं च पञ्चकम् ॥ ५५
कलशे भक्तितो देवं पूजयेद्विधिपूर्वकम् ।
मूर्तिशक्त्य[2]ङ्गसंयुक्तं लोकेशैश्च समन्वितम् ॥ ५६
आदित्या[3]नश्विनौ चैव पितॄन् गणपतिं तथा ।
मातरोऽप्सरसस्तद्वद्गुहान् रुद्रान् समर्चयेत् ॥ ५७
जयन्तादिष्वदित्यन्तं वज्रादीनि बहिः क्रमात् ।
सम्पूज्य कलशे देवं सम्प्रार्थ्यैतान् क्षमा[4]पयेत् ॥ ५८
पूर्वभागे तु कुम्भस्य[5] शयनं परिकल्पयेत् ।
आलिख्य स्वस्तिकं तत्र धान्यानि प्रविकीर्य च ॥ ५९
तण्डुलान्नि[6]क्षिपेत्तैश्च[7] कृत्वा स्थण्डिलमायतम् ।
तन्मध्ये तु लिखेत् पद्मम् षड्दलं तु तिलैः क्रमात् ॥ ६०
तस्मिन् प्रसार्य शयनं मूलेनातिमनोहरम् ।
तमाराध्य चतुर्दिक्षु कलशान् गन्धवारिभिः ॥ ६१
पूज[8]येन्मूलमन्त्रेण गन्धपुष्पैरथार्चयेत् ।
दीपैरङ्कुरपात्रैश्च पुष्पैरन्यैश्च शोभनैः ॥ ६२
शय्यायां परितो दिक्षु भूषयेच्च प्रयत्नतः ।
कृत्वैतत् सकलं चैवं कलशान्[9] पूरयेदथ ॥ ६३
क्षालितानस्त्रमन्त्रेण वर्मणा तन्तुवेष्टितान् ।
धूपितान् मूलमन्त्रेण न्यखिलान् सादयेत् क्रमात् ॥ ६४

---

1 ईश्वरभूतं अथवा शास्तारं । 2 सनत्कुमाराबि, देवसेनाबि ।
3 इन्द्रेशानयोर्मध्यमारभ्य । 7 तण्डुलैः । 9 बिम्बशुद्धयर्थं ।

---

4 समा क ग 5 कुण्डस्य क ग 6 लानि ख 8 पूर- ख

उत्तानीकृत्य सम्प्रोक्ष्य कूर्चान् विन्यस्य पूरयेत् ।
कौशं गव्यं कषायं च दौर्वं च [दूर्वाजं] सार्षपं जलम् ॥ ६५
मृद्रत्नशुद्धगन्धोदं[1] मध्यादिषु विदिक्षु च ।
सम्पूर्य मूलमन्त्रेण अ[2]स्त्रैरा [अस्त्रेणा] च्छाद्य पल्लवैः ॥ ६६
विन्यस्य चक्रिकास्तेन[3] वस्त्रैराच्छाद्य पूजयेत् ।
हुत्वाऽऽज्यं मूलमन्त्रेण शतमष्टोत्तरं क्रमात् ॥ ६७
सम्पाताज्येन संस्पृश्य सम्पूज्याथाभिमन्त्रयेत् ।
स्नानमण्डपमध्ये तु लिखित्वा स्वस्तिकं ततः ॥ ६८
स्नानपीठं निधायात्र सर्वं संसाद्य वाञ्छितम् ।
प्रतिमामानयेत् तोयान्मन्त्रान् संहृत्य साधकः ॥ ६९
उद्धृत्य तोयाद्वासांसि त्यक्त्वा संघृष्य सर्वतः ।
प्रक्षाळ्य तोयैर्गन्धाद्यैरलङ्कृत्याम्बरेण च ॥ ७०
शाकुनेन नयेद्बिम्बं भेरीपटहनिस्वनैः ।
प्रासादाभिमुखं पीठे विन्यसेन्मूलविद्यया ॥ ७१
कलशे पूरयित्वाऽत्र शिष्टद्रव्यै[4]र्यथाक्रमम् ।
सङ्कृष्य क्षाळयित्वाऽद्भिस्तत्तन्मन्त्रै[5]र्गुरुः[6] स्वयम् ॥ ७२
पाद्यार्घ्याचमनं दत्वा स्नापयेत् कलशैरथ ।
पूर[7]णोक्तक्रमेणैव मन्त्रैरेभिः क्रमेण तु ॥ ७३
मूलास्त्रकवचैर्मूलमन्त्रेण हृदयेन च[8] ।
अग्निमीळे इषेत्वेति शन्नो देव्युपचारतः ॥ ७४
स्कन्दगायत्रिया भूयः स्नापयेद्बहुभिर्जलैः ।
व[9]स्त्राभ्यां गन्धपुष्पाद्यैः पूजयेन्मूलमन्त्रतः ॥ ७५

---

1 उडकपदं प्रत्येकमन्वेति । 3 अस्त्रेण । 4 पूर्वं कलशपूरणशिष्टैः कुशादिभिः । 5 पूरणमन्त्रैः । 6 अत्र नेत्रोन्मीलनं कार्यम् ।

2 व- क ग 7 पूर्वे क ग 8 अस्त्रेण वर्मणाऽस्त्रेण हृदयेन च मूलतः क ग 9 अ- क म

क्षिप्त्वा दूर्वाक्षतान् मूर्ध्नि पादयोः प्रणवेन च ।
नीराज्य मूर्ति-पैः सार्धं कृत्वा पुण्याहमञ्जसा ॥ ७६
उत्तिष्ठेति समुत्थाप्य मण्डलं[1] तु प्रदक्षिणम् ।
नीत्वा प्रवेशयेद्देवमासत्येनेति मन्त्रतः ॥ ७७
भद्रपीठे न्यसेद्विद्वान् प्रासादाभिमुखं यथा ।
दत्वार्घ्यं च तथोत्थाप्य शाययेन्मूलविद्यया ॥ ७८
प्रासादे प्राङ्मुखे देवं शाययेत्तदुदक्शिरः ।
पश्चिमाभिमुखे तद्वच्छाययेद्याम्यशीर्षकम् ॥ ७९
निद्राकुम्भं शिरोदेशे पूरयेद्गन्धवारिभिः ।
आपो देवीरिति प्रोक्त्वा पूजयेद्गन्धपुष्पकैः ॥ ८०
अथाचार्यः शुचिर्भूत्वा प्रक्षाळ्याचम्य वाग्यतः ।
प्राङ्मुखः स्वस्तिकं बध्वा कृतरक्षस्तु संविशेत् ॥ ८१
ततस्तत्त्वानि संहृत्य धारणा धारयेत्ततः ।
उत्पाद्य सृष्टिमार्गेण तत्त्वान्यात्मनि विन्यसेत् ॥ ८२
मूलाङ्गैः सकलीकृत्य गुहोऽहमिति भावयेत् ॥ ८३

इति क्रियासारे (चतुश्चत्वारिंशः) स्कान्दे अष्टमः पटलः

नवमः पटलः

अथात्मानमलङ्कृत्य भावनासहितो गुरुः ।
अर्चागतं ततो जीवं तारेणात्मनि योजयेत् ॥ १
अर्चागतानि तत्त्वानि संहृत्योत्पाद्य विन्यसेत् ।
मन्त्रन्यासं ततः कृत्वा ध्यात्वा मुद्राः प्रदर्श्य च ॥ २

1 पं क ख ग

पूजयेद्विधिवद्देवं पूर्वोद्दिष्टेन वर्त्मना ।
हुत्वा भूतबलिं दत्त्वा कुर्युरध्ययनं द्विजाः ॥ ३
अथर्वं च यजुस्तस्मिन्[1] ऋक्सामेन्द्रादितः[2] क्रमात् ।
कुमाराग्निं समाधाय कृत्वा चाग्निमुखं पुनः ॥ ४
षट्सु वह्निषु षण्मूर्तीर्ध्यात्वा पूजाविधौ यथा ।
स्कन्दगायत्रिया पक्वं हुत्वा चाज्याहुतीः पुनः ॥ ५
स्वस्व[3]दिक्षु स्वमन्त्रैश्च षट्कृत्वः सर्व एव[4] ते ।
सकृत् सकृद्वक्ष्यमाणैर्मन्त्रैर्मूलेन तत्परः ॥ ६
उपचारेण वै हुत्वा द्विषट्कैरपि[5] नामभिः ।
समिदाज्यचरून् लाजान् यवान् सिद्धार्थकान् पुनः ॥ ७
पलाशखदिराश्वत्थप्लक्षन्यग्रोध[6]सम्भवाः ।
औदुम्बराश्च समिधः प्रागादिष्विह कीर्तिताः ॥ ८
अष्टोत्तरशतं हुत्वा पृथक् पूर्णाहुतिं तथा ।
कादम्बैरथ बिल्वैर्वा गुरुर्मूलेन वै[7] हुनेत् ॥ ९
हुत्वा हुत्वा स्रुशेद्विल्वम् सम्पाताज्येन संयुतम् ।
पादजानू च गुह्यम् च नाभिं वक्षः शिरः शिखाम् ॥ १०
तत्रा[8]धिवास्य रत्नानि बहुवीरेतरेषु वा ।
कुमारान् भोजयेत् पश्चाद्द्वादशार्धमथापि वा ॥ ११
गेहशुद्धिः पुरा प्रोक्ता राक्षोघ्नादिसमन्विता ।
बहुवीरे तु देवस्य कृत्वा नयनमोक्षणम् ॥ १२
विसर्जयित्वा स्थपतीन् गेहशुद्धिः स्मृताऽधुना ।
सम्मार्ज्यालिप्य[9] सर्वत्र गन्धोदैः प्रोक्ष्य सर्वतः ॥ १३

---

2 पूर्वादितः अथर्वाणि वेदान् । 7 स्वकुण्डे । 8 शय्यायां ।
9 एकबेरे गेहशुद्धिमाह ।

---

1 तस्मात् क ग 3 स्वासु ख 4 मेव क 5 रथ क
6 क्षाश्च वट- ख

गव्येन पूर्वं सिद्धार्थैरक्षतैः सर्वतः किरेत् ।
दिक्ष्वष्टासु[1] विमानस्य होमान् पूर्ववदाचरेत् ॥ १४
नैर्ऋत्यामथ वायव्यामस्त्रमन्त्रेण होमयेत् ।
बिल्वकाश्मर्यसम्भूताः समिधोन्यत् समं[2]त्विह ॥ १५
सर्वदा भोजयेद्विप्रान् नृत्तगीतादि कारयेत्[3] ।
कृत्वैवं तु बलिं दद्यात् प्रासादस्य समन्ततः ॥ १६
पूर्वेद्युरधिवास्यैवं परेद्युः स्थापयेद्गुहम्[4] ॥ १७

इति क्रियासारे (पञ्चचत्वारिंशः) स्कान्दे नवमः पटलः

दशमः पटलः

प्रातः स्नात्वा विधानेन नववस्त्राद्यलङ्कृतः ।
न्यस्तमन्त्रतनुर्भूत्वा गुहोऽहमिति भावयेत् ॥ १
कुर्यात् कर्म यथान्यायमलङ्कृत्य च मन्दिरम् ।
तोरणैश्च ध्वजैः कुम्भैरङ्कुरैश्चन्दनादिभिः ॥ २
द्रव्याकृत्यनुरूपेण स्थानं ज्ञात्वा प्रयत्नतः ।
स्थापनं यत्र निर्णीतं तत्र पादशिलां[5] न्यसेत् ॥ ३
सा नपुंसकलिङ्गा तु नाळद्विगुणविस्तरा ।
चतुरश्रसमागर्तयुता मध्ये दिशास्वथ ॥ ४
पञ्चगव्यकषायाद्यैः शोधयित्वा यथाविधि ।
पादुकोपरि गर्तं तां[6] विन्यसेत् सुसमं यथा ॥ ५
उपरिष्टाद्भवेत्पीठं लक्षणेन समन्वितम् ।
पादाधारस्य शैलस्य पद्मनाळयुतस्य च ॥ ६

1 प्रासादस्य । 2 पूर्वोक्ताधिवासेन समं । 5 नपुंसकशिलां ।
3 अर्धत्रयं ख पुस्तके नास्ति । 4 बृगुरुः क 6 गर्तान्तां क ख

पीठगर्ते तु योगः स्याद्भूतिकामस्य[1] सर्वदा ।
अधस्तान्मुक्तिकामस्य योगः कार्यः क्षितेस्तथा ॥ ७
एकवीरे[2] भवेदेवं बहुपीठे[3] शृणु क्रमात् ।
बहुपीठस्य[4] यत् स्थानं तत्र पादशिलां न्यसेत् ॥ ८
उपरिष्टाद्भवेत् पीठं सुषिरद्वयसंयुतम् ।
शूलस्य निर्गमार्थं तु आसीने चैकखा[5]तकम् ॥ ९
वाहनस्याग्रपादे तु सुषिरद्वयमिष्यते ।
रत्नन्यासं च तद्गर्ते बहुपीठस्य[6] कल्पितम् ॥ १०
शूलाधिवासकाले तु रत्नान्यधिवसेद्गुरुः ।
अधिवासे कृते होमे आचार्येण कृतस्तु यः ॥ ११
स एव शूलकाले[7] तु विशेषं शृणु किन्त्विह ।
रत्नान्यखिलमाचार्यः कुण्डपार्श्वे निधाय च ॥ १२
प्राग्वन्मूलेन वै हुत्वा[8] मन्त्रैरेभिर्हुनेद्वृतम् ।
ब्रह्मणे चैव सोमाय वसुभ्यश्चेति वै ततः ॥ १३
रुद्रेभ्यश्चैव रत्नेभ्यो बीजेभ्य इति देशिकः ।
लोहेभ्यश्चैव धातुभ्य ओषधीभ्यस्तथैव च ॥ १४
एवमेभिर्हुनेन्मन्त्रैः स्वाहाकारसमन्वितैः ।
एवं कृत्वा तु मूलेन स्पृशेद्रत्नानि देशिकः ॥ १५
अधिवास्यैव रत्नानि विन्यसेदितरत्र[9] च ।
रत्नानि विन्यसेत् प्राप्ते मुहूर्ते मङ्गलान्विते ॥ १६
प्रागादि मध्यपर्यन्तं मूलमन्त्रेण देशिकः ।
वज्रवैडूर्यचन्द्रनीलशङ्खस्फटिकपुष्यकान् ॥ १७

---

1 भूतिकामस्य नपुंसकशिलापीठयोर्योगः, मुक्तिकामस्य तु नाळनपुंसकशिलयोर्योगः, नात्र पीठनपुंसकशिलयोर्योग अपेक्षितः । 7 शूलाधिवासकाले । 8 मूलेन षट्संख्यमाज्यं हुत्वा । 9 एकवेरे ।

2 पीठे ख 3 वेरे क 4 वीरे च क 5 पा घ 6 वीरस्य क

मुक्ताफलं प्रवालञ्च पद्मरागं च मध्यतः ।
मनःशिलां हरीताळमञ्जनं श्याममेव च ॥ १८
सौराष्ट्रं[1] रोचनं[2] चैव गैरिकं पारिकं[3] रसम् ।
सुवर्णं रजतं ताम्रं पित्तळम् त्रपु सीसकम् ॥ १९
अयश्चैव तथा कांस्यं विन्यसेत् पूर्वतः क्रमात् ।
पद्मम् गजं मयूरं च शक्तिं वज्रञ्च कुक्कुटम् ॥ २०
सौवर्णमेतत्सर्वञ्च मध्यगर्ते तु[4] विन्यसेत् ।
यवगोधूममाषाश्च तिलमुद्गास्तथैव च ॥ २१
प्रियङ्गवश्च सिद्धार्था व्रीहयश्च क्रमेण तु ।
पूर्वादीशानपर्यन्तं सर्वद्रव्याणि मध्यतः ॥ २२
पुण्याहं मूर्ति-पैः सार्धं कृत्वा रत्नानि विन्यसेत् ।
पीठं सम्पूज्य गन्धाद्यैः पटेनाच्छादयेदथ ॥ २३
ततो देवं समासाद्य मूर्ति-पैस्सह साधकः ।
देवमुत्थाप्य मतिमान् भद्रपीठें समाहितः ॥ २४
अभिषिञ्चेत् ततः कुम्भैश्चतुर्भिः सकृदेव[5] तु ।
मूलमन्त्रेण तन्त्रज्ञैश्चतुर्भिर्मूर्ति-पैरपि ॥ २५
आच्छाद्य वस्त्रयुग्मेन युवं वस्त्राणि मन्त्रतः[6] ।
गन्धपुष्पैरलङ्कृत्य मूलमन्त्रेण मन्त्रवित् ॥ २६
उत्तिष्ठेति समुत्थाप्य यानमारोप्य तां नयेत्[7] ।
वाद्यैः समस्तैः संयुक्तं ध्वजच्छत्रसमाकुलम् ॥ २७
गेहं प्रदक्षिणीकृत्य द्वारि यानं विसर्जयेत् ।
ततः प्रवेशयेद्देवं निमित्तान्युपलक्ष्य च ॥ २८

---

5 युगपदेव । 7 नीराजनं वर्धनीं च आचार्यो देव एव च । ततश्च जीवकलशं कुम्भेशं तदनन्तरम् । ततः कुमारकलशं ततो निद्रां (कुम्भं प्रचक्षते इति क्रमः । प्रथमप्रतिष्ठायां जीवकलशाभावः ।

---

1 ष्ट्रीं क 2 नां क 3 रतं क 4 थ क 6 मन्त्रितं क ख

वाग्यतो यजमानस्तु पुत्रदारसमन्वितः ।
अनुगच्छे[1]च्छुचिः स्नातो नववस्त्राद्यलंकृतः ॥ २९
उपोषितो जितक्रोधो देवं हृदि विचिन्तयेत् ।
आचार्यः पुरतो गच्छेत् सकलीकृतविग्रहः ॥ ३०
द्वारदेशे प्रदायार्घ्यं ततो देवं प्रवेशयेत्[2] ।
उत्तिष्ठेन तु विन्यस्य भूत्वा मन्त्रतनुः स्वयम् ॥ ३१
तेजोमयं[3] वपुर्ध्यात्वा ध्रुवाद्यौरिति मन्त्रवित् ।
उत्थाप्य स्थापयेदर्चां पीठगर्ते समाहितः ॥ ३२
उल्लम्बितेन सूत्रेण स्थितिं[4] देवस्य कल्पयेत् ।
पीठस्य कर्णयोर्मात्वा लम्बसूत्रं समं यथा ॥ ३३
तथाऽचलं तु संस्थाप्य मन्त्रन्यासं समाचरेत् ।
मूलमन्त्रेण मन्त्रज्ञो ध्यात्वा देवं सनातनम् ॥ ३४
मूर्ध्न्यानने च हृदये गुह्ये जानुद्वये तथा ।
पादद्वये च मन्त्रज्ञो न्यसेत् तत्त्वानि तत्त्ववित् ॥ ३५
आवाहयेत् ततो देवं ध्यात्वा हृदि यथोदितः ।
पुनः[5] कुम्भे तु विन्यस्य गन्धपुष्पोदकान्वितम् ॥ ३६
तेनाभिषेचयेद्बिम्बं ध्यायेन्मन्त्रमयं गुहम् ।
ध्यायेत् कुमुम्भसङ्काशं द्विभुजं हेमपङ्कजे[6] ॥ ३६
चम्पकस्रक्विनद्धांसमीषद्धालाननं विभुम् ।
चूडारत्नविहीनेन मुकुटेन विराजितम् ॥ ३७
पत्रसम्भूतचारुभ्यां कुण्डलाभ्यां विभूषितम्[7] ।
किङ्किणीजालपादाभ्यां शोभितं[8] मुण्डमालया ॥ ३८

---

1 सर्वपृष्ठतः । 2 स्वयं पूर्वं प्रविश्य । 3 बिम्बं । 5 कुमार-कलश एव सावकाशे । 6 स्थितमिति शेषः । 8 प्रकारान्तरेण ध्यानमाह ।

---

4 स्थितं क 7 विशेषतः क

उभयांसोपवीतेन चतुर्भिः सह बाहुभिः ।
पीताम्बरधरं रक्तं षोडषे वयसि स्थितम् ॥ ३९
सर्वाभरणसंयुक्तं सर्वावयवसुन्दरम् ।
ध्यात्वैवमुपचारेण स्तुतिमन्त्रपुरस्सरम् ॥ ४०
ओं शीघ्रमायातु भद्रं ते सुकुमार सुपद्मज ।
मयूररथयुक्तश्च वारणानुचरो गुह[1] ॥ ४१
अन्नाद्यप्रियशीलस्तु शक्तितोमरवज्रधृक् ।
कार्ति-केय सुरश्रेष्ठ सुरेन्द्रासुरमर्दन ॥ ४२
आवाहयामीत्यावाह्य विधिवत् षण्मुखम् गुहम् ।
पूर्ववन्मूलमन्त्राणान् न्यसेन्मूर्धादिषु क्रमात् ॥ ४३
आसनं पीठमुद्दिश्य स्वागतं चापि वै ददेत् ।
सान्निध्यं कव [कल्प] यित्वा ? तु दत्वाऽर्घ्यं विधिपूर्वकम् ॥ ४४
ध्यात्वा प्रागुक्तमार्गेण स्कन्दं शरवणोद्भवम् ।
सङ्कल्प्य मूर्ति-भेदं तु परिवारमशेषतः ॥ ४५
पुण्याहं वाचयित्वा तु पूजयेद्विधिवत् प्रभुम् ।
एवं तु स्थापनं कुर्यादेकपी ठे[2] विचक्षणः ॥ ४६
बहुपी ठे[3] विशेषं तु प्रवक्ष्येऽहं समासतः ।
अर्चायां याः क्रियाः प्रोक्ताः कर्मार्चायां प्रयोजयेत् ॥ ४७
मन्त्रन्यासं विना सर्वं मूलार्चायां प्रयोजयेत् ।
अर्चनापीठिकायां तु कर्मार्चां तां निवेश्य च ॥ ४८
आवाहनाभिषेकं तु कर्मार्चायां विधाय च ।
पुनरावाहयेन्मूर्ति[4] मूलार्चायां विचक्षणः ॥ ४९
स्थापयेत् परिवारांश्च देव्यादीन् क्रमयोगतः ।
अन्तर्बहिश्च सर्वत्र नामभिः क्रमशः स्वकैः ॥ ५०
प्रणवादि नमोन्तैश्च स्थापयित्वा समर्चयेत् ।

---

1 ह: क 2–3 वीरे क 4 मूर्तौ ख

प्राच्य संस्कृत संस्थान जयपुर पुस्तकालय क्रमांक 15299

बलिं दत्वा ततो दिक्षु जयनादसमन्वितम् ॥ ५१
शू[1]रसेनो[2]ग्रसेनस्तु शिखिसेनस्तृतीयकः ।
जयत्सेनो महासेनश्चण्डसेनस्तथैव च ॥ ५२
क्रुद्धसेनः क्रूरसेनो जयत्से[3]नोष्टमात्परः ।
प्रागादिषु[4] क्रमेणैते[5] कल्पनीयाः क्रमेण तु ॥ ५३
एवं दत्वा बलिं भक्त्या प्रार्थयेन्मनुनाऽमुना ।
यावदत्र जगन्नाथो बिम्बमाश्रित्य तिष्ठति ॥ ५४
तावदत्रैव रक्षार्थं यूयं तिष्ठथ [त][6] सर्वदा ।
इति प्रार्थ्य प्रविश्यान्तर्जप्त्वा स्तुत्वा समाहितः ॥ ५५
नमस्कृत्य गुहं भक्त्या ब्राह्मणान् भोजयेदथ ।
भोजयेत्सर्ववर्णांस्तु दद्यात् वस्त्रादिकं बहु ॥ ५६
गुरुं सम्पूजयेत् पश्चान्मूर्तिपांश्च सदस्यकान् ।
इति संक्षेपतः प्रोक्ता प्रतिष्ठा षण्मुखस्य तु ॥ ५७
दिशाहोमं तु कुर्वीत विधिदृष्टेन वर्त्मना ।
चतुर्थदिवसे स्नानमुत्सवं च यथाविधि ॥ ५८

इति क्रियासारे (षट्चत्वारिंशः) स्कान्दे दशमः पटलः

एकादशः पटलः

अथ स्नानं प्रवक्ष्यामि षण्मुखस्य समासतः ।
स्थापितस्य चतुर्थेऽह्नि कर्तव्यं देशिकोत्तमैः ॥ १
उपसर्गे[7]ऽन्त्यसर्गे[8] च प्रधानपुरुषक्षये ।
प्रायश्चित्तेषु बन्धे[9] च निर्गमे[10] च प्रवेशने ॥ २

2 सन्धिरार्षः । 4 बलिपीठस्य । 5 अधः जयत्सेनः उपरि स्कन्दसेनः । 6 तिष्ठतेति युक्तम् । 7 दुर्निमित्ते । 8 अन्त्यसंसर्गे । 9 अष्टबन्धे । 10 बालालयस्येति शेषः ।

1 क्रू ख 3 से- ख

एवमादिषु कर्तव्यं स्नपनं देशिकोत्तमैः ।
संस्कृत्य यागभूमिं तु मार्जनालेपनादिभिः ॥ ३
कृत्वाऽग्निसंस्कृतिं पूर्वं निर्दिष्टेनैव वर्त्मना ।
रजोभिर्मण्डलं[1] भूयः पदानि परिकल्पयेत् ॥ ४
अलङ्कृत्य यथा शोभं मण्डलं[2] प्राग्वदेव तु ।
व्रीहिभिः पीठिकास्तेषु पदेषु परिकल्पयेत् ॥ ५
दर्भान् विन्यस्य मूलेन सादयेत् कलशानथ ।
क्षाळयेदस्त्रमन्त्रेण वर्मणा तन्तुवेष्टितान् ॥ ६
धूपितान् मूलमन्त्रेण न्यञ्चिलान् साद[3]येत् क्रमात् ।
दर्भानुपरि विन्यस्य गन्धोदैः प्रोक्ष्य चाक्षतैः ॥ ७
विकीर्य मूलमन्त्रेण कुर्यात् सर्वं विचक्षणः ।
उत्तानीकृत्य चोद्धृत्य न्यस्य सम्प्रोक्ष्य विन्यसेत् ॥ ८
कूर्चं मूलेन सम्पूर्य[4] पल्लवैरस्त्रमन्त्रतः ।
सञ्छाद्य चक्रिकां न्यस्य तण्डुलाढ्यां[5] तथोपरि ॥ ९
वस्त्रैराच्छादयेत् पश्चादस्त्रेणैतत्समस्तकम् ।
ततः सम्पूजयेत् तांस्तु मूलमन्त्रेण मन्त्रवित् ॥ १०
न किञ्चिन्मन्त्ररहितं कर्तव्यं कर्म जातुचित् ।
अथादिष्टे[6] तु सर्वत्र मूलेनैव[7] प्रचोदितः ॥ ११
मूलमन्त्रेण वा सर्वं कुर्यात् तत्र विचक्षणः ।
दिक्षु त्रिकं विदिक्ष्वेकं नवान्तः पञ्चविंशतौ ॥ १२
पञ्चगव्यं मधु क्षीरं घृतं दधि गुळं[8] तथा ।
ऐक्षवं च रसं तैलं नाळिकेरोदकं[9] तथा ॥ १३
पाद्यमर्घ्यं तथाऽऽचामं कषायं रत्नवारि च ।

---

4 द्रव्यैः । 9 वैवे– मध्ये, दिक्षु, विदिक्षु च ।

---

1 -ले क 2 -पं क 3 -ध ख 5 लाद्यैस् ख
6 अनादिष्टे घ 7 मूल एषः ख 8 डं क

फलं गन्धं तथा पुष्पं[1] मध्यादिषु विदिक्षु च ॥ १४
शेषान् शुद्धोदकेनैव पूरयेत् कलशानथ ।
अधिवासं[2] तु विधिवद्धुत्वा सम्पातसर्षिषा ॥ १५
संस्पृश्य पूजयित्वा च कलशानभिमन्त्रयेत् ।
न्यासक्रमेण सर्वांस्तु कलशान् स्ना [स्था] पयेदथ ॥ १६
मूलेन द्रव्यकुम्भांस्तु स्कन्दगायित्रियाऽथ वा ।
स्ना [स्था] पयेद्धृदयेनैव कलशान् शुद्धवारिभिः[3] ॥ १७
न्यग्रोधौदुम्बराश्वत्थप्लक्षचूतपलाशजैः ।
शिरीषमधुकोद्भूतैः कषायं[4] त्वग्रसैर्युतम् ॥ १८
पद्मरागं तथा नीलं मौक्तिकं चेन्दुकान्तकम् ।
कुरुविन्दं च काचं[5] च [वैडूर्यं] विद्रुमं वज्रमेव च ॥ १९
रत्नोदं मातुलङ्गाम्रबिल्वजम्बूफलानि च ।
पनसं दाडिमं भव्यं कदळी फलवारि च ॥ २०
कुङ्कुमागरुकर्पूरकुष्ठवानरवारिभिः ।
मुरं मलयजं चापि गन्धोदं परिकीर्तितम् ॥ २१
उत्पलं चैव कल्हारं पद्मं कुमुदमेव च ।
सौगन्धिकं कशेरुं च तथा चैवोत्पलद्वयम् ॥ २२
एषामलाभतः प्रोक्तं करवीरं तु लोहितम् ।
पुष्पोदकं तु शेषाणि द्रव्याणि विदितानि तु ॥ २३
षड्दिक्षु मध्ये नवकं कोणेषु च[6] चतुष्कृतम्[7] ।
पञ्चाशत्येकहीने तु क्षेत्रे नवपुटे नयेत् ॥ २४
पूर्ववत् पूरणं प्रोक्तं पूर्ववत् स्नपनं भवेत् ।
अधमं[8] स्नपनं प्रोक्तमुच्यते मध्यमं पुनः ॥ २५

1 बाह्ये–दिक्षु, विदिक्षु च । 2 द्रव्यमिति शेषः । 3 पूर्णान् ।
4 पाद्यादीनि शैवानि ग्राह्याणीति मत्वा कषायाद्याह ।
6 चतुष्कं । 8 अधमविधं ।
5 कालं ख, काचं घ 7 कृतिं क

एकादशपुटे क्षेत्रे नवानां नवकं नयेत् ।
गोमूत्रं गोमयं क्षीरं दधि सर्पिः पृथक्पृथक् ॥ २६
पूर्वादारभ्य मध्यान्तं पूरयित्वा विदिक्ष्वपि ।
गोरोचनाम्बु कौशं[1] च रत्नोदं गन्धवारि च ॥ २७
क्षौद्रं गुळं कषायं च बीजं मृत्तिलमेव च ।
पुष्पं सुवर्णमित्यष्टौ कलशान्[2] दिग्विदिक्षु च ॥ २८
सम्पूज्य पूर्ववच्छेषान् शुद्धाम्भो दिग्विदिक्षु च[3] ।
यवैस्तिलैश्च गोधूमैः सर्षपैः शालिभिस्तथा ॥ २९
मुद्गैर्माषैश्च नीवारैर्बीजतोयं प्रकीर्तितम् ।
नदीवेदिसमुद्रेभ्यो वल्मीकक्षेत्रपर्वतात् ॥ ३०
वृषकुञ्जरयोः शृङ्गादाहृत्य मृत्तिकाः क्रमात् ।
गन्धस्रक्पल्लवैर्वस्त्रैः पूजयित्वाक्षतैरपि ॥ ३१
प्राग्वत् संस्नापयेद्देवमुक्तं वै मध्यमोत्तमम् ।
द्वे द्वे[4] निहीनमष्टासु दिक्षु वै मध्यमाधमम् ॥ ३२
त्रयोदशपुटे क्षेत्रे मध्यमे पञ्चविंशतिः ।
दिक्षु पञ्चदशोक्तानि षट्पदानि विदिक्ष्वपि ॥ ३३
पूरयेद्ब्रह्मकुम्भे तु सर्वरत्नोदकं बुधः ।
पञ्चगव्यं ततः क्षीरं दधिसर्पिर्मधूनि च ॥ ३४
तद्बाह्ये रजनीतोयं सुगन्धामलकोदकम् ।
गुळमिक्षुरसं तैलं दिग्विदिक्षु प्रपूरयेत् ॥ ३५
फलतोयं कषायं च कौशं काश्मोदकं तथा ।
उशीरतोयं दूर्वोदमाग्नेयादिषु पूरयेत् ॥ ३६
पूरयेद्गन्धयुगळमारभ्यैशानशक्रयोः ।
काश्मीरं चन्दनं चैव युगळं वानरागरू[5] ॥ ३७

---

2 मानुषे । 4 द्वाभ्यां, पञ्चषष्टिकलशे ।

1 कोशं ख 3 अर्धत्रयं ख पुस्तके लुप्तम् । 5 गरुम् ख

मुरमांसीयुतं पश्चाद्वार्यम्बु ! घनवारि च ।
प्लवचोराम्बुनी पश्चात् कर्पूरत्रुटिवारुणी ॥ ३८
रुजाजातीफलं प्रोक्तं लवङ्गस्वक्फले[1] तथा ।
सम्पूर्य गन्धयुगळम् बहिरेतानि[2] पूरयेत् ॥ ३९
न्यग्रोधौदुम्बराश्वत्थप्लक्षबिल्वपलाशजैः[3] ।
शम्यापामार्गसम्भूतैरङ्कुरैर्दिग्विदिक्षु च ॥ ४०
शेषांच्छुद्धोदकैः सर्वानापूर्याच्छाद्य पल्लवैः ।
वस्त्रैरस्त्रेण संवेष्ट्य सम्पूज्य जुहुयात् ततः ॥ ४१
अपरं चोत्तमं वक्ष्ये समासात् तत्र साम्प्रतम् ।
कुम्भैश्चतुर्भिः प्रत्येकं हीनं पञ्चदशेषु वै ॥ ४२
क्रोणेष्वेकैकमधिकं षण्णवत्या तथोत्तमम् ।
सम्पूर्य होमान् विधिवत् पूर्ववत् कारयेद्गुरुः ॥ ४३
होमान् समाप्य सम्पातं कलशेषु समर्पयेत् ।
मूलमन्त्रेण कृत्वैवं दिशाहोमाश्च कारयेत् ॥ ४४
शैवोक्तविधिना कुर्याद्दिशाहोममथापि वा ।
एतैरेव विशेषोऽत्र[4] षड्भिर्द्रव्यैरिहोदितैः ॥ ४५
जपेयुश्चतुरो वेदान् विप्रा भक्तिसमन्विताः ।
सम्यगातोऽद्य[5] वाद्यैश्च नादयेयुर्दिशो दश ॥ ४६
ततः प्रविश्य[6] देवेशं पूजयेद्विधिपूर्वकम् ।
विन्यस्य पादयोर्दूर्वां साक्षतां[7] मूर्ध्नि चौमिति ॥ ४७
दर्शयेन्मङ्गलान्यत्र[8] कृत्वा नीराजनं पुनः ।
उद्धृत्य देवं स्नपयेत् पूर्ववत् पूर्वमन्त्रकैः ॥ ४८

---

2 मानुषे, एतदष्टोत्तरशतकलशे। 4 समिधो विना, पालाश्यः समिधो वा। 6 प्रासादं।

---

1 त्वग्जलं क 3 जाः क 5 गतो क
7 दूर्वाः साक्षताः घ 8 लान् तत्र क

नवविंशत्पुटे[1] क्षेत्रे कुर्याद्वै पञ्चविंशतिम् ।
पञ्चविंशतिकान्यत्र नवकान्यन्तरे बहिः ॥ ४९
बहिः कोणेषु सर्वत्र कल्प्यं पदचतुष्टयम् ।
चतस्रो मार्जयेद्वीथीस्ततः पञ्चपुटान्तरे ॥ ५०
शेषाणि मार्जयेत् पश्चादेवं पञ्चशताधिकम् ।
मध्यमे मध्यगे कुम्भे पञ्चगव्येन पूरयेत् ॥ ५१
मूलेन पूर्ववद्द्रव्यैः[2]र्दि-ग्विदिक्षु प्रपूरयेत् ।
बहिः[3] षोडशशुद्धोदैः सर्पि-षैन्द्रे[4] तु मध्यमम् ॥ ५२
ततोऽष्टौ[5] पूर्ववद्वीजैः शेषांच्छुद्धोदकेन च ।
याम्ये तु पयसा मध्यं कषायैः पूर्ववद्घटान् ॥ ५३
वारुणे मध्यमं दध्ना पुष्पतोयैश्च पूर्ववत् ।
क्षौद्रेण फलतोयैश्च सौम्ये तैलेन चानले ॥ ५४
गन्धैः शुद्धोदकैः सर्वान् प्राग्वत् सम्पूरयेत् क्रमात् ।
नैर्ऋत्यां गुळतोयेन लोहाद्भिरपि पूर्ववत् ॥ ५५
वायौ चेक्षुरसेनैव मध्यगं[6] पार्श्वगान् पुनः ।
तत्रौषध्यष्टकेनैव शाङ्करे तीर्थवारिणा ॥ ५६
मध्ये तोयाष्टकेनैव[7] पूरयेदितरान्[8] पुनः ।
सुशुद्धामलकान् प्राच्यां हरिद्राम्भस्तु दक्षिणे ॥ ५७
प्रत्यगाचमनीयं च सौम्ये चार्घ्यं प्रपूरयेत् ।
कुशोदं काशतोयं च लामज्जो[9]दकमेव च ॥ ५८
दूर्वोदकं तु कोणेषु पूर्ववत् पूरयेद्घटान् ।
अन्तराळेषु खण्डेषु पल्लवाष्टकमेव च ॥ ५९

---

1 एवमधममध्यमविधिमभिधायोत्तममाह । 2 पद्मरागाद्यष्टभिः ।
3 ब्राह्म एव । 4 दैविके । 5 तत्परितः स्थितान् ।
7 इतरान् षोडश शुद्धोदकैः । 8 मानुषान् ।

---

6 मं क 9 ज्जो- क

शेषान् शुद्धोदकैः सर्वान् पूरयेत्पूर्ववद्घटान् ।
सु[1]वर्णं राजतं ताम्रमायसं त्रपु सीसकम् ॥ ६०
कांस्यं च पित्तलं चैव लोहोदं परिकीर्तितम् ।
सुवर्चसा वचा ब्राह्मी शङ्खपुष्पी शतावरी ॥ ६१
सहदेवी विष्णुक्रान्ता लक्ष्मीश्चैवौ[2]षधीजलम् ।
सामुद्रं च सरित्तोयं नैर्झरं वापिसम्भवम् ॥ ६२
तटाकह्रदजं कौप्यं सेतुजं च जलाष्टकम् ।
स्नापयेद्ब्रह्मकलशान् स्कन्दगायत्रिया पुनः ॥ ६३
मूलेन द्रव्यकलशानङ्गैः[3] प्रत्येकशो वृतान् ।
द्रव्ययोः स्नेहरसयोः स्नपनान्ने तु मृद्गणैः ॥ ६४
आलिप्यालिप्य सततं स्नापयेच्छुद्धवारिभिः ।
द्विशतैरेकहीनेन स्नानं पञ्चाशता पुनः ॥ ६५
मध्यमं[4] बाह्यखण्डैस्तु[5] हीनं षोडशभिः क्रमात् ।
पञ्च पञ्चाधिकं दिक्षु विदिक्ष्वेकैक एव च ॥ ६६
दिग्विदिक्स्थैर्बाहिर्द्रव्यैः पूरयेदधिकेष्वपि ।
पञ्चभिः पञ्चविंशद्भिरधमं स्नपनं भवेत् ॥ ६७
पूर्ववत् स्नापयेद्द्रव्यैरवस्राव्य प्रमोदतः ।
चतुर्वि-धैर्निवेद्यान्नैः प्रभूतैराज्यसंयुतैः ॥ ६८
अवस्तुतेन सम्प्रोक्ष्य विकीर्य बलिमादरात् ।
धूर्तसेनाभिषेकं च कृत्वा तेनैव चान्ततः ॥ ६९

इति क्रियासारे (सप्तचत्वारिंशः) स्कान्दे एकादशः पटलः

---

3 ब्रह्मकलशसमीपस्थान् द्रव्यकलशान् मूलेन, शुद्धकलशानङ्गैरित्यन्वयः ।
4 उत्तममध्यमं । 5 मध्ये पञ्चविंशतिमयानि नव खण्डानि । तथैव संस्थाप्य बाह्ये ।

---

1 सौ ख 2 षि क ग

द्वादशः पटलः

अथोत्सवविधिं वक्ष्ये गुहस्य परमात्मनः ।
प्रत्यब्दं नियतं कुर्याद्भक्त्या सर्वार्थसाधनम् ॥ १
षण्मासं वा तदर्धं वा सप्ताहं वा स्वशक्तितः ।
द्वादशाहं तदर्धं वा सप्ताहं वा स्वशक्तितः ॥ २
स्नापयेदुत्सवारम्भे ध्वजं[1] कुक्कुटलक्षणम्[2] ।
घण्टापताकासंयुक्तं पल्लवादिविभूषितम् ॥ ३
सारवन्तं दृढं शुभ्रं व्रणच्छिद्रविवर्जितम् ।
दशद्वारायतं सप्तदशद्वारायतं तु वा ॥ ४
द्वारोच्छ्रयचतुर्भागं पञ्चभागेन वा पुनः ।
षड्भागमथवा कुर्याद्ध्वजविस्तारमत्र तु ॥ ५
अकारं ध्वजदण्डं स्यादुकारं वाहनं भवेत् ।
बिन्दुस्तत्र पताका तु ज्ञेयं तारात्मकं ध्वजम् ॥ ६
पुण्याहं मूर्ति-पैस्सार्धं कृत्वा तच्छिष्टवारिभिः ।
क्षालयित्वा ध्वजं देवादाहृत्यात्र प्रयोजयेत् ॥ ७
तन्मन्त्रेण[3] नमोन्तेन बलिपीठाग्रतो बहिः ।
गर्तं संशोध्य सम्पूज्य क्षिप्त्वा दर्भाक्षतानपि[4] ।
स्थापयेद्ध्वजमव्यग्रस्तन्मूले कुट्टिमं[5] भवेत् ॥ ८
क्षालितान् पल्लवैर्युक्तान् स्थापयेद्दिक्षु वै ध्वजान् ।
दिक्पालचिह्नवर्णाढ्य[6]पताकाभिः समुज्वलान् ॥ ९
तोरणानि ध्वजांश्चैव बलिपीठं तु सर्वतः ।
कल्पयेन्मार्जयेद्वीथीं[7] सेचयेद्गोमयाम्बुना ॥ १०
गन्धाद्यैर्विकचैः पुष्पैर्विकिरेत् सर्वतोज्वलैः ।

2 मयूरलक्षणं वा । 3 ओं कुक्कुटाय नम इति । 5 वेदिकेत्यर्थः ।
6 ऐरावतादि, पीतादि । 7 मार्गान्

1 ध्वज क 4 न्विवं क

प्रासादाङ्गणदेशं च प्राकारान्तर्बहिस्तथा ॥ ११
मार्जयित्वा ततः सम्यग्गोमयेन विलेपयेत् ।
गन्धोदैः प्रोक्ष्य सर्वत्र कुसुमैरक्षतैः किरेत् ॥ १२
दीपप्रासादजातीश्च[1] दीपमालाश्च सर्वतः ।
दीपस्तम्भांस्ततो यन्त्रदीपान् सर्वत्र कल्पयेत् ॥ १३
ततः सन्ध्यालये देवं पूजयेद्धूपसाधनैः ।
संस्नाप्य शुद्धतोयैश्च पयोदध्याज्यगव्यकैः ॥ १४
गव्यैश्च[2] [3] नालिकेराद्भिः कलशैर्मन्त्रमन्त्रितैः ।
वासोभिर्वि-विधैर्देवं परिधाप्योज्वलं यथा ॥ १५
मकुटाद्यैरलङ्कारैरलङ्कृत्य च सर्वतः ।
गन्धैः सुयोजितैर्हृद्यैर्वि-लिप्य कुसुमादिभिः ॥ १६
अर्चयेत्परया भक्त्या धूपदीपैर्मनोहरैः ।
चतुर्वि-धै[4]र्नि-वेद्यान्नं भक्ष्यक्षीरोपदंशकम् ॥ १७
मध्वाज्यदधिसंयुक्तं ततो हुत्वा बलिं हरेत् ।
पलच्छेदोज्वलां पूजां निशि नित्यं समाचरेत् ॥ १८
परितो ज्वलयेद्दीपान् बहुवाद्यसमन्वितम् ।
ब्राह्मणान् भोजयेत्[5] सम्यगन्यांश्चैवाशनार्थिनः ॥ १९
भूतेभ्यो बलिदानं च कुर्यान्नित्यं जनैर्वृतः ।
दीर्घोत्सवक्रमो ह्येषः सप्ताहादिष्वथादितः ॥ २०
मङ्गलाङ्कुरारोपः स्यात् पूर्वोक्तेनैव वर्त्मना ।
ध्वजस्य स्थापनाद्यं यत्[6] पूर्वोक्तं तु तदा भवेत् ॥ २१
त्रिसन्ध्यमुचितं नित्यमुत्सवेषु विशेषतः ।
आरम्भदिवसे रात्रौ बलिदानं समाचरेत् ॥ २२

---

1 वेदिकाः । 3 गन्धजलैरित्यर्थः 4 पायसगुळहारिद्रमौद्गैः ।
5 अर्थानुरोधेन बलिदानानन्तरं ब्राह्मणभोजनं ।

---

2 गन्धकैः घ 6 र्थं च ख

दिवाऽपि च बलिं दद्याच्छेषेषु दिवसेषु च ।
संस्कृत्य[1] संस्कृते वह्नौ देवाय विनिवेदयेत् ।। २३
अन्यत्तु लौकिके वह्नौ बल्यर्थमपि पाचयेत् ।
दर्भेषु सादिते पात्रे तारेण प्रोक्षिते[2] हविः[3] ।। २४
क्षिप्त्वा सम्यगुपस्तीर्य तेन पीठं[4] प्रकल्पयेत् ।
मध्ये दिक्षु कला[5] न्यस्य तन्मध्ये कौतुकं न्यसेत् ।। २५
तत्रावाह्य[6] समाराध्य तमादाय बहिर्व्रजेत् ।
दीक्षितस्य करे दत्वा स्वस्ति जप्त्वा बलिं हरेत् ।। २६
भेरीमृदङ्गपणवत्वक्सारादिमहास्वनैः ।
वाहनैर्जयशब्दैश्च दिशः सर्वाः प्रपूरयेत् ।। २७
छत्रध्वजपताकाभिर्दीपिकाशतसङ्कुलम् ।
द्वाःस्थादिभ्यो बलिं दद्याद्देवदृष्ट्याऽवलोकितम् ।। २८
तत्र तत्र ततो ध्यात्वा तांस्तान् बलिभुजः क्रमात् ।
षट्-कोटिभूतसङ्घैश्च वृतान् प्रत्येकशः क्रमात् ।। २९
तत्र नृत्तं च वाद्यं च कृत्वा कृत्वा प्रयत्नतः ।
गन्धाद्यैः पूजयित्वा तु बलिं दद्यात् समाहितः ।। ३०
दक्षिणे वज्रहस्तं तु शक्तिपाणिनमुत्तरे ।
तत्पार्श्वमण्डलेऽभ्यर्च्य पार्षदेभ्यो बलिं हरेत् ।। ३१
मयूरं मण्डपेऽभ्यर्च्य दक्षिणे विघ्नशङ्करौ ।
दिक्पान् मातृः प्रभानाथमार्यां स्कन्दं यथाविधि ।। ३२
धूर्तसेनं च सम्पूज्य बलिं दत्वा बहिर्व्रजेत् ।
अग्निकेतुं सूर्यकेतुं गोपुरद्वारि पूजयेत् ।। ३३
गोपुरात्तु बहिर्गत्वा गुरुर्भक्तिसमन्वितः ।

---

1 हविरिति शेषः । 3 निवेद्यशिष्टं । 4 कौतुकपीठं ।
5 शान्त्यतीताद्याः ।

---

2 प्रोक्ष्यते क 6 वाप्य क ख

अनेन समुपस्थाय भूतेशानां बलिं हरेत् ॥ ३४
ये समस्तं जगद्व्याप्य तिष्ठन्ति बलिकांक्षिणः ।
स्कन्दपारिषदाः सर्वे गृह्णन्तु बलिमुत्तमम् ॥ ३५
देवसेनापतिं[1] प्राच्यामाग्नेय्यामग्निलोचनम् ।
दक्षिणे वज्रहस्तं तु नैर्ऋत्यामसिधारिणम् ॥ ३६
वारुण्यां पाशहस्तं तु वायव्यां ध्वजशेखरम् ।
उत्तरे गदिनं चैव ईशे शूलविलासिनम्[2] ॥ ३७
विप्रप्रियं चोपरिष्टादीशान्यां तं प्रपूजयेत् ।
द्वितीयावरणेऽभ्यर्च्य दद्यात् पारिष[3]दां बलिम् । ३८
बलिपीठं समासाद्य क्षाळयित्वा शुभैर्जलैः ।
शूरसेनादिकान् दिक्षु अधोर्ध्वं च समर्चयेत् ॥ ३९
भूतिदादीन् समभ्यर्च्य बलिं दद्यादथापि वा ।
भूतिदो दुर्निरीक्षश्च भीमरूपः सुलोचनः ॥ ४०
सुमुखश्च महाबाहुस्त्रिभुजस्त्रिशिराः क्रमात् ।
पिङ्गलः स्कन्दसेनश्च उक्तास्ते भूतिदादयः ॥ ४१
शूरसेनोग्रसेनश्च शिखिसेनस्तृतीयकः ।
जयत्सेनो[4]महासेनश्चण्डसेनस्तथैव च ॥ ४२
क्रुद्धसेनः क्रू[5]रसेनो जयत्से[6]नोऽष्टमात्परः ।
दशमः स्कन्दसेनश्च तेन पीठस्य मध्यतः ॥ ४३
ये भूताः स्कन्दसेनस्य पार्षदा बलिभोजनाः ।
तृप्यन्तु ते मुदं[7] यान्तु सद्व्योऽसद्व्यो नमो नमः ॥ ४४
स्कन्देभ्यः स्कन्दपार्षदेभ्यश्च सर्वेभ्यस्तेभ्यो[8] नमो नमः ।
देवग्रहादयः पश्चाद्यष्टव्यास्तेसमासतः ॥ ४५
स्कन्दपार्षदेभ्यो नम इति तेभ्यः सर्वत्र दापयेत् ।

---

1 सेनाबलिं ख 2 विनाशिनं क 3 प्रवद्यात्पार्ष- क 4 सेन ख
5 शू ख 6 से- ख 7 मुदा ख 8 स्तेभ्यस्तास्या क

तीर्थयात्रादितान् पूर्वदिने रात्रौ महाबलिम् ॥ ४६
दद्याद्भक्षसमोपेतैरन्नैः सर्वत्र देशिकः ।
ततः प्रासादमासाद्य देवे देवं[1] नियोज्य च ॥ ४७
प्रार्थयेद्देवमाचार्यः प्रणम्य प्राञ्जलिः स्थितः ।
तीर्थयात्रा त्वया देव कर्तव्यश्च [व्या च] सुरेश्वर ॥ ४८
तत्र प्रतिसरेत्यादि [प्रतिसरारम्भं त्वमनुज्ञातुमर्हसि ।]
इति प्रार्थ्य बहिर्गत्वा शय्यां प्रस्ता [स्तीर्य] र्य मण्डपे ॥ ४९
अलङ्कृते यथा शोभमङ्कुरैर्दीपमण्डलैः[2] ।
कौतुक बन्धयेत् पश्चाद्घृतारोपणपूर्वकम् ॥ ५०
घृतस्यारोपणं[3] कृत्वा पुण्याहं मूर्तिपैः सह ।
कृत्वाऽथ कौतुकं यत्नाद्विधिवद्बन्धयेद्गुरुः ॥ ५१
षण्मुखाख्येन मन्त्रेण ताराद्यन्तेन सादरम् ।
कौतुकं शोधयित्वा[4]ऽस्मिन्नावाह्याभ्यर्च्य देशिकः ॥ ५२
वस्त्राभ्यां वेष्टयित्वा तं सर्वमङ्गलसंयुतम् ।
शाकुनेनैव[5]सूक्तेन शय्यायामधिरोपयेत् ॥ ५३
शाययेत् तत्र मूलेन समभ्यर्च्य समाहितः ।
नृत्तगीताट्टहासैश्च नयेद्रात्रिमनिद्रया ॥ ५४
प्रातः स्नात्वा यथान्यायं कृतपूर्वाह्निकक्रियः ।
उत्थाप्य देवं दत्वार्घ्यं पाद्याचामादिपूजनम् ॥ ५५
कृत्वा प्रवेश्य सम्पूज्य पिष्टचूर्णानि कारयेत् ।
हारिद्रमुद्गसंमिश्रैर्देवं सम्मृज्य सर्वतः ॥ ५६
वाद्यैः समस्तैः संयुक्तं जयशब्दादिसंयुतम् ।
भक्तेभ्यो दापयेच्चूर्णं[6] सर्वपापहरं शुभम् ॥ ५७
ततः सम्पूज्य गन्धाद्यैर्यात्राहोमं विधाय च ।

---

1 मूलबिम्बे कौतुकगतम् । 3 तद्विधिमाह । 4 धारणादिभिः ।
2 मङ्गलैः 5 न्तेनैव क 6 त्स्वर्णं क

यात्राबिम्बं समादाय पुण्याहं मूर्तिपैः सह ।। ५८
कृत्वा संशोध्य तद्बिम्बं देवं विज्ञापयेत्ततः ।
तीर्थाभिगमनाद्यावत् तीर्था [देवा] भिगमनं पुनः ।। ५९
तावत् त्वं कौतुकमिममधिष्ठाय प्रसीद नः ।
इति प्रार्थ्य ततस्तस्यामावाह्याभ्यर्च्य सादरम् ।। ६०
महाजनैः कृतानुज्ञो भेरीपटहनिस्वनैः ।
वस्त्राभ्यां छादयित्वैनमादाय द्वारि वै व्रजेत् ।। ६१
तत्र मङ्गलवादं च सर्वमङ्गलसंयुतम् ।
कुर्याद्गुरुस्तदान्यै[1]श्च वाच्यं सर्वैस्तथाऽस्त्विति ।। ६२
निर्गत्य मण्डपे देवमाराध्य समलङ्कृते ।
धूपं दीपं हविश्छत्रं ध्वजमङ्कुरपालिकाम् ।। ६३
गृहीत्वा ब्राह्मणास्तत्र गच्छेयुरमितो[2] द्विजाः[3] ।
प्रदक्षिणं परिक्रम्य प्रासादं गोपुराद्बहिः ।। ६४
गत्वा वाहनमासाद्य प्रोक्ष्यारुह्य शिखण्डिनम् ।
ध्यात्वा महाजनैः सार्धं गुरुर्गच्छेत्तु निम्नगाम् ।। ६५
तत्र संशोध्य[4] वेदिं तु तस्यां देवं नियोजयेत् ।
पाद्यादिभिरथाभ्यर्च्य तीर्थमावाह्य मूलतः ।। ६६
तं गृहीत्वाऽथ मूलेन त्रिर्म[5]ज्जेत्संयतेन्द्रियः ।
वेद्यां निवेश्य दत्वाऽर्घ्यं पाद्यमाचमनं पुनः ।। ६७
प्रोक्षयेन्मूलमन्त्राभ्यां गायत्र्याङ्गैस्तथैव च ।
तन्मन्त्रैर्नामभिस्तद्वदलिङ्गैः पूर्वमेव च ।। ६८
अघमर्षणं ततः कुर्यान्मन्त्रैरेभिश्च संयुतः ।
वेद्यां निवेश्य सम्पूज्य पूर्ववद्वाहनं नयेत् ।। ६९
तत्र सम्पूजयेत्सम्यग्रात्रौ भूतबलिं हरेत् ।

---

2 गुरोः पार्श्वयो ।

---

1 इन्यैः क 3 गुरोः क 4 सञ्छा ख 5 निम ख

श्वोभूते स्नपनं कुर्याच्छक्त्या दद्याच्च दक्षिणाम् ।। ७०
दुर्निमित्तं यदि भवेत् प्रायश्चित्तं समाचरेत् ।
कुर्याद्दोषप्रशमनं ततः सम्पद्धविष्यति ।। ७१

इति क्रियासारे (अष्टचत्वारिंशः) स्कान्दे द्वादशः पटलः

त्रयोदशः पटलः

प्रायश्चित्तं प्रवक्ष्यामि निमित्तेषु समासतः ।
उत्पाता इति विज्ञेया एष्यद्दुःखप्रसूचकाः ।। १
तेषु जातेषु तच्छान्तिमकृत्वा नार्चयेद्गुहम् ।
त्रिविधास्ते समाख्याता भौमा[1] दिव्या[2] खसम्भवाः[3] ।। २
गर्भगेहेऽथवा[4]ऽलिन्दे प्रासादप्राङ्गणेऽपि वा ।
प्राकारात्तु बहिर्यत्र यत्र दोषसमुद्भवः ।। ३
प्रायश्चित्तं गुरुः कुर्यात्तत्र तत्र यथायथम् ।
खननादीनि दुष्टायाः[5] शोधनानि विदुर्बुधाः ।। ४
तानि सम्यग्गुरुः कुर्याच्छास्त्रदृष्टेन वर्त्मना ।
दुष्टां भूमिं खनेत् पूर्वं खादिरस्फ्येन चास्त्रतः ।। ५
दोषोपेतां शिलां वाऽपि मृत्स्नां[6] वा दूरतः क्षिपेत् ।
दग्ध्वा काष्ठैः कुशैर्दर्भैस्तद्भस्मादिपुनर्हरेत् ।। ६
विप्रपादोदकैर्गव्यैर्गोमूत्रेणापि पूरयेत् ।
गां निवास्य शिलाभिर्वा मृद्भिर्वा[7] पूरयेद्दृढम् ।। ७
ब्राह्मणान् भोजयित्वा तैः स्वस्ति पश्चात् तु वाचयेत् ।
तदुच्छिष्टे हृते सिञ्चेद्गोमयेनोपलेपयेत् ।। ८

1 मरणादिभिः । 2 पिशाचदर्शनादयः । 3 रुधिरवर्षादयः ।
5 भूमेः । 7 वा शब्द उभयत्र समुच्चयेऽवधारणे वा ।

4 गवा क 6 मृत्सां क

वर्मणास्त्रेण गव्येन प्रोक्षयेद्विकिरैः किरेत् ।
स्थानशुद्धिरिति प्रोक्ता बिम्बशुद्धिरथोच्यते ॥ ९
स्थानेऽशुद्धे भुवः शुद्धिं[1] बिम्बस्यापि समाचरेत् ।
बिम्बे दुष्टेऽस्य[2] बिम्बस्य शुद्ध्या शुद्धिर्भविष्यति ॥ १०
क्षालन-प्लावन-स्नान-मार्जनैर्धारया पुनः ।
अवगाहाभिषेकाभ्यां बिम्बशुद्धिरुदी[3]रिता ॥ ११
पारायणं ततः कुर्यात् [कुर्युः] ब्राह्मणा वेदपारगाः ।
गुरौ दोषे गुरुः कुर्यात् प्रोक्षणं विधिनैव तु ॥ १२
तस्य संक्षेपतो वक्ष्ये विधानं शास्त्रचोदितम् ।
देवस्य पुरतः कुर्यात् कौमारं मण्डलं शुभम् ॥ १३
निक्षिप्य तस्मिन् कलशं [धान्यानि] दर्भान् विन्यस्य सादयेत् ।
कुम्भं द्रोणवहं शुभ्रं प्रणवेन यथाविधि ॥ १४
पुनर्न्यासक्रमेणैव सादयित्वा गुरुः स्वयम् ।
प्रोत्तानीकृत्य सम्प्रोक्ष्य कूर्चं निक्षिप्य मूलतः ॥ १५
पूरयेद्गन्धतोयैश्च हेमरत्नाक्षतान्वितम् ।
उपर्यर्ध[4]मलङ्कृत्य पल्लवाद्यैरथार्चयेत् ॥ १६
पुण्याहं मूर्ति-पैस्सार्धं वाचयित्वा यथाविधि ।
अभिज्ञैः प्रोक्ष्य तत्तोयं[5] कलशे पूरयेद्गुरुः ॥ १७
ततोऽप्याराध्य विधिवज्जपेयुरभितो द्विजाः ।
स्पृशन्तः कलशं दर्भैराद्यं सूक्तं समाहिताः ॥ १८
तथैव रौद्र कौमारं[6] शाकुनं स्वस्तिमेव च
श्रीसूक्तं शन्नवर्गं च पौरुषं सूक्तमेव च ॥ १९
यस्मिन् वृक्षे तथा वात आवात्वि[7]ति समाहिताः ।

---

4 अर्धाधिकं पूरयेदिति पूर्वेणान्वेति । 5 पुण्याहशिष्टतोयं ।
6 तमर्वन्तं ।

---

1 शुद्धिः ख 2 थ क 3 रिती क 7 वातु आयातु क

मूलमन्त्रद्वयं साङ्गं गायत्रीं षण्मनूंस्तथा ॥ २०
नामानि द्वादशास्योक्तान्यथ तारं जपेच्छतम् ।
पञ्चगव्यं तु संसाद्य विकिरा[1]नस्त्रमन्त्रतः ॥ २१
एवं कृत्वा ततो देवमाराध्याथाभिषिच्य च ।
पाद्यमाचमनं दत्वा प्रोक्षयेत् कलशोदकैः ॥ २२
शमीशाखादिभिर्मूलमन्त्राभ्यामङ्गमन्त्रकैः ।
षण्मन्त्रै·थ गायत्र्या नामभिर्द्वादशैरपि ॥ २३
परिवारान्[2] स्वमन्त्रैश्च परिभ्रम्य प्रदक्षिणम् ।
शाकुनस्वस्तिसूक्ताभ्यां सर्वत्रान्ते[3]ऽभिषेचयेत् ॥ २४
धूर्तसेनं स्वमन्त्रेण गव्येन प्रोक्ष्य सर्वतः ।
विकिरानस्त्रमन्त्रेण विकीर्यार्चनमाचरेत् ॥ २५
दर्भै[4]र्दूर्वाङ्कुराग्रै[5]श्च यवव्रीहिसतण्डुलैः ।
माषैः सतिलसिद्धार्थैस्तुळसीपद्मकेसरैः ॥ २६
संयुक्तं विकिरं सर्वदोषघ्नं पुष्टिकृद्भवेत् ।
प्रायश्चित्तं ततः कुर्यात् प्रासादस्य तु दक्षिणे ॥ २७
खण्डेन्दुसदृशं कुण्डं कृत्वाऽग्निं जनयेद्गुरुः ।
कलशं पूरयेत् पार्श्वे तत्र देवं प्रपूजयेत् ॥ २८
कृत्वा चाग्निमुखं पक्वं गायत्र्याऽऽज्याहुतीः पुनः ।
षण्मन्त्रैर्मूलमन्त्राभ्यां गायत्र्या मूलनामभिः ॥ २९
व्याहृतीभिस्ततो हुत्वा दद्यात् पूर्णाहुतिं ततः ।
षण्मन्त्रैः समिदादीनि द्विशत[6] जुहुयात् पृथक् ॥ ३०

---

1 तस्य दक्षिणत स्वस्तिकयोः । 2 अभिषिच्य धूर्तसेनं विनान्तर्बहिश्च प्रोक्ष्याभिषिच्य । 3 सर्वान्ते धूर्तसेनं प्रोक्ष्याभिषिञ्चेत् । कलशप्रोक्षणाभिषेकान्ते गव्यप्रोक्षणाभिषेक-विकिरविकिरणं सर्वत्र समानम् ।
4 विकिरद्रव्याण्याह । 6 द्व्यधिकं शतं ।

---

5 शाग्रै क

द्विसहस्रं[1] पुनर्वाऽपि त्रिसहस्रमथापि वा ।
कदम्बसमिधोऽवक्राः सत्वचो द्वादशाङ्गुलाः ॥ ३१
समिदाज्यचरून् लाजान् सर्षपांश्च यवांस्तिलान् ।
जुहुयाच्च घृतं क्षीरं दधि क्षौद्रं शतं पृथक् ॥ ३२
देवसेनादिभिर्मन्त्रैर्व्याहृतीभिस्तु[2] वा[3] क्रमात् ।
देवसेना च विद्या च मेधा प्रज्ञा तथैव च ॥ ३३
मृत्युञ्जयेन[4] दूर्वाश्च मधुरत्रयसंयुताः[5] ।
त्रिसहस्रं ततो हुत्वा होमशेषं समापयेत् ॥ ३४
प्रणीताजलमादाय हुतभस्मसमायुतम् ।
कलशे सेचयित्वाऽथ हुतमन्त्रांस्ततो जपेत् ॥ ३५
तेनाभिषिच्य देवेशं पूजयेत् कल्पवर्त्मना ।
गुरुं सम्पूजयेद्भक्त्या वित्तशाठ्यविवर्जितः ॥ ३६
ब्राह्मणान् भोजयेत् पश्चात् स्नपनं च समाचरेत् ।
उत्सवार्चं स्वशक्त्या तु कुर्याद्दोषप्रशान्तये ॥ ३७
कुर्यात् तुर्यस्रं[6]कं कुण्डमैशान्यां दिशि देशिकः ।
तत्राग्निं जनयेत् पश्चात् कृत्वा चाग्निमुखं पुनः ॥ ३८
पक्वं गायत्रिया हुत्वा पूजामन्त्रैः सकृद्घृतम् ।
क्षीरवृक्षसमिद्भिस्तु सहस्रम् वा शतं पृथक् ॥ ३९
गायत्र्यैवाऽथ दूर्वाभिर्मध्वाज्यक्षीरसंयुतम् ।
आज्यमन्नम् ततो लाजान् सर्षपांश्च यवांस्तिलान् ॥ ४०
व्रीहीन् सक्तून् घृतं चेति[7] हुनेदष्टशतं पृथक् ।
हुत्वा स्विष्टकृतं पश्चाद्धोमशेषं समाप्य च ॥ ४१
सम्पातकलशेनाथ[8] देवं तमभिषेचयेत् ।

---

1 द्व्यधिकं सहस्रं । 2 घृतादि चतुर्द्रव्यहोमे देवसेनादयः, व्याहृतयो वा मन्त्राः । 4 दोषाधिक्ये शान्तिहोममाह । 8 सम्पातयुक्तकलशजलेन ।

3 वै क 5 तम् क 6 श्र क 7 पुनश्चाज्यं क

ब्राह्मणान् भोजयेन् पश्चाद्दक्षिणां चापि दापयेत् ॥ ४२
स्नपनं च यथान्यायमुत्सवं चापि कारयेत् ।
प्रायश्चित्तं यथादोषं संक्षेपात् कथितं मया ॥ ४३

इति क्रियासारे (एकोनपञ्चाशः) स्कान्दे त्रयोदशः पटलः

चतुर्दशः पटलः

जीर्णोद्धारं प्रवक्ष्यामि स्कन्दस्य परमात्मनः ।
प्रासादे शिथिले जीर्णे मृद्विम्बे चित्र एव वा ॥ १
ऐशान्यामभितः कुर्यात् प्राकारस्य च बाह्यतः ।
प्रासादमल्पकाष्ठैर्वा मृद्भिर्वा सुमनोहरम् ॥ २
तन्मध्ये दारवं पीठं सध्रुवम्[1] कारयेद्गुरुः ।
गेहस्याभिमुखं तस्या[2]त् तद्वो मण्डपं भवेत् ॥ ३
प्राग्वा [द्वा] रे वायवे चैव नैर्ऋत्यां वाऽन्यतो मुखे ।
बिम्बं लोहमयं कुर्यादल्प [न्मूल] बिम्बानुसारतः[3] ॥ ४
गेहशुद्धिं[4] ततः कृत्वा बिम्बशुद्धिं तु युक्तितः ।
पूजयेत् परया भक्त्या देवं भूतगणैः सह ॥ ५
नृत्तैर्गीतैश्च वाद्यैश्च विविधैः सुमनोहरैः ।
सर्वं सम्पूजयित्वैवं बिम्बं तोयेऽधिवासयेत् ॥ ६
अल्पगेहं च संशोध्य मण्डपं च यथाविधि ।
शोधयेद्दिक्षु कुण्डानि पूर्ववत् परिकल्प्य च ॥ ७
तोरणैश्च ध्वजैर्वस्त्रैर्वितानैः समलङ्कृतम् ।

---

1 मध्ये प्रतिष्ठागर्तसहितं । 3 मूलबिम्बचतुर्थभागमितं । एवं च मूलबिम्बानुसारत इति युक्तम् । 4 महाप्रासाद-शुद्धिं ।

2 तस्य क

तस्मिन् स्वस्तिकमालिख्य शयनं परिकल्पयेत् ॥ ८
जलेऽधिवासितं बिम्बं स्नापयेत् कलशैस्ततः ।
गव्यैर्व्यस्तैः समस्तेन मृत्तोयैस्त्वग्रसैस्तथा ॥ ९
रत्नोदैश्च यथान्यायमाराध्य सह मूर्तिपैः ।
पुण्याहं वाचयित्वाऽथ शयने सन्निवेशयेत् ॥ १०
शान्तिहोमं ततः कुर्यात् प्रासादाग्रे यथाविधि ।
दूर्वाभिर्वा समिद्भिर्वा क्षीरवृक्षसमुद्भवैः ॥ ११
सावित्र्या विधिवद्धुत्वा[1] होमशेषं समाप्य च ।
पूजयेत् परया भक्त्या देवदेवं गुहं प्रभुम् ॥ १२
सङ्घीकृत्य ततो विप्रान्नमस्कृत्य प्रसाद्य च ।
लब्ध्वाऽनुज्ञां ततः कर्तृन् पृच्छेत् कालावधिं पुनः ॥ १३
मासादिद्वादशाब्दान्तः कालावधिरिति स्मृतः ।
इति पृष्टास्ततो ब्रूयुः कालेनैतावता वयम् ॥ १४
समापयाम[2] इत्येवं तैरुक्तं तं निवेदयेत्[3] ।
ततः कलशमादाय निर्दोषं सूत्रवेष्टितम् ॥ १५
देवस्याग्रे निवेश्याथ पूरयेत् सलिलैः शुभैः ।
रत्नलोहकुशा[4]कूर्च[5]गन्धपुष्पफलैर्युतम् ॥ १६
संहृत्य देवताः सर्वास्तत्वान्यपि यथाविधि ।
तेजोरूपं तु सकलं देवं संयोज्य तं पुनः ॥ १७
आवाह्य कलशे सम्यगाराध्य वसनैः शुभैः ।
आच्छाद्य कलशं देवं संरक्ष्यादाय तं पुनः ॥ १८
ध्यात्वा देवं ततो गच्छेद्देवागाराद्बहिर्गुरुः ।
यत्नात् प्रदक्षिणं गच्छन् मण्डपे शयने न्यसेत् ॥ १९

1 एष होमः बिम्बोद्धार एवेति एकोनत्रिंशच्छ्लोके वक्ष्यते ।
2 प्रासादमिति शेषः । 3 देवाय ।
4 शाः क 5 र्चाः क

बिम्बं संहृत्य चोत्पाद्य[1] न्यस्त्वा तत्वान्यपि क्रमात् ।
सकलीकृत्य देवेशं पूजयेद्भक्तिसंयुतः ॥ २०
मूर्तिशक्त्यङ्गसंयुक्तं कलशस्थं तथाऽर्चयेत् ।
मूर्तिपा दिक्षु होमांश्च कुर्युराचार्यसंयुताः ॥ २१
प्राग्वत् सम्पातविधिना तेन बिम्बं ततः स्पृशेत् ।
जपेयुरभितः स्पृष्ट्वा कलशं बिम्बमेव च ॥ २२
सुमुहूर्ते द्विजानुज्ञां प्राप्य बिम्बं नयेद्गृहम् ।
पीठगर्ते च[2] मूलेन स्थापयेन्निश्चलं यथा ॥ २३
कलशेनाभिषिच्यार्चां सकलीकृत्य पूजयेत्[3] [4] ।
ततोऽङ्गदेवताः सर्वास्तत्र तत्र प्रकल्पयेत् ॥ २४
दिशाहोमं[5] ततः स्नानं चतुर्थेऽह्नि समाचरेत् ।
उत्सवाद्यं तु तत्सर्वं पूर्ववत् परिकल्पयेत् ॥ २५
प्रासादं सुदृढं कृत्वा यदा सङ्क्रमणं विभोः ।
तावत्पूजादि सकलं तत्रैव परिकल्पयेत् ॥ २६
प्रासादे शिथिले चैव निष्क्रामणमिहेष्यते ।
बिम्बे जीर्णे मनाग्भेदः स इदानीं निगद्यते ॥ २७
सूत्रच्छेदविधानेन[6] हुत्वा तत्वान्यपि क्रमात् ।
यात्राहोमं ततः कृत्वा सूक्ताभ्यां[7] मूलमन्त्रतः ॥ २८
पूर्ववत् कलशे देवमावाह्याभिनवे गृहे ।
संस्थाप्य पूर्ववत् सर्वमिहापि परिकल्पयेत् ॥ २९

---

4 इतः परं ख पुस्तके दौर्गे तृतीये कोपाद्द्विपञ्चमं इति अष्टत्रिंशच्छ्लोकानन्तरं तत्रोक्ताः तत्वानां भूतानां च बीजवर्णस्वरूपदेवादयः अत्रापि षड्विंशतिभिः श्लोकैरुक्ताः, ते तत एव ज्ञातुं शक्या इति मया ते परित्यक्ताः । 5 द्वितीयदिने दिशाहोमं तृतीये प्रायश्चित्तं ।
6 पृथिव्यादि प्रकृत्यन्तन्तत्वेषु हुंफढन्तत्वरूपेण ।
7 कनिक्रदत्स्वस्तिसूक्ताभ्यां ।

---

1 टच ख 2 थ क 3 तत्र तत्वं न्यसेद्बुधः ख

प्रतिमायाः परित्यागे सूत्रच्छेदविधानतः ।
दूर्वादिभिश्च[1] सावित्र्या विहितोऽन्यत्र नेष्यते ॥ ३०
मूलगेहं प्रविश्याथ मूर्ति-पैः सहितो गुरुः ।
ब्राह्मणैरभ्यनुज्ञातः कर्ता सम्प्रार्थितस्तदा ॥ ३१
अलङ्कृत्य ततो बिम्बं धूर्तसेनः स्वयं पुनः ।
भूत्वा वाद्यैः समस्तैश्च दिशः सम्पूरयेद्गुरुः ॥ ३२
उत्पाट्य वस्त्रैराच्छाद्य नयेद्बिम्बं बहिर्गुरुः ।
दक्षिणे स्थण्डिले न्यस्य संस्नाप्य सलिलैः शुभैः ॥ ३३
अलङ्कृत्याऽथ गायत्र्या वस्त्राभ्यां परिवेष्टय च ।
अलङ्कृते समारोप्य रथे छत्रध्वजादिभिः ॥ ३४
भेरीशङ्खनिनादैश्च दीपिकाभिः समन्वितम् ।
नयेज्जलाशयं शुद्धमसिक्तं निक्षपेद्गुरुः ॥ ३५
धूर्तसेनं स्मरंस्तेन मन्त्रेणावाहितस्ततः ।
स्नात्वा प्राप्य ततो गेहं क्षोधयेन्मार्जनादिभिः ॥ ३६
सम्मार्ज्यालिप्य सम्प्रोक्ष्य गव्यैर्गन्धोदकैरपि ।
सर्प-पैरस्त्रसञ्जप्तैर्वि-किरैरक्षतैरपि ॥ ३७
धूपं दीपं ततो दर्भान् न्यस्य[2] रक्षां प्रकल्पयेत् ।
दोषैर्लघुतरै[3]र्बिम्बं नैव त्याज्यं कदाचन ॥ ३८
स गुरुर्यदि तत् [स] त्याज्यः स इदानीं निगद्यते ।
बाहुच्छेदे करच्छेदे पादच्छेदे तथैव च ॥ ३९
तथैव स्फुटिते भिन्ने यस्मिन्नवयवे गते ।
वैरूप्यं जायते यस्य तत् त्याज्यं प्रायशो भवेत् ॥ ४०
अंगुल्यादि परिच्छेदे बन्धनं[4] शस्यते बुधैः ।
महादोषसमायुक्ते सान्निध्यं लक्ष्यते यदि ॥ ४१

---

1 एकादशश्लोके उक्तः । 2 गेहे । 4 स्वर्णादिना समीकरणम् ।

3 दोषे लघुतरे क

तदेव बध्वा संशोध्य प्रायश्चित्तं समाचरेत् ।
तत्र लोहमयं बिम्बं संस्थाप्याग्रे समर्चयेत् ॥ ४२
प्रासादे तु कृते बिम्बं क्षाळनाद्यैर्विशोध्य च ।
(अल्पगेहे गतं देवमावाह्य कलशे क्रमात् ॥ ४३
देवे नियोज्य कलशैरभिषिञ्चेद्यथाविधि ।
बिम्बत्यागे नवं बिम्बमधिवास्य जले क्रमात् ॥ ४४
कलशैरभिषिच्याथ मण्डपे वाऽधिवासयेत्)[1]
अल्पगेहगतं देवमभिषिच्य समर्च्य च ॥ ४६
आवाह्य कलशे प्राग्वत् सह तेनाधिवासयेत् ।
रत्नन्यासादिकं सर्वं कृत्वा पूर्वोक्तवर्त्मना ॥ ४७
संस्थाप्य बिम्बं पूर्वोक्तमार्गेणावाहितो गुरुः ।
तेन कुम्भेन संस्नाप्य पूजयेच्च यथाविधि ॥ ४८
(प्रतिष्ठाविधिना शेषं सर्वं कुर्यात् प्रयत्नतः ।
प्रायश्चित्तान्यशेषाणि कृत्वा तत्र स्वशक्तितः ॥ ४९
अल्पगेहगतं बिम्बं संस्कृत्य च यथाविधि)[2] ।
कौतुकं[3] कल्पयेद्भूयो दहेत् तं दारवं यदि ॥ ५०
अस्त्रमन्त्रेण विधिवत् संस्कृतेऽग्नौ गुरुः स्वयम् ।
इति संक्षेपतः प्रोक्तं सर्वतन्त्रानुसारतः ॥ ५१
प्रतिष्ठाविहितं कर्म गुहस्य परमात्मनः ।
शोध्यं सर्वं प्रयत्नेन मात्सर्यादिविवर्जि-तैः[4] ॥ ५२

इति क्रियासारे (पञ्चाशः) स्कान्दे चतुर्दशः पटलः

---

3 बल्यर्थं तीर्थस्नानार्थं वा कर्माचां ।

4 इतः परं व्याख्यात्रा केचन श्लोका उपलब्धाः, ग्रन्थरक्षण-विनय-प्रदर्शन-प्रणामपरा इत्यवगम्यते । किन्तु मदीयादर्शेषु नोपलब्धाः, नातीवोपयुक्ताश्चेति ते परित्यक्ताः ।

1-2 कंसाङ्कितो भागः ख पुस्तके नास्ति ।

विनायकभागः

प्रथमः पटलः

विनायकं नमस्कृत्य सर्वविघ्ननिवारणम् ।
प्रतिष्ठां तस्य संक्षेपाद्वक्ष्ये शास्त्रानुसारतः ।। १
विनायकप्रासादेन सिद्ध्यन्तेऽखिलसिद्धयः ।
तस्मात् तं स्थापयेच्छक्तः पूजयेच्च प्रयत्नतः ।। २
भक्तो यः स्थापनं कर्तुं यत्नं तस्य करोति वै ।
स गुरुं प्रार्थयेत् पूर्वं तेन कर्माणि कारयेत् ।। ३
स्थाप्यते यत्र विघ्नेशो भक्तैः शास्त्रोक्तवर्त्मना ।
तत्र विघ्ना नजायन्ते वर्धन्ते सम्पदः सदा ।। ४
तस्माद्भूमिं परीक्ष्यादौ गृह्णीयाच्छुभलक्षणाम् ।
तत्र संशोध्य विधिना प्रासादं कारयेत् ततः ।। ५
मूलेन बीजवपनमिष्टकाधानमत्र तु ।
प्रासादस्यानुरूपेण बिम्बं च परिकल्पयेत् ।। ६
चतुर्भुजं बृहत्कुक्षिं सर्वलक्षणसंयुतम् ।
सर्वाभरणसंयुक्तं नागयज्ञोपवीतिनम् ।। ७
ललाटे हेमपट्टेन रत्नाढ्येन विराजितम् ।
भुजेषु निजशृङ्गं च लड्डुकं चाक्षमालिकाम् ।। ८
परशुं बीजपूरं च वहन्तं पुष्करेण तु ।
कृत्वैवं विधिवद्बिम्बं ततः कर्म समारभेत् ।। ९
उत्तरे त्वयने शुक्लपक्षे पुण्यदिने तिथौ ।
शुभ[1]ग्रहयुते राशौ शुभग्रहनिरीक्षिते ।। १०
ऋषभे वाऽथ कुम्भे वा सिंहे मीनेऽथवा परे ।

---

1 शुद्ध ख

कन्यायां वा यथान्यायं स्थापयेद्देशिकोत्तमः ।। ११
दशमेऽह्नि प्रतिष्ठायाः[1] षष्ठे वा ह्यष्टमेऽपि वा ।
मूलेन बीजवपनं कृत्वा गायत्रिया[2] जलैः ।। १२
सिञ्चेत् त्रिसन्ध्यं सम्पूज्य नित्यं रात्रौ बलिं हरेत् ।
शैवोक्तेन विधानेन भूतक्रूरान्धसाऽथ वा ।। १३
चाषयुक्तध्वजं चाग्रे स्थापयेत् पीठबाह्यतः ।
तन्मन्त्रेण नमोन्तेन कुर्यान्मूलेः च वेदिकाम् ।। १४
आवह्य पूजयेत् तत्र महाचार्यं यथाविधि ।
पञ्चमेऽह्नि प्रतिष्ठायाः परभागे दिनस्य तु ।। १५
गृहीत्वाऽर्चां तु शिल्पिभ्यः प्रक्षाळ्य सलिलैः शुभैः ।
मृद्भिस्त्वग्भिश्च दर्भैश्च सङ्घृष्य क्षाळयेत् पुनः ।। १६
विलिप्य मधुनाऽऽज्येन क्षाळयेद्वारिभिस्ततः ।
मसूरपिष्टेनोद्वर्त्य शुभा भवति वै यदा[3] ।। १७
अंलङ्कृत्य च गन्धाद्यैः कौतुकं बन्धयेत् पुनः ।
क्षौमे वाससि सिद्धार्थान् सितान् विन्यस्य मूलतः ।। १८
ऊर्णासूत्रेण हस्ताभ्यां बध्नीयाद्दक्षिणे करे[4] ।
दूर्वाक्षतानि तारेण पादयोर्मूर्ध्नि निक्षिपेत् ।। १९
नीराज्य वस्त्रयुग्मेन वेष्टयित्वा नयेज्जलम् ।
शाकुनस्वस्तिसूक्ताभ्यां जयशब्दादिसंयुतम् ।। २०
जलतीरे निधायार्चां तीर्थमावाह्य वारिणा [वारुणम्] ।
योगपीठं प्रकल्प्यास्मिन् बिम्बं संहृत्य यत्नतः ।। २१
बिम्बं वह्निमयं ध्यात्वा पीठे तारेण विन्यसेत् ।
ताळत्रयं दिशावन्धमग्निप्राकारमेव च ।। २२
लोकपालांस्ततो ध्यात्वा सायुधान् रक्षणोद्यतान् ।

1 पूर्वमिति शेषः ।

2 त्र्या क ख 3 तथा ख 4 जयशब्दादि संयुतम् ख

दीपं वह्निं च रक्षार्थं पुरुषांश्च प्रकल्पयेत् ।। २३
कृत्वैवं जलवासं तु प्रासादं शोधयत् पुनः ।
सूत्रेण दर्भदाम्ना च वेष्टयित्वा समन्ततः ।। २४
अस्त्रदृष्ट्या समालोक्य प्रविश्यान्तः प्रमार्जयेत् ।
अस्त्रिन्दं च बहिस्तद्वत् संक्षाळ्याथावलिप्य च ।। २५
सर्षपानस्त्रसञ्जप्तान् विकीर्याथ प्रमार्ज्य च ।
भूयो विलिप्य गन्धोदैर्धूपदीपं च विन्यसेत् ।। २६
राक्षोघ्नसूक्तं सञ्जप्य गव्येन प्रोक्ष्य चास्त्रतः ।
ताळत्रयं दिशावन्धं कृत्वा निर्गत्य देशिकः ।। २७
राक्षोघ्नहोमं विधिवत् कृत्वाऽस्त्रेण यथाविधि ।
वास्तुहोमं ततो वास्तोर्बलिं पुण्याहमाचरेत् ।। २८

इति क्रियासारे (एकपञ्चाशः) वंघ्ने प्रथमः पटलः

द्वितीयः पटलः

प्रासादस्याग्रतः कृत्वा मण्डपं च यथाविधि ।
चतुर्द्वारयुतं रम्यं वितानेन विचित्रितम् ।। १
वस्त्रेण[1]वेष्टितस्तम्भं[2] दिक्ष्वन्यालयसंयुतम्[3] ।
चतुरस्रं भगाकारं धनुर्वक्रं त्रिकोणकम् ।। २
वृत्तं षडस्रं पद्माभमष्टास्रं पूर्वतः क्रमात् ।
मध्ये च वेदिका कार्या तालमात्रोन्नता शुभा ।। ३
कृत्वैवं मण्डपं चान्यदैशान्यां तस्य कल्पयेत् ।
मण्डपं पूर्वनिर्दिष्टं संशोध्याथ वि[4]लिप्य च ।। ४
सूत्रेण दर्भदाम्ना च वेष्टयित्वा समन्ततः ।
तोरणानि चतुर्दिक्षु द्वारदेशे निखानयेत् ।। ५

3 कुण्डसंयुतम् ।

1 ण ख 2 म्भान् ख 4 थाव क

प्ल [।] क्षमौदुम्बरं चैव पैप्पलं वटसम्भवम् ।
वैदाद्यैः[1] स्थापनं तेषां ध्वजानष्टौ यथादिशम् ॥ ६
संस्थाप्य लोकपालानां नामभिस्तान्[2] समर्चयेत् ।
विन्यस्य कलशौ द्वौ द्वौ तेष्विमान् पूजयेदथ ॥ ७
वज्रदन्तं गजास्यं च भीमं च महिषास्यकम् ।
मेघनादं विरूपाक्षं वरदं सर्वभक्षणम् [कम्] ॥ ८
सम्मार्ज्य वायुना भूमिमस्त्रेणालिप्य सर्षपान् ।
शतवारं जपेन्मन्त्रं तेनैव विकिरेत्ततः ॥ ९
सम्मार्ज्य भूयोऽप्यालिप्य शक्तिरूपं च मन्डपम् ।
कल्पयित्वा तु विकिरान् मूलमन्त्रं जपेच्छतम् ॥ १०
गव्यं संसाध्य सम्प्रोक्ष्य[3] शस्त्रेण विकिरान् क्षिपेत् ।
मूलेनैवा त्रिधा तिष्ठन् धूपदीपं च विन्यसेत् ॥ ११
ताळत्रयादिकं कृत्वा कलशं पूरयेदथ ।
ऐशान्यां धान्यरत्नस्थं हेमरत्नादिसंयुतम् ॥ १२
तस्मिन् विघ्नं समाराध्य पार्श्वेऽस्त्रं करकेऽर्चयेत् ।
अभिमन्त्र्य पुनस्तेन तेनैव करकोदकैः ॥ १३
समन्तात् पातयेद्द्वारामीशाद्यन्तं प्रदक्षिणम् ।
तत्र विन्यस्य कलशं स्थापयेद्विकिरोपरि ॥ १४
उभावाराध्य वस्त्राभ्यामेकेन करकं पुनः ।
कुन्डेऽग्निं जनयेत् पश्चादङ्गबीजैर्यथाक्रमम् ॥ १५
अन्त्येनान्नप्राशनं चौळं व्रतबन्धं क्रमेण तु ।
वेद्यां स्वस्तिकमालिख्य शयनं च प्रकल्पयेत् ॥ १६
धान्यानि निक्षिपेत् तत्र अष्टद्रोणानि तण्डुलान् ।
तदर्धमानं निक्षिप्य लिखेदष्टदलाम्बुजम् ॥ १७

1 अग्निमीळे इत्याद्यैः ।
2 स्तत् क
3 अस्त्रेण ।

तदूर्ध्वं शयनं न्यस्य मूलमन्त्रेण शोभनम् ।
वरास्तरणसञ्छन्नं समभ्यर्च्य यथाविधि ।। १८
पीठस्य परितो दिक्षु कलशेष्वर्चयेदिमान् ।
गणञ्जयं च विघ्नेशमेकदंष्ट्रमतः परम् ।। १९
वीरं च गजवक्त्रं च लम्बोदरमपि क्रमात् ।। २०
वरदं सर्वभक्षं च पूर्वादिक्रमयोगतः ।
दीपानङ्कुरपात्राणि विन्यसेच्च समन्ततः ।। २१
मध्याज्याक्तांश्च रक्षोघ्नान् क्षिपेदस्त्रेण सर्वतः ।
कृत्वैवं मण्डपं भूयः पदानि परिकल्पयेत् ।। २२
कलशस्यानुरूपेण पदान्येषु विधाय च ।
व्रीहिभिः पीठिकां दर्भान् न्यस्त्वा कुम्भांश्च सादयेत् ।। २३
अस्त्रेण क्षालितान् सूत्रैर्वर्मणा परिवेष्टितान् ।
धूपितान् प्रणवेनैव सादयेत् कलशान् क्रमात् ।। २४
पूर्वादिमध्यपर्यन्तं क्रमेणैतानि पूरयेत् ।
पाद्यमर्घ्यं च गव्यं च पयोदधिकषायकम् ।। २५
मृदं कौशं जलं गन्धं[1] मध्यान्तं पूर्ववत् क्रमात् ।
शिष्टान् शुद्धोदकैस्तद्वत् प्रादक्षिण्येन विन्यसेत् ।। २६
अस्त्रेण पल्लवान्न्यस्य चक्रिकांश्च सतण्डुलान्[2] ।
वासोभिश्छादयित्वा तान् गन्धपुष्पैः समर्चयेत् ।। २७
क्षेत्रतीर्थाद्रिमातङ्गवृषशृङ्गाखुवेश्मजाम् [जाः] ।
वल्मीकवेदिसंस्थाश्च गृह्णीयान्मृत्तिकामिह [का इह] ।। २८
न्यग्रोधौदुम्बराश्वत्थवृक्षाणां मधुकस्य च ।
कपित्थस्य च बिल्वस्य कषाये त्वगुदीरिता ।। २९
मूर्तिमन्त्रैश्च परितो मूलेनाभ्यर्च्य मध्यतः ।
वासोभिश्छादयित्वा तान् मन्त्रेणाज्येन होमयेत् ।। ३०

1 गन्धजलं ।
2 काश्च सतण्डुलाः ख

मूलेनाष्टोत्तरशतं सम्पाताज्येन संस्पृशेत् ।
जलेऽधिवासितं बिम्बं मूर्ति-पैः सह मन्त्रवित् ॥ ३१
मन्त्रान् संहृत्य चोद्धृत्य[1] त्यक्त्वा वासांसि वारिभिः ।
गन्धपुष्पैश्च वासोभिरलङ्कृत्य नयेच्छनैः[2] ॥ ३२
स्नानपीठे निधायार्चां गन्धेनाज्येन लेपयेत् ।
मसूरपिष्टेनोद्वर्त्य मृद्भिस्त्वग्भिश्च वारिभिः ॥ ३३
संक्षाळ्य मन्त्रान् विन्यस्य दत्वा पाद्यादिकं क्रमात् ।
दूर्वाक्षतांश्च तारेण विन्यस्याथाभिषेचयेत् ॥ ३४
कलशैः पूर्वनिर्दिष्टमार्गेणावाहितो गुरुः ।
मूर्तिमन्त्रैश्च मूलेन ततः सम्पूजयेत् क्रमात् ॥ ३५
पुण्याहं वाचयित्वा तां शाकुनेन नयेदथ ।
द्वारदेशे प्रदायार्घ्यं मूलेन शयने न्यसेत् ॥ ३६
आचान्तः सकलीकृत्य देवो भूत्वा स्वयं गुरुः ।
अर्चागतानि तत्वानि संहृत्योत्पाद्य विन्यसेत् ॥ ३७
चैतन्यं योजयेत् तत्र ज्योतीरूपं च सर्वगम् ।
सकलीकृत्य मूलाङ्गैर्मुद्राः सन्दर्श्य पूजयेत् ॥ ३८
अङ्गैर्मूर्ति-भिराशेषैर्वज्राद्यैश्च समन्वितम् ।
भक्त्या सम्पूज्य विधिवद्बहुभक्ष्यसमन्वितम् ॥ ३९
भूर्यन्नं घृतसंयुक्तं निवेद्य विधिपूर्वकम् ।
बलिं च परतो दद्याद्भूतेभ्योऽष्टदिशास्वथ ॥ ४०
जनिताग्निं विहृत्यैषु कुण्डेष्वाधाय मूर्तिपाः ।
कृत्वा चाग्निमुखं पक्वं गायत्र्या जुहुयुः क्रमात् ॥ ४१
षण्मन्त्रैः सर्पिषा हुत्वा मूर्ति-भिः समिदादिकम् ।
पलाशखदिराश्वत्थशमीनां[3] समिधः क्रमात् ।
कोणेषु बिल्वजा प्रोक्ता आचार्यस्य तु बिल्वजाः ॥ ४२

---

1 संहृत्योत्पाद्य चोद्धृत्य क 2 च्च तैः ख 3 शमीका: ख

समिदाज्यचरून् लाजान् पृथुकापि च [नपि] लड्डुकान् ।
अपूपान् शष्कुलीनाज्यमष्टोत्तरशतं पृथक् ॥ ४३
आचार्यो मूलमन्त्रेण[1] हुत्वा सम्पातसर्पिषा ।
मूलेन संस्पृशेद्देवं द्रव्यहोमे कृते कृते ॥ ४४
मधुसर्पि पयोभिश्च गणानान्त्वेत्यृचा शतम् ।
सर्वकुण्डेषु जुहुयुः शान्तिहोमं समाप्य च ॥ ४५
दद्याच्च दक्षिणां तेभ्यो जपेयुरभितो द्विजाः ।
स्पृशन्तश्चतुरो वेदान् गुरुमूर्तिधरैः सह ॥ ४६
नपुंसकशिलां पीठं संशोध्याराध्य यत्नतः ।
आच्छाद्य वसनैर्दर्भैः कुर्यात् ताळत्रयादिकम् ॥ ४७
ततो नृत्तं च वाद्यं च विविधं कारयेद्बहिः ।
निशां जागरतो नीत्वा स्नात्वा जप्य यथाविधि ॥ ४८
सम्मार्ज्यालिप्य सम्प्रोक्ष्य गन्धैर्गन्धोदकैरपि ।
रत्ननन्यासं ततः कुर्याद्विधिदृष्टेन वर्त्मना ॥ ४९
नपुंसकशिलां तत्र न्यस्त्वा तस्यां ततोपरि ।
अष्टोत्तरशतं हुत्वा विघ्नगायत्रिया घृतम् ॥ ५०
पुण्याहं वाचयित्वाऽत्र रत्ननन्यासं समाचरेत् ।
रत्नान् बीजांश्च धातूंश्च लोहांश्च[2] क्रमशो न्यसेत् ॥ ५१
तारेणोद्धृत्य मूलेन मध्यान्तं पूर्वतः क्रमात् ।
वज्रमौक्तिकवैडूर्यशङ्खस्फटिकपुष्यकान् ॥ ५२
चन्द्रकान्तं च नीलं च ब्रह्मरागं च मध्यतः ।
यवान् व्रीहींश्च निष्पावान् प्रियङ्गुतिलमाषकान् ॥ ५३
नीवारान् दिक्षु शालींश्च सिद्धार्थं मध्यतो न्यसेत्[3] ।

---

1 मूर्तिपाः– गं गणञ्जयायेत्यादि परिवारमन्त्रैः पूर्वादिकुण्डेषु ।

3 धातवो नोक्ताः– मनःशिलां हरीतालमञ्जनं श्यामसीसके ।
सौराष्ट्रीं रोचनां चैव गैरिकं पारदं क्रमात् ॥

---

2 लोहं च क

सुवर्णं रजतं ताम्रमायसं त्रपुकं क्रमात् ॥ ५४
हा [आ] रकूटमुपित्थौ[1] च कांस्यं दिक्ष्वथ विन्यसेत् ।
पद्मरागं [चाषौ] च कूर्मं च गजशृङ्गं हिरण्मयम् ॥ ५५
मध्ये विन्यस्य सम्पातं निषिच्याच्छाद्य वाससा ।
रक्षां च विधिवत् कृत्वा गर्भागाराद्बहिर्व्रजेत् ॥ ५६
मुहूर्ते शोभने प्राप्ते सम्पूज्य प्रतिमां ततः ।
नीत्वा द्वारसमीपेऽर्घ्यं प्रदाय च[2] प्रवेशयेत् ॥ ५७
न्यस्त्वा गर्भसमीपे तां[3] तत्वं विन्यस्य सादरम् ।
आवाह्य सकलीकृत्य ध्यात्वा मन्त्रमयं प्रभुम् ॥ ५८
मूलमन्त्रेण संस्थाप्य देवोऽहं चिन्तयेद्गुरुः ।
सान्निध्यं प्रार्थयित्वा तु निरुध्य प्रणवेन तम् ॥ ५९
मन्त्रन्यासं ततः कृत्वा समभ्यर्च्य यथाविधि ।
आच्छाद्य वाससोयुग्मेन गत्वा द्वारं पिधाय च ॥ ६०
स्थापयेत्परिवारांश्च द्वाःस्थादीन् परितः क्रमात् ।
विघ्नपारिषदान् सर्वान् बलिपीठे प्रकल्प्य तु ॥ ६१
आचम्यान्तः प्रविश्याथ मूलमन्त्रं शतं जपेत् ।
स्तुत्वा स्तोत्रैश्च विविधैर्निर्गत्य प्रणमेत् ततः ॥ ६२
सार्ववर्णिकमन्नाद्यं कुर्याद्दीनप्रमोदनम् ।
पूजयेद्बहुभक्ष्यैश्च पृथुकापूपलड्डुकैः । ६३
फलैर्नानाविधैस्तत्र ततो माणवकानपि ।
रात्रौ बलिप्रदानं च कुर्याद्भूतप्रहर्षणम् ॥ ६४
नीत्वा त्रिवारमेकं तु [त्रिदिनमेवं तु] चतुर्थेऽह्नि यथाविधि ।
स्नपनं कारयेद्भूयो देवस्य गुरुरादरात् ॥ ६५
अष्टोत्तरशतैः कुम्भैरेकाशीतिभिरेव वा ।

---

1 पित्तलं

2 याथ क 3 तत् क

एकोनपञ्चदशकैरथवा स्नापयेत् तदा ।। ६६
पञ्चविंशतिभिर्वाऽत्र स्वशक्त्या स्नापयेद्विभुम् ।
सम्भूष्य मण्टपं सम्यक् पूर्वोक्तविधिना तदा ।। ६७
मार्जयित्वा विलिप्याथ पुनर्गन्धोदकेन च ।
अग्निं संस्कृत्य विधिवत् पदानि परिकल्पयेत् ।। ६८
व्रीहिभिः पीठिकास्तेषु कृत्वा दर्भान्निधाय च ।
कलशान् क्षालितान् सूत्रवेष्टितान् धूपितान् शुभान् ।। ६९
सादयेत् प्रणवेनैव पूरणोक्तक्रमेण तु ।
दर्भान् विन्यस्य सम्प्रोक्ष्य गन्धोदैरक्षतैः किरेत् ।। ७०
उत्तानीकृत्य चोद्धृत्य विन्यस्य प्रणवेन तु ।
सम्प्रोक्ष्य कूर्चान् विन्यस्य द्रव्याण्येषु प्रपूरयेत् ।। ७१
पञ्चगव्यं क्रमादिक्षु मध्यकुम्भेषु पूरयेत् ।
मध्ये पीठं समाराध्य धान्यकूर्चस्थितं क्रमात् ।। ७२
तारेण विन्यसेत् तस्मिन् सौवर्णं[1] कलशं शुभम् ।
राजतं वाऽथवा ताम्रं दर्भानुपरि विन्यसेत् ।। ७३
कुम्भसंस्कारमुक्तेन विधाया [विधिना] थ प्रपूरयेत् ।
पद्मरागं च वैडूर्यमिन्द्रनीलं च गारुडम् ।। ७४
पुष्यकं ब्रह्मरागं च वज्रं वैडूर्यमेव च ।
सूर्यकान्तेन्दु[2]कान्तौ चायस्कातं प्रवाळकम् ।। ७५
निक्षिप्यैतानि मध्येऽथ[3] गन्धाद्भिर्मूलमन्त्रतः ।
सम्पूर्य पूजयेत्तस्मिन् साङ्गं सावरणं क्रमात् ।। ७६
पाद्यार्घ्याचमनं क्षीरं दधिसर्पि-र्मधूनि च ।
पञ्चगव्यं दिग्विदिक्षु कलशेषु प्रपूरयेत् ।। ७७
फलभक्ष्ययवव्रीहितिलरत्नानि काञ्चनम् ।
विद्रुमं दिक्षु कोणेषु पूरयेत् सुसमाहितः ।। ७८

---

1 सुवर्ण ख 2 कान्तचन्द्र ख 3 तु क

एभिः सप्तदशद्रव्यैः स्नानं कुर्याद्यथाविधि ।
गुळादिद्रव्यसंयुक्तैः पञ्चविंशद्भि[1]रेव वा ॥ ७९
गुळप्रसूनदूर्वाग्र[2]धातुमृत्कुशमौक्तिकान् ।
नालिकेरपयश्चैतत् पञ्चविंशतिरत्र तु ॥ ८०
द्रव्याणां देवता वक्ष्ये मध्यादीनां क्रमेण तु ।
गणेशो[3] मध्यमश्चाथ पितरश्च सरस्वती ॥ ८१
स्वाहा सोमश्च रुद्रश्च वह्निः स्कन्दस्तथैव च ।
सावित्री च गणेशश्च गजास्यः पवनस्तथा ॥ ८२
विश्वेदेवा यमश्चैव धनदः पद्मसम्भवः[4] ।
रविर्दुर्गा हरिर्लक्ष्मीर्मुनयः सप्त भूरपि ॥ ८३
वह्निर्जलेशः सोमश्च देवताः परिकीर्तिताः ।
वस्त्रस्रक्पल्लवैस्तद्वच्चक्रिकाभिश्च वेष्टयेत् ॥ ८४
कृत्वेमं मेति मन्त्रेण कलशान् पूजयेदथ ।
दिक्षु होमांश्च विधिवत् कुर्युर्मूर्तिधराः क्रमात् ॥ ८५
जनितार्ग्नि च निक्षिप्य कृत्वा चाग्निमुखं ततः ।
विघ्नगायत्रिया पवित्रं षण्मन्त्रैर्जुहुयुर्घृतम् ॥ ८६
पूर्ववद्धोममुद्दिष्टं [म उद्दिष्टः] शान्तिहोमोऽत्र नेष्यते[5] ।
होमान् समाप्य सम्पातं कलशेषु निषिच्य च ॥ ८७
पूजयित्वा जपेत् पश्चात् कलशान् क्रमशो गुरुः ।
अन्तः प्रविश्य देवस्य निर्माल्यमपकृष्य च ॥ ८८
प्रक्षाळ्य वारिभिर्बिम्बं पीठं चाभ्यर्च्य पीठिकाः ।
तत्त्वानि न्यस्य विघ्नेशं सकलीकृत्य सादरम् ॥ ८९
पाद्यमर्घ्यं ततो दत्वा कौतुकं छेदयेत् ततः ।
आचामं मधुपर्कं च दत्वा दूर्वाक्षतान् क्षिपेत् ॥ ९०

---

3 मध्यकुम्भः । 4 ब्रह्मा । 5 नास्तीत्यर्थः ।

---

1 विंशतिभि ख 2 दूर्वाम्बु ख

तारेण मूर्ध्नि पदयोर्नीराज्याथाभिषेचयेत् ।
सावशेषमवस्नाप्य पात्रेऽन्यस्मिन् शुभे गुरुः ॥ ९१
खण्डशः पूरयित्वाऽथ नीराज्यैवाभिषेचयेत् ।
स्नानमन्त्रानतो वक्ष्ये तैर्देवं स्नापयेत् क्रमात् ॥ ९२
इदं विष्णुरिति पाद्यमापोहिष्ठेत्यतः परम् ।
आपः पुनन्त्वित्याचाममाप्यायस्वेति वै पयः ॥ ९३
दधिक्राव्णश्च सावित्री मधुवाता ऋताय ते ।
अग्निमीळे पञ्चगव्यं मानस्तोके फलोदकम् ॥ ९४
गणेशमूलं च परं यवाग्भस्त्वोषधेति च [धीरिति] ।
आशुः शिशानः पितरो हिरण्यवर्णास्तथैव च ॥ ९५
ब्रह्मजज्ञानं रक्षोहणं गौळमग्ने त्वमेव च ।
पुष्पावतीति शंनोदेवी देवस्यत्वोद्धृतासि च ॥ ९६
अग्न आयाहि वै कौशं समुद्रज्येष्ठेति मौक्तिकम् ।
याः फलिनीरिति परं गणानान्त्वेति मध्यमम् ॥ ९७
द्रव्यैर्वा सप्तदशभिस्तु [र्गु] ळादि परिवर्जि-तैः ।
केवलैः सप्तदशभिः पञ्चविंशद्भिरेव वा ॥ ९८
एकोनार्धशतैर्वाऽथ[1] एकाशीतिभिरेव वा ।
अष्टोत्तरशतैर्वाऽथ स्नापयेद्भक्तिसंयुतः[2] ॥ ९९
कृत्वैवं विधिवत् स्नानं ततो नित्यं समर्चयेत् ।
दिशाहोमांश्च शैवोक्तमार्गेणेह समाचरेत् ॥ १००
मन्त्रोद्धारं ततः पूजां निष्कृतिं चोत्सवं तथा ।
वक्ष्ये समासतः शास्त्रनिर्दिष्टेनैव वर्त्मना ॥ १०१

इति क्रियासारे (द्विपञ्चाशः) वंद्ये द्वितीयः पटलः

---

1 र्वाऽपि क 2 युतं क

तृतीयः पटलः

मन्त्रोद्धारं ततो वक्ष्ये मन्त्रमूलाः क्रिया यतः ।
वर्णं द्वितीयं[1] वर्गस्य तृतीयं[2] बिन्दुसंयुतम् ।। १
चतुर्दशस्वरोपेत[3]मुद्धरेत् प्रणवादिकम् ।
मूलमंन्त्रमिदं प्रोक्तमङ्गं दीर्घस्वरान्वितम् ।। २
नामजातिसमायुक्तं मूर्तीनां[4] विन्दुसंयुतम् ।
बीजयुक्तमतो वक्ष्ये गायत्रीं षण्मनूनपि ।। ३
नामजातिसमायुक्तं [नेत्रपञ्चादशान्वितम् ।
ओजस्वराणि बीजानि] मूर्तीनां बिन्दुसंयुतम् ।। ४
विनायकाय चोद्धृत्य विद्महे पदमुद्धरेत् ।
गजवक्त्राय भूयश्च धीमहे पदमेव च । ५
तन्नो विघ्नपदं पश्चात् प्रचोदयादतः परम् ।
तारपूर्वेयमुद्दिष्टा गायत्रीयं सनातनी ।। ६
विघ्नं विनायकं वीरं शूरं वरदमेव च ।
हस्तिमुखं चतुर्दन्तं ताराद्या नमसाऽन्विताः ।। ७
षण्मन्त्राः स्वाहया युक्ता होमे नैवेद्यकर्मणि ।
अर्चनाया विधिं वक्ष्ये गणेशस्य समासतः ।। ८
स्नात्वा च विधिनाऽऽचम्य द्वाःस्थावाराध्य संविशेत् ।
अस्त्रेण करशुद्धिं तु कृत्वा ताळत्रयादिकम् ।। ९
तेन कृत्वा समासीनः प्राणायामत्रयं चरेत् ।
धारणा धारयेत् पश्चाद्वाय्वग्न्यमृतबीजकैः ।। १०
मूलेन व्यापकं पाण्योर्न्यस्याङ्गुष्ठादितः क्रमात् ।
तलान्तं हृदयादीनि न्यसेदङ्गानि साधकः ।। ११
मूलेन व्यापकं देहे न्यस्याङ्गानि न्यसेदथ ।

---

1 आं । 2 ग 3 औ, तथा च गां वा ? गौं वा मूलं ।
4 गणञ्जयादीनां ।

ध्यात्वा मुद्राश्च सन्दर्श्य जपेदष्टावरं पुनः ।। १२
अस्त्रेण क्षाळयेत् पात्रं पूरयित्वा शुभैर्जलैः ।
आत्मानमर्चनां[1] भूमिं पात्राणि कुसुमानि च ।। १३
अथात्मानमलङ्कृत्य योगपीठं प्रकल्पयेत् ।
आधारशक्तिं चानन्तं मध्ये धर्मादिकान् न्यसेत्[2] ।। १४
आग्नेय्यादिषु कोणेषु दिक्ष्वधर्मादिकान् क्रमात्[3] ।
धर्मं ज्ञानं च वैराग्यमैश्वर्यं च यथाक्रमम् ।। १५
अधर्मादीनि गात्राणि त्रिगुणांस्तन्तुरूपिणः ।
मायाबिंधे ततः पद्मं शक्तयः केसरेषु च ।। १६
तीव्रा च ज्वालिनी नन्दा भोगदा कामरूपिणी ।
उग्रा तेजोवती सत्या नवमी विघ्ननाशिनी[4] ।। १७
एवं सम्पूज्य पीठं तु मूलेनावाह्य विन्यसेत् ।
सकलीकृत्य तं ध्यात्वा मुद्राः सन्दर्श्य पूजयेत् ।। १८
पाद्यार्घैर्मूल मन्त्रेण सम्पूज्याङ्गादिकान् यजेत् ।
अग्नीशरक्षो वायव्यो दिक्ष्वस्त्रं मूर्तयः क्रमात् ।। १९
गणञ्जयं च विघ्नेशमेकदंष्ट्रमतः परम् ।
वीरं च गजवक्त्रं च लम्बोदरमपि क्रमात् ।। २०
दिक्पालांश्च तदस्त्राणि शार्वे कुम्भोदरं यजेत् ।
गन्धैः पुष्पैर्धूपदीपनैवेद्यैश्च मनोरमैः ।
इष्ट्वा च मूलमन्त्रेण परिवारान् स्वनामभिः ।। २१
पाद्यार्घैर्मूलमन्त्रेण परिवारान् स्वनामभिः ।
अग्नौ हुत्वाऽखिलैर्मन्त्रैर्मूलेनावृत्य होमयेत् ।। २२
अङ्गैर्दशांशं जुहुयादन्यैरेकैकशः क्रमात् ।
शेषान्नेन बलिं दत्वा निवेद्यं च विसर्जयेत् ।। २३
तोयमाचमनं दत्वा गन्धादिभिरथार्चयेत् ।

---

1 अर्चना क 2 यजेत् क 3 गात्रकान् क 4 सर्वसिद्धिदा क

जप्त्वा स्तुत्वा प्रदायार्घ्यमुद्वास्य हृदये न्यसेत्[1] ॥ २४
एवं सम्पूजयेद्विघ्नं भक्तियुक्तः समाहितः ।
तस्य विघ्नप्रसादेन सिध्यन्तेऽखिलसिद्धयः ॥ २५

इति क्रियासारे (त्रिपञ्चाशः) वैघ्ने तृतीयः पटलः

चतुर्थः पटलः

दिव्यन्तरिक्षभौमानि निमित्तानि भवेद्यदि ।
प्रायश्चित्तं प्रकुर्वीत सर्वदोषविनाशनम् ॥ १
खण्डेन्दुसदृशं कुण्डं कुर्याद्गेहस्य दक्षिणे ।
स्थानशुद्धिं पुरा कृत्वा बिम्ब[2]शुद्धिं तु युक्तितः ॥ २
कुण्डेऽग्निसंस्कृतिं कृत्वा कुर्यादग्निमुखं ततः ।
विघ्नगायत्र्या [त्रिया] पक्वं षण्मन्त्रैर्जुहुयाद्घृतम् ॥ ३
अष्टोत्तरशतं भूयः समिदादीनि होमयेत् ।
पूर्णाहुतिं तु सर्वत्र मूलेनैव ददेत् पृथक् ॥ ४
बैल्वास्तु समिधः प्रोक्ता हुनेदष्टशतं पृथक् ।
समिदाज्यचरून् लाजान् पृथुकापूपलड्डुकान् ॥ ५
क्रमाद्वै शष्कुलीनाज्यं व्याहृतीभिरतः परम् ।
पृथक्पृथक् समस्याभि[3]राज्यमष्टशतं पृथक् ॥ ६
दधि क्षीरं मधु घृतं गणानान्वेत्यृचा गुळम् ।
मूलेनाष्टोत्तरशतं गव्यं[4] होमं समाचरेत् ॥ ७
सम्पातं कलशे सिक्त्वा हुतमन्त्रांस्ततो जपेत् ।
तेनाभिषिच्य विघ्नेशं पूजयेद्विधिना गुरुः ॥ ८
गुरवे दक्षिणां दद्यादन्नाद्यं सार्वकामिकम् ।

3 व्यस्तसमस्तव्याहृतिभिः । 4 आज्यं, पञ्चगव्यमित्येके ।

1 र्घ्यंयेत् ख 2 भूत ख

स्नपनं शक्तितः कुर्यादुत्सवं च स्वशक्तितः ।। ९

इति क्रियासारे (चतुःपञ्चाशः) वैघ्ने चतुर्थः पटलः

पञ्चमः पटलः

अथोत्सवविधिं वक्ष्ये गणनाथस्य भूतिदम् ।
प्रत्यब्दं नियतं कुर्यात् पञ्चाहादि स्वशक्तितः ।। १
बीजाङ्कुरार्पणं कृत्वा मूलेनाग्रे ध्वजं पुनः ।
चाषयुक्तं च संस्थाप्य भूयोऽष्टौ परितः क्रमात् ।। २
तोरणानि ध्वजांस्तत्र बलिपीठं समन्ततः ।
कृत्वा सम्मार्ज्य वीथीश्च गोमयेन विलिप्य ताम् ।। ३
गन्धोदैः प्रोक्ष्य पुष्पैश्च विकिरेच्च समन्ततः ।
प्राकारान्तर्बहिस्तद्वद्विकीर्य कुसुमाक्षतैः ।। ४
त्रिसन्ध्यं पूजयेद्देवं द्रव्याढ्यं भक्तिसंयुतः ।
समस्तवाद्यैः संयुक्तं नृत्तगीतसमन्वितम् ।। ५
त्रिसन्ध्यं[1] च बलिं दद्यादुत्सवं च विशेषतः ।
बहुवाद्यसमायुक्तं भूतकूरसमन्वितम् ।। ६
पाद्यादिभिः समाराध्य तत्र तत्र समाहितः ।
मण्डलेषु बलिं दद्याद्बलिमुद्रां च दर्शयेत् ।। ७
कौतुके देवमाराध्य शिष्यमूर्ध्नि निधाय तम् ।
वज्रदन्तं गजास्यं च द्वाःस्थौ तत्र बहिर्मुखौ ।। ८
ताभ्यां तत्र बलिं दत्वा महाचाषाय मण्टपे ।
तत्र तत्र ददेद्भूयः पार्षद्भ्यः पार्श्वमण्डले ।। ९
दक्षिणद्वारि वै दद्याद्विघ्नेशाय शिवाय च ।
दिक्पान् मातृश्च शास्तारं दुर्गां स्कन्दं समर्च्य च ।। १०

1 सन्ध्यां क

कुम्भोदरमदित्यां तु पूजयित्वा बलिं हरेत् ।
गोपुरद्वारि सम्पूज्य दक्षिणे चण्डविक्रमम् ।। ११
वामे विघ्नकरं ताभ्यां बलिं दत्वा बहिर्व्रजेत् ।
गणेश्वरान् समाराध्य दिक्षु तेषां बलिं हरेत् ।। १२
वज्रदन्तं गजास्यं च भीमं च महिषास्यकम् ।
मेघनादं विरूपाक्षं वरदं सर्वभक्षकम्[1] ।। १३
दिक्षु तेषां बलिं दत्वा बलिपीठे बलिं हरेत् ।
गजवक्त्रगणेशौ च विनायकमथापरम् ।। १४
चण्डविक्रमकं विघ्नकरं [वै] सर्पमेखलम् ।
शूर्पकर्णं ततो नागदन्तिनं रुद्रवक्त्रजम् ।। १५
नवमेनाध[2] ऊर्ध्वे च सम्पूज्य च बलिं हरेत् ।
ओं नमो विघ्नपार्षदेभ्य इति शेषं[3] समापयेत् ।। १६
एष नित्यबलि: प्रोक्तो वक्ष्यतेऽप्युत्सवेऽधिकम् ।
पार्षदेभ्यश्च सर्वत्र ग्रहाणामपि दापयेत् ।। १७
उत्सवार्थं गता ये च ते तु विघ्नप्रहर्षणाः ।
ओं नमो विघ्नपार्षदेभ्य[4] ओं नमो नमः स्वाहा ।। १८
सर्वेभ्यो विघ्नपार्षदेभ्य इति सर्वत्र दापयेत् ।
एवं दत्वा त्रिरावृत्त्या[5] बलिशेषं समापयेत् ।। १९
यात्रापूर्वदिने रात्रौ दद्याच्चैव महाबलिम् ।
मूल[6]बिम्बे समाराध्य शय्यामाराध्य मण्टपे ।
अतः [अन्तः][7] प्रवेशयेद्भूयो घृतारोपणपूर्वकम् ।। २०
आवाह्य कौतुके देवं मण्टपे शाययेद्बहिः ।
प्रभातेऽभ्यर्च्य देवेशं चूर्णैरुन्मृज्य सादरम् ।। २१
बिम्बं संशोध्य यात्रार्थं देवमावाह्य पूजयेत् ।

---

1 भक्षणम् ख 2 नाथ ख 3 बलिशेषं क
4 दीभ्य क 5 वृत्त्य ख 6 बलि ख 7 प्रातः ख

यात्राहोमं ततः कृत्वा प्रार्थयेन्मनुनाऽमुना ॥ २२
तीर्थाभिगमनाद्यावद्देवाभिगमनं विभो ।
तावत् त्वं कौतुकमिममधिष्ठाय प्रसीद नः ॥ २३
द्वारि मङ्गलवादं च सङ्कीर्त्याथ बहिर्व्रजेत् ।
महाचाषं गजं ध्यात्वा प्रोक्ष्यारुह्य प्रदक्षिणम् ॥ २४
कृत्वा जलाशयं गच्छेत् तं विघ्नं स्थण्डिले न्यसेत् ।
तीर्थमावाह्य मूलेन तेनैव स्नापयेत् त्रिधा ॥ २५
अर्घ्यं पाद्य तथाऽऽचामं दत्वा मूलेन वै जले[1] ।
उत्तीर्य वेद्यां न्यस्याथ पाद्यमाचमनं ददेत् ॥ २६
आपेहिष्ठादिभिः प्रोक्ष्य विघ्नगायत्रिया पुनः ।
षण्मन्त्रैः..... ? कुशैः सम्प्रोक्षयेत् ततः ॥ २७
महाजनैः सह स्नायात् तं गृहीत्वा त्रिरम्भसि ।
पुनर्वेद्यां निवेश्याथ गणेशं पूजयेत् ततः ॥ २८
पायसं तु निवेद्याथ षण्मन्त्रैर्होमयेत् ततः ।
पूर्ववद्गजमारुह्य गच्छेद्द्रुततरं गृहम् ॥ २९
मूलबिम्बे समर्च्यैनं पूजयित्वा यथाविधि ।
रात्रौ भूतबलिं कुर्यात् तत्र भूतप्रहर्षणम् ॥ ३०
श्वोभूते स्नपनं कुर्यादुत्तमादि स्वशक्तितः ।
विघ्नेशस्योत्सवं भक्त्या[2] कारयेद्यः प्रयत्नवान् ॥ ३१
भवन्ति तस्येप्सितानि रुद्रलोके महीयते ॥ ३२

इति क्रियासारे (पञ्चपञ्चाशः) वंघने पञ्चमः पटलः

1 जलैः क 2 शक्त्या क

शास्तृभागः

प्रथमः पटलः

स्थापनं भूतनाथस्य समासाद्वक्ष्यतेऽधुना ।
सर्वसिद्धिकरं पुण्यं सर्वोपद्रवनाशनम् ॥ १
यः पूजयेन्नरो भक्त्या शास्तारं मनसाऽपि वा ।
सर्वे कामाश्च सिद्ध्यन्ति किं पुनः करणे नृणाम् ॥ २
तस्मात् सर्वप्रयत्नेन शास्तारं नित्यमर्चयेत् ।
स्थापनं तस्य यः कुर्यात् कारयेद्वा प्रयत्नतः ॥ ३
तस्य यद्वाञ्छितं सर्वं सिद्ध्यतीह परत्र च ।
जन्मोत्कृष्टकुले भूयो रुद्रत्वं च स गच्छति ॥ ४
तस्माच्छक्तैः प्रयत्नेन कार्यमेतन्मनीषिभिः ।
तस्य संक्षेपतो वक्ष्ये विधानं शास्त्रचोदितम् ॥ ५
सर्वागमेषु निर्दिष्टं सर्वं सङ्गृह्य लक्षणम् ।
ग्रामे वा नगरे वाऽपि पुरे वा पत्तनेऽपि वा ॥ ६
ग्रामदेवालये वाऽपि आरामे वा मनोरमे ।
प्रासादं कारयेत्[1] तत्र वृत्तं वा चतुरश्रकम् ॥ ७
चतुरश्रायतं वाऽपि वृत्तायतमथापि वा ।
प्रासादस्यानुरूपेण प्रतिमां कारयेत् ततः ॥ ८
नवतालप्रमाणेन सर्वावयवसुन्दरम् ।
एवमापाद्य सकलं प्रतिष्ठां तत आरभेत् ॥ ९
अष्टमेऽहनि वा षष्ठे प्रतिष्ठायाः शुभेऽहनि ।
मङ्गलाङ्कुरारोपं च कुर्यान्मूलेन देशिकः ॥ १०
गन्धपुष्पनिशायुक्तजलैर्गायत्रिया गुरुः ।
सिञ्चेत् त्रिसन्ध्यं सम्पूज्य रात्रौ नित्यं बलिं हरेत् ॥ ११

---

1 अनुक्तं शैवात् ग्राह्यम् ।

[न्यस्तमन्त्रतनुर्भूत्वा गुरुस्तारेण पादयोः ।
प्रभासत्यकसंयुक्तमथ शास्तारमेव वा ।। १२
लिङ्गानि[1] लक्षणोपेतान्यथ चैवं समाहरेत्][2] ।
आदाय क्षाळयेत् तोयैर्दर्भैः पुष्पाक्षतैरपि ।। १३
मृद्भिस्त्वग्भिश्च गव्येन[3] शोधयित्वाऽस्त्रमन्त्रतः ।
शालिपिष्टैश्च सम्पूज्य संस्नाप्य सलिलैः शुभैः ।। १४
गन्धपुष्पैरलङ्कृत्य नेत्रोद्घाटनमाचरेत् ।
पात्रे तु तैजसे[4] कृत्वा घृत मधुसमन्वितम् ।। १५
मूलेन मन्त्रयित्वा तु हेमसूच्या लिखेद्दृशौ ।
त्रिभागं[5] दीप्तमन्त्रेण[6] मध्ये वृत्तं समं यथा ।। १६
प्रोक्ष्य गां दर्शयित्वाऽर्चां मधुनाऽऽज्येन लेपयेत् ।
वस्त्रैर्दर्भैश्च संवेष्ट्य शाकुनेन नयेज्जलम् ।। १७
भेरीपटहताळाद्यैः क्ष्वेळितास्फोटितैरपि ।
दिशो बधिरयन् गत्वा तत्र तां विन्यसेच्छनैः ।। १८
शोधयित्वा जलं तस्मिन् योग[7]पीठं प्रकल्पयेत् ।
संहृत्याग्निमयं ध्यात्वा बिम्बं वा लिङ्गमेव वा ।। १९
बहूनि चेन्निधायास्मिंस्तानि रक्षां विधाय च ।
वस्तव्यं जलवासं तु प्रासादं शोधयेत् ततः ।। २०
शिल्पिकर्मसमाप्तौ च तद्विधौ बलिमेव च ।
मुक्तमात्रं तु तैर्गेहं गृहीत्वाऽऽलिप्य सर्वतः ।। २१
सर्पपानस्त्रसङ्घातान् विकीर्याथ प्रमार्जयेत् ।
क्षाळयित्वा विलिप्याथ गन्धतोयैर्वि-लेपयेत् ।। २२
धूपं दीपं च विन्यस्य धान्यानि प्रविकीर्य च ।

---

1 त्रीणि, प्रभादित्रयार्थं । 3 पञ्चगव्येन । 4 सौवर्णे ।
6 अस्त्रेणेति युक्तम् ।

---

2 कंसाङ्कितो भागः ख पुस्तके नास्ति । 5 ग क 7 याग ख

पूर्णकुम्भं निधायास्मिन्नस्त्रमाराध्य वै यजेत् ॥ २३
राक्षोघ्नसूत्रमस्त्रं च कुर्यात् ताळत्रयादिकम् ।
गत्वा ततो बहिर्वह्निदिग्भागे होममाचरेत् ॥ २४
राक्षोघ्नं वह्निमादीप्य सर्वतोक्तेन वर्त्मना ।
द्रव्यहोमे त्वयं भेदो मन्त्रेणानेन होमयेत् ॥ २५
ओं ज्वलघृणि हुं फट् स्वाहा ।
वास्तुहोमेऽपि गायत्री द्रव्यहोमाय[1] कीर्तिता ॥ २६
शस्त्रमन्त्रेण वा कुर्यान्नान्यो भेद इहोदितः ।
मण्टपं पुरतः कृत्वा संस्कुर्यात् तं यथाविधि ॥ २७
अलङ्कृत्य वितानाद्यैस्तम्भान् संवेष्टय सर्वतः ।
सूत्रेण दर्भदाम्ना च वेष्टयित्वा समन्ततः ॥ २८
तोरणानि चतुर्दिक्षु स्थापयेच्च ध्वजानपि ।
प्लाक्षमौदुम्बरं चैव वटजं पिप्पलोद्भवम् ॥ २९
वेदाद्यैः स्थापयित्वैषु आर्यादींश्चतुरो यजेत् ।
तदन्तरे ध्वजाश्चाष्टौ दिक्ष्वष्टासु यथाक्रमम् ॥ ३०
वीरबाहुं महावीरं विद्युद्दन्तं विलासिनम् ।
तीक्ष्णं च तीक्ष्णदंष्ट्रं च ताराक्षं च भवोद्भवम् ॥ ३१
दर्भैः पलाशशाखाभिर्मार्जयेद्वायुविद्यया ।
आग्नेय्यां दिशि[2] [य्या ईश] पर्यन्तं गायत्र्या लेपयेत् पुनः ॥ ३२
राक्षोघ्नानस्त्रसञ्जप्तान् क्षिप्त्वा सम्मार्जयेदथ ।
विलिप्य विकिरान् मूलं जप्त्वा गव्यं तु साधयेत् ॥ ३३
सम्प्रोक्ष्य तेन विकिरांस्तिष्ठन्मूलेन वै त्रिधा ।
क्षिप्त्वा सम्मार्ज्य गन्धोदैः प्रोक्ष्य चापः पुनस्त्रिति ॥ ३४
इषेत्वेति किरेद्दर्भैः प्रसूनैरक्षतैरपि ।

---

1 चतुर्द्रव्यहोमार्थं ।

2 य्यादिषु ख

(कुम्भेशं पूरयेदीशे तत्पार्श्वे वर्धनीं पुनः ॥ ३५
कुम्भे शास्तारमाराध्य वर्धन्यां क्षुरिकां यजेत् ।
अष्टोत्तरशतं जप्त्वा तां तया भ्रामयेदथ)[1] ॥ ३६
अच्छिन्नधारया सिञ्चन्नीशाद्यन्तं[2] प्रदक्षिणम् ।
कलशं पृष्ठतो नीत्वा स्थापयेद्विकिरोपरि ॥ ३७
आराध्याच्छाद्य वस्त्राभ्यामेकेन करकं ततः ।
अग्निं सञ्जनयेत् पश्चात् स्वकुण्डे वाऽथ पश्चिमे ॥ ३८
षण्मन्त्रैर्मूलमन्त्रेण प्रणवेना[3]थवा[4] क्रमात् ।
मूलार्णैर्व्रतबन्धान्तं गर्भाधानादिकाः क्रियाः ॥ ३९
कुर्याद्गायत्रिया पूर्णां दत्वा द्रव्यान्तरे क्रमात् ।
पूर्वादिदिक्षु कुण्डानि कल्पयेदुज्वलानि तु ॥ ४०
चतुरस्रं भगाकारं धनुर्वक्रं त्रिकोणकम् ।
वृत्तं षडस्रं पद्माभमष्टकोणं तु शाङ्करे ॥ ४१
मध्ये स्वस्तिकमालिख्य व्रीहीन्निक्षिप्य चास्तरेत् ।
वस्त्राणि तण्डुलान् क्षिप्त्वा पद्ममष्टदलं लिखेत् ॥ ४२
आस्तरेच्छयनं तत्र मूलमन्त्रेण देशिकः ।
शिरोपधानसंयुक्तं पादगण्डुकशोभितम् ॥ ४३
दुकूलवस्त्रसञ्छन्नमर्चितं गन्धपुष्पकैः ।
कृत्वैवं कलशान् भूयः पूरयेदितरत्र तु ॥ ४४
मृज्जलं त्वग्रसं गव्यं पञ्चकं[5] पञ्चगव्यकम्[6] ।
गन्धोदं शिष्टकुम्भेषु शिष्टाम्भः [शुद्धाम्भः] पूरयेत् क्रमात् ॥ ४५
मूलेन पूरयित्वा तान् गन्धपुष्पादिभिः शुभैः ।
कृत्वैवं वारिणो मध्यान्मन्त्रान् संहृत्य चोद्धरेत् ॥ ४६

---

3 रेवन्ताद्यैर्मूलेन प्रणवेन च क्रमाद्वष्टौ क्रियाः । 4 अथवाऽष्ट-भिर्मूलाक्षरैः क्रमाद्वष्टक्रियाः । 5 गोमूत्रादि पञ्च । 6 समस्तं ।

---

1 कंसाद्धितो भागः ख पुस्तके नास्ति । 2 सिञ्चेद्वीशाद्यन्तं घ

बिम्बं प्रक्षाळ्य सलिलैर्गन्धपुष्पादिभिः शुभैः ।
अलङ्कृत्या नयेद्बिम्बं मण्टपे शाकुनेन तत्[1] ॥ ४७
भद्रपीठें न्यसेत् तस्मिन् प्रासादाभिमुखं यथा ।
आलिप्य मृद्भिस्त्वभिश्च गोमयेन शुभैर्ज-लैः ॥ ४८
क्षाळयेन्निर्मलं बिम्बं शुभं यद्वद्भवेत् तथा ।
नदीसूकरवल्मीकवृषशृङ्गेभशृङ्गतः ॥ ४९
आहृता मृत्तिकाः प्रोक्ताः कलशे लेपनें त्विह ।
मूलेनाङ्गैः क्रमान्न्यस्त्वा दत्वा पाद्यादि मूलतः ॥ ५०
कलशैर्मूलमन्त्रेण स्नापयेत् पूरणक्रमात् ।
वस्त्रं गन्धं ततः पुष्पं धूपं दीपं च दर्पणम् ॥ ५१
मूलेन सर्वं विधिवत् कृत्वा पुण्याहमाचरेत् ।
दूर्वाक्षतांश्च तारेण विन्यसेन्मूर्ध्नि पादयोः ॥ ५२
नीराज्य पीठादुत्थाप्य देवतां मण्टपं नयेत् ।
शाकुनेनाखिलैर्वाद्यैर्ध्वजच्छत्रसमाकुलम्[2] ॥ ५३
शयने मूलमन्त्रेण प्रासादाभिमुखं न्यसेत् ।
देवस्य परितो दिक्षु गन्धोदैर्मूलमन्त्रतः ॥ ५४
कलशान् पूरयित्वाऽष्टौ शार्वे चैकं[3] प्रपूरयेत् ।
हेमरत्नाक्षतैर्धान्यैर्गन्धपुष्पफलैर्युतम् ॥ ५५
तस्मिन्[4] साङ्गं विशेषेण शास्तारं पूजयेत् क्रमात् ।
शिरःस्थाने घृतं न्यस्य पादस्थाने मधु न्यसेत् ॥ ५६
अथाऽऽचम्य शुचिर्भूत्वा कृतरक्षः समाहितः ।
प्राणयामादिभिर्देहं संशोध्योत्पाद्य देशिकः ॥ ५७
तत्वानि न्यस्य मूलाङ्गैः सकळीकृत्य सादरम् ।
शास्तृभावनया युक्तः कर्म कुर्याद्यथाविधि ॥ ५८

3 निद्राकुम्भं । 4 निद्राकुम्भे ।

1 तम् ख 2 कुलैः क

अर्चायां संस्थितं जीवं तारेणात्मनि योजयेत् ।
अर्चागतानि तत्त्वानि संहृत्योत्पाद्य विन्यसेत् ॥ ५९
मूलाङ्गैः सकलीकृत्य पूजयेत् कल्पवर्त्मना ।
ततो होमांश्च विधिवत् कल्पयेद्देशिकोत्तमः । ६०
व्याहृतीभिर्निधायाग्निं कुण्डेष्वग्निमुखं क्रमात् ।
कृत्वा गायत्रिया पक्वं व्याहृतीभिः प्रयुक्तया ॥ ६१
षण्मन्त्रैर्जुहुयादाज्यमार्याद्यैरपि नामभिः ।
पलाशखदिराश्वत्थप्लक्षन्यग्रोधजास्तथा ॥ ६२
औदुम्बराश्च बैल्वाश्च अपामार्गमयाः क्रमात् ।
समिदाज्यचरून् लाजान् व्रीहींश्च यवसर्षपान् ॥ ६३
तिलांश्च दिक्षु सर्वासु पृथगष्टशतं हुनेत् ।
स्रुक्स्रुवेध्मादिकं सर्वं तत्तद्वृक्षेण कल्पयेत् ॥ ६४
होममन्त्रानतो वक्ष्ये तैरेभिः क्रमशो हुनेत् ।
ओं भूर्भुवस्स्वर्वौषट् अनेन पूर्णाहुतिः ॥ ६५
मूलमन्त्रेण[1] गायत्र्या हृदयेन[2] च शास्तृतः ।
आर्यादिना भवाख्येन शरेण च दिशाधिपैः ॥ ६६
एभिर्मन्त्रैः क्रमाद्धुत्वा पूर्णां व्याहृतिभिः क्रमात् ।
मूलेन मध्यकुण्डे तु आचार्यो होममाचरेत् ॥ ६७
पराय गोप्त्रधि[3]पतये नमः स्वाहा ![4] ।
भूताधिपाय विद्महे भवपुत्राय धीमहि ।
तन्नः शास्ता प्रचोदयात् ॥ ६८
ओं हृदयाय नमः[5 6] । ओं शास्त्रे नमः[7] । ओं गोप्त्रे नमः ।
भूताधिपतये नमः स्वाहा[8] ॥ ६९

---

1 समिदादीनां क्रमेण मूलमन्त्राश्रयः । 2 हृदयमन्त्रेण । 4 मूलमन्त्रमाह ।
6 ओं हां इति व्याख्यायां, अयं हृदयमन्त्रः । 7 शास्तृमन्त्रमाह ।

---

3 गोप्ताधि क 5 क, ग पुस्तके लुप्तं पदम् । 8 नमो नमः ख

आर्याय विश्वगोप्त्रे सेनान्यै नमो नमः स्वाहा[1] ॥ ७०
नमस्ते भवपुत्राय भवतुल्यबलाय च ।
वरदाय नमस्तेऽस्तु दक्ष [भक्त] प्रियहिताय वै स्वाहा ॥ ७१
शङ्कराय नमस्तेऽस्तु नमः कुक्कुटकेतवे ।
नमस्ते नीलरूपाय नीलाम्बर[2]धराय च नमो नमः स्वाहा[3] ॥ ७२
इन्द्राय सुराधिपतये सवाहनपरि[4]वाराय नमः स्वाहा[5] ॥ ७३
तत्तद्दिक्पालैरेवं सर्वदिक्षु ।
[एवं] स्विष्टकृदादीनि हुत्वा शेषं समाप्य च ।
सम्पाताज्येन सम्प्रोक्ष्य जपेयुर्हुतमन्त्रकान् ॥ ७४
आचार्यः शान्ति[6]होमं च कृत्वा पादादिषु स्पृशेत् ।
घृतेन दध्ना पयसा मधुना च यथाक्रमम् ॥ ७५
सह सर्वै[7] ततो हुत्वा सर्वगात्रं ततः स्पृशेत् ।
एवं कृत्वाऽथ मूलेन आवाह्य हृदये न्यसेत् ॥ ७६
गायत्र्या विन्यसेत् तस्यां सकलीकृत्य पूजयेत् ।
साङ्गं सावरणं तस्यां[8] तत्त्वत्रयमथार्चयेत् ॥ ७७
विद्यातत्त्वमथोऽभ्यर्च्य शास्तृतत्त्वं च मध्यतः ।
आत्मतत्त्वं तदूर्ध्वे तु विन्यस्याधारयेद्गुरुः ॥ ७८
प्रणवं हृदि विन्यस्य पूजयित्वा निवेदयेत् ।
हविः शेषं समुद्धृत्य भूतेभ्यो बलिमाहरेत् ॥ ७९
मण्टपस्य बहिर्दिक्षु नृत्तं गीतं च कारयेत् ॥ ८०

इति क्रियासारे (षट्पञ्चाशः) शास्तृभागे प्रथमः पटलः

---

1 आर्यमन्त्रमाह । 3 शरमन्त्रमाह । 5 विगधिपमन्त्रामाह ।
7 भूरादिभिश्चतसृभिः चत्वारि द्रव्याणि, मूलेन मिळितसर्वद्रव्यम् ।
अथवा पञ्चतत्त्वैः पञ्च द्रव्याणि ।

---

2 नीलोत्पल क 4 सपरि क 6 शास्तृ क 8 तस्य क

द्वितीयः पटलः

ततः प्रातः समुत्थाय स्नात्वा जप्त्वा यथाविधि ।
आराध्य देवं विधिवद्रत्नन्यासं समारभेत् ॥ १
लिङ्गे चेद्देवभागे तु बिम्बं मानुषके भवेत् ।
आसनं चेत्तयोर्मध्ये[1] तत्र ब्रह्मशिलां न्यसेत् ॥ २
तद्गर्ते रत्नविन्यासं कुर्याद्देशिकसत्तमः ।
गव्येन गन्धतोयैश्च शोधयित्वाऽथ मूलतः ॥ ३
गायत्र्याऽष्टशतं हुत्वा आज्यं पुण्याहमाचरेत् ।
पुण्याहं केचिदिच्छन्ति रत्नन्यासे कृते सति ॥ ४
मूलेन विन्यसेत्सर्वं गायत्र्या सम्पुटेन च ।
तारेण[2] दिक्षु विन्यस्य मध्ये मूलेन विन्यसेत् ॥ ५
ऐन्द्रादिमध्यपर्यन्तं रत्नन्यासमि [इ] हेष्यते ।
प्रथमावरणे बीजं[3] द्वितीये रत्नमेव च ॥ ६
तृतीये तु भवेद्धातुश्चतुर्थे लोहमेव च ।
यवान् व्रीहीश्च निष्पावान् प्रियङ्गुतिलमाषकान् ॥ ७
नीवारं वैणवांश्चैव सर्वबीजानि मध्यतः ।
वज्रमौक्तिकवैडूर्यशङ्खस्फटिकपुष्यकान् ॥ ८
चन्द्रकान्तं महानीलं ब्रह्मरागं तु मध्यतः ।
पुळकं[4] विद्रुमं चैव अञ्जनं श्यामसीसकम् ॥ ९
मनःशिलां हरीताळं गैरिकं पारतं तथा ।
सुवर्णं रजतं ताम्रमायसं त्रपु सीसकम् ॥ १०
आरकूटं ततः कांस्यं सुवर्णं मध्यमे न्यसेत् ।
अभिमन्त्र्य ततो गन्धपुष्पैराराध्य पीठिकाम्[5] ॥ ११

---

1 आसीने बिम्बे देवमानुषयोर्मध्ये । 2 पक्षान्तरमाह ।
3 न्यस्य भवेदिति शेषः । 5 न्यस्येति शेषः ।

---

4 पुटकं क

रक्षां कृत्वा बहिर्गत्वा बिम्बमासाद्य देशिकः ।
उत्थाप्य शयनाद्देवं पीठे विन्यस्य तत्र तु ॥ १२
विसृज्य वस्त्रपुष्पादि सर्वं संस्था [स्ना] पयेत् ततः ।
कुल [मूल] मन्त्रेण परितः पूरितैरष्टभिर्घ-टैः ॥ १३
प्रणवेनार्चयेद्वस्त्रं गन्धपुष्पादिभिः शुभैः ।
शाकुनेन नयेद्गेहं मूर्ति-पैः सहितो गुरुः ॥ १४
वेदमङ्गलवाद्यैश्च जयशब्दसमन्वितैः[1] ।
पूरयित्वा दिशः सर्वाश्छत्रध्वजसमन्वितम् ॥ १५
अच्छिन्नां पातयेद्धारामतैतो ? [मग्रतो] मूर्तिधारकः[2] ।
अर्घ्यहस्तो गुरुर्गच्छेत् पृष्ठे च नववस्त्रधृक्[3] ॥ १६
ततो बिम्बंततः कुम्भौ[4] कर्ता बन्धुजनैस्सह ।
गत्वा प्रदक्षिणीकृत्य द्वारि चार्घ्यं प्रदाय च ॥ १७
यत्नात् प्रवेशयेद्बिम्बमध ऊर्ध्वं न संस्पृशेत् ।
पीठं प्रदक्षिणीकृत्य न्यस्त्वाऽग्रे मन्त्रविद्गुरुः ॥ १८
आवाहयेत् ततो देवं मन्त्रेणानेन देशिकः ।
आयातु शास्ता स गणो मुदे नो हयेन नागानुचरेण शीघ्रम् ॥ १९
भवा[5]त्मनो [जो] वारि[6]निधीश्वरोऽयं सकेतुना कृष्णनिभेन गोप्ता
ओमावाहयामीत्यावाहनमन्त्रः ॥ २०
गोप्तारं विश्वगोप्तारं शास्तारं शाम्भवं प्रभुम् ।
अमेयमद्भुतं शान्तं स्थापयाम्यहमच्युतम् ॥ २१
अनेन स्थापयित्वा तं स्थिरीकृत्याभिषेचयेत्[7] ।
आवाह्य[8] कलशे तस्मिंश्चिद्रूपममलं ध्रुवम् ॥ २२
विधिना मूलमन्त्रेण शाम्भवं वैष्णवं महः ।

---

4 निद्राकलशकुम्भेशौ । 7 कुम्भेशेनेति शेषः । 8 निद्राकुम्भे ।

---

1 न्वितं क 2 एतदर्धं क पुस्तके नास्ति । 3 युक् क
5 नवा क 6 सोरि क

तेनाभिषिच्य मूलेन मन्त्रन्यासं समाचरेत् ॥ २३
मूर्ध्न्यास्ये हृदये नाभौ गुह्ये पादद्वये न्यसेत् ।
षण्मन्त्रान्[1] मूलमन्त्रांश्च[2] मूर्धादिषु यथाक्रमम् ॥ २४
मूर्धेक्षणास्य हृन्नाभिगुह्यजानुपदेषु च[3] ।
नाभ्यादिहृदयान्तेषु स्थितिन्यास उदाहृतः ॥ २५
अङ्गन्यासं ततः कृत्वा पूजयेद्विधिना प्रभुम् ।
स्वनाम्ना स्थापयेद्वामे प्रभामन्यत्र सत्यकम् ॥ २६
एवं संस्थाप्य विधिवदर्चयित्वा यथाक्रमम् ।
जप्त्वा स्तुत्वा ततः प्रार्थ्य स्थापयेत्परिवारकान् ॥ २७
द्वाःस्थादीन्नामभिः स्वैः स्वैरभ्यर्च्याथ बलिं हरेत् ।
आचम्यान्तः प्रविश्याथ मूलमष्टशतं जपेत् ॥ २८
स्तुत्वा स्तोत्रैश्च विधिवत् प्रणम्याथ क्षमापयेत् ।
संक्षेपात् स्थापना प्रोक्ता सर्वशास्त्रानुसारतः ॥ २९
शोधनीया प्रयत्नेन विद्वद्भिः शास्त्रकोविदैः ॥ ३०

इति क्रियासारे (सप्तपञ्चाशः) शास्तृभागे द्वितीयः पटलः

तृतीयः पटलः

अथार्चनाविधिं वक्ष्ये भूतनाथस्य भूतिदम् ।
स्नात्वाऽऽचम्य विधानेन देवागारं प्रविश्य च ॥ १
करशुद्धिमथास्त्रेण कृत्वा ताळत्रयादिकम् ।
दिग्बन्धं तेन कृत्वाऽथ प्राणायामत्रयं चरेत् ॥ २
वाय्वग्न्यमृतबीजैस्तु धारणा धारयेदथ ।
मन्त्रन्यासं ततः कुर्यात् करयोर्व्यापकं न्यसेत् । ३
मूल[4]मङ्गानि चाङ्गुष्ठाद्यङ्गुलीषु तलान्तिमम्[5] ।

1 षण्मन्त्रान् इति पूर्वत्रान्वेति । 2 मूलमन्त्राक्षररूपाङ्गमन्त्रान् ।
3 अयं सृष्टिन्यासः । 4 मूलमिति पूर्वेणान्वेति ।
5 न्तिकम् क

शरीरे व्यापकं[1] मूलमङ्गानि हृदयादिषु ॥ ४
विन्यस्य मुद्राः सन्दर्श्य ध्यात्वा मन्त्रं जपेदथ ।
एकादशावरं मूलं ततः पूजां[2] समारभेत्[3] ॥ ५
अस्त्रेण क्षाळयेत् पात्रं पूरयेत् प्रणवेन तु ।
गन्धाक्षतयुतं मूलं जपेदेकादशावरम् ॥ ६
ताभिरस्त्रेण चात्मानं सम्प्रोक्ष्य कुसुमादि[4] च ।
अथात्मानमलङ्कृत्य योगपीठं प्रकल्पयेत् ॥ ७
आधारशक्तिं चानन्तं मध्येऽभ्यर्च्यानलादिषु ।
कोणेषु पादपीठस्य धर्मादीन् कल्पयेत् क्रमात् ॥ ८
धर्मं ज्ञानं च वैराग्यमैश्वर्यं च यथाक्रमम् ।
अधर्मादीनि गात्राणि पूर्वादिक्रमयोगतः[5] ॥ ९
अनन्ताय योगपीठाय सर्वशक्तिमयाय[6] पद्माय नमः ।
एवमाराध्य शास्तारं कल्पयेन्मूलमन्त्रतः ॥ १०
क्षुरिकां च ततः खड्गधनुश्च[7] शरमेव च ।
पीठबाह्ये मधुकरं शार्वे सं [शम्बरं] पूजयेदथ ॥ ११
प्रभां च सत्यकं वामे सव्ये तस्य प्रकल्पयेत् ।
मन्त्रन्यासं क्रमात् कृत्वा देवे चा [देवम] र्घ्यादिभिर्यजेत् ॥ १२
भूषान्तं स्नानपूर्वं तु भूषान्तं वै प्रभादिषु ।
प्रभायै सत्यकायाथ अङ्गेभ्योऽपि यथाक्रमम् ॥ १३
आग्नेय्यां शाङ्करे चाथ नैऋत्यां वायवेऽग्रतः[8] ।
दिक्ष्वस्त्रं कल्पयित्वैवं क्षुरिकाद्यं दिशासु च ॥ १४
क्षुरिकायै च खड्गाय धनुषे च शराय च ।

---

1 न्यसेत् । 2 बाह्यपूजां । 5 सत्वादीन् मण्डलात्मत्रयं, दीप्ति, सत्या, प्रभा, सिद्धि, विभूति, विमला, संसिद्धि, पुष्टि, सर्वकामदास्य-नवशक्तीश्च सम्पूज्य । 8 आग्नेय्यादिषु पञ्चाङ्गानि दिक्ष्वस्त्रं ।

---

3 चरेत् क 4 मानि ख 6 य च क 7 धनुस्स क

ततोऽन्ते[1] हुंफडादीनि नमोन्तान्यायुधानि ह ॥ १५
एषां बाह्ये मधुकरं शम्बरं शाङ्करेऽनले ।
एषां बाह्ये दिशापालानिन्द्रादीनर्चयेत् क्रमात् ॥ १६
वज्रादीनथ[2] तद्बाह्ये घोषवन्तं तु शाङ्करे ।
तोयैर्गन्धैस्तथा पुष्पैः सर्वानाराध्य नामभिः ॥ १७
भूयोऽपि देवं षण्मन्त्रैरार्या-द्यैः कुसुमैर्यजेत् ।
धूपं दीपं क्रमाद्दत्वा पायसं तु निवेदयेत् ॥ १८
तोयमाचमनं दत्वा गन्धपुष्पादिभिर्यजेत् ।
पानीयं मुखवासं च दत्वा जप्त्वा प्रणम्य तु[3] ॥ १९
स्तुत्वा स्तोत्रैश्च विविधैरर्घ्यं दत्वा विसर्जयेत् ।
मन्डले[4] स्थण्डिले[5] वाऽपि जङ्गमे[6] च विसर्जनम् ॥ २०
अव्यङ्गे[7] स्थापिते देवं कदाचिन्न विसर्जयेत् ।
एवं संक्षेपतः प्रोक्तमर्चनं सर्वसिद्धिदम् ॥ २१
भक्तैरहरहः कार्यं सर्वकामार्थसिद्धये ॥ २२

इति क्रियासारे (अष्टपञ्चाशः) शास्तृभागे तृतीयः पटलः

चतुर्थः पटलः

मन्त्रोद्धारमतो वक्ष्ये संक्षेपेणाधुनाऽत्र तु ।
आदिवर्गचतुर्थार्ण[8]मुद्धरेद्धृद्विविष्टरम् ॥ १
अर्धीशं[9] [10] बिन्दुसंयुक्तं शून्यं[11] सर्गविषाक्षरम्[12] ।
परायेति पदं पश्चाद्गोप्त्रे[13]त्येषो[14]द्धृतो मनुः ॥ २

1 अङ्गावरणान्ते-हुं फट् क्षुरिकायै नमः, इत्यादि। 4 पञ्चवर्णकल्पिते। 5 केवलभूमौ। 6 चरबिम्बे। 7 अङ्गपरिपूर्णे, अङ्गहीने तु तदुद्धरणार्थं विसर्जनं भवति। 8 घ कारः। 10 षष्ठः स्वरः एवं च घ्रूं इति। 11 न कारः। 12 मः एवं च नमः इति। 13-14 सन्धिरार्षः।

2 न्यथ ख 3 तं क 9 अश्वीशं घ

रेवन्तादिभिरङ्गानि षण्मन्त्रैः कल्पयेत् क्रमात् ।
ताराद्याः पूजने होमे स्वाहाकारसमन्विताः ।। ३
गायत्रीमथ वक्ष्यामि यया पक्वादि[1] कर्म च ।
भूताधिपपदं पूर्वं चतुर्थ्यन्तं समुद्धरेत् ।। ४
विद्महे पदमुद्धृत्य भवपुत्रपदं तथा ।
धीमहे पदमुद्धृत्य तन्नः शास्ता पदं पुनः ।। ५
प्रचोदयात् पदं पश्चाद्गा[2]यत्री परिकीर्तिता ।। ६
आर्यः शास्ता गुहासन्नः सेनानीर्भूतवल्लभः ।
रुद्रजो रूपवान् कामी वरदो लोकपूजितः ।। ७
नीलाश्वः श्वेतमातङ्गः श्यामी पीतानुलेपनः ।
रक्तमालाधरः शूरो मायो मातृगणप्रियः ।। ८
काळवासा गणाध्यक्षः खड्गहस्तो धनुर्धरः ।
सहजायो जनावेशः साधुः संसाररक्षकः ।। ९
तारादीनि नमोन्तानि चतुर्थ्यन्तानि कल्पयेत् ।
इमानि नामधेयानि स्वाहान्तानि हुतादिषु ।। १०
मन्त्रोद्धारमिदं प्रोक्तं स्नपनं परिकीर्त्यते ।
स्थापितस्य चतुर्थेऽह्नि स्नपनं परिकल्पयेत् ।। ११
पूर्वोक्तं मण्टपं सम्यगलङ्कृत्य विशोध्य च ।
ततोऽग्निजननं कृत्वा पदानि परिकल्पयेत् ।। १२
कलशस्यानुरूपेण तेषु पीठं प्रकल्पयेत् ।
व्रीहिभिः प्रणवेनैव दर्भान् विन्यस्य सादयेत् ।। १३
कलशान् क्षालितान् सूत्रवेष्टितान् धूपिताञ्छुभान् ।
न्यम्बिलान् प्रणवेनैव सादयित्वोपरि न्यसेत् ।। १४
दर्भान् गन्धोदकैः प्रोक्ष्य विकिरेद[3]क्षतैरिह ।

---

1 आदिपदेन क्वचित् पूर्णाहुतिः इति व्याख्यायां ।

2 त्वेवं गा क 3 रैर- क

उत्तानीकृत्य सम्प्रोक्ष्य विन्यस्य प्रणवेन तु ॥ १५
विन्यस्य तेषु कूर्चांश्च द्रव्याणि परिपूरयेत् ।
प्रोक्षणं कूर्चविन्यासं प्रणवेन विधानवित् ॥ १६
विन्यस्य पात्रमैशान्यां क्षालितं धूपितं महत् ।
अस्त्रेण गाळयेत् तस्मिन् सलिलं दीक्षितैर्द्विजैः ॥ १७
गन्धपुष्पयुतं कृत्वा पूजयित्वाऽभिमन्त्रयेत् ।
ताभि[1]र्द्रव्याणि विन्यस्य[2] पूज[र]येत् कलशानथ ॥ १८
पूरितान्प्रोक्षयेत् सद्यः पल्लवैः क्षुरिकात्मना ।
तेनैव चक्रिका[3]न्यस्य वासोभिस्तेन वेष्टयेत् ॥ १९
गन्धपुष्पैश्च सम्पूज्य दत्वा धूपा[4]दिकान् क्रमात् ।
वीथीः सम्मृज्य विन्यस्य मङ्गलाङ्कुरपात्रकान्[5] ॥ २०
दिक्षु होमांश्च विधिवत् कुर्युर्मूर्तिधराः क्रमात् ।
कृत्वा चाग्निमुखं पक्वं गायत्र्या जुहुयुः क्रमात् ॥ २१
षण्मन्त्रैर्जुहुयुश्चाज्यमार्या-द्यैरपि नामभिः ।
समीपेऽथ ? [षडविंशद्भिः] हुनेन्मूलमन्त्रेणाष्टोत्तरं शतम् ॥ २२
पैप्पलान् वटजान् प्लक्षान् राजवृक्षोद्भवानपि[6] ।
तावदाज्यं चरून् लाजान् सिद्धार्थांश्च यवांस्तिलान् ॥ २३
आज्यं च तावल्लाजादीनार्या-द्यै[7]श्चतुरो हुनेत् ।
समाप्य होमशेषं तु सम्पातं[8] कलशेऽर्प-येत् ॥ २४
बिम्बाधिवासेऽप्येवं वा होमान् मूर्तिधराः पृथक् ।
कुर्युस्तत्र चतुर्दिक्षु आचार्येण समन्विताः ॥ २५
कलशान् पूजयित्वा तु जपेयुरभितो द्विजाः ।
आचम्य देवं सम्प्राप्य[9] निर्माल्यमपनीय च ॥ २६

---

2 द्रव्याणि विन्यस्य ताभिरद्भिः पूरयेत् । 6 शम्याकाः । आचार्यकुण्डे पालाश्य एव । 7 आर्यभवशरविकपालमन्त्रैः ; समिदादीनि मूलेनेति ।

---

1 तानि क 3 कां क 4 ऽपूपा क 5 पालिकान् ख 8 तान् ख 9 र्च्य ख

प्रक्षाळ्य सलिलैर्देवं पीठं च विधिवद्यजेत् ।
तत्वानि न्यस्य विधिवदावाह्य सकळीकृतम्[1] ॥ २७
पूजयेद्विधिनाऽभ्यर्च्य पाद्यमाचमानं ददेत् ।
गायत्र्या कौतुकं छित्वा मधुपर्कं प्रदाय च ॥ २८
आचामं साक्षता दूर्वा विन्यसेत् तच्छिरस्यपि ।
नीराज्य कलशैर्देवमभिषिञ्चेत् क्रमेण तु ॥ २९
खण्डमध्यगतैर्द्रव्यकुम्भैः शुद्धाम्बुपूरि-तैः ।
षण्मूलमन्त्रप्रणवैः पाद्यमग्रोऽभिषेचयेत्[2] ॥ ३०
रजनीगन्धपुष्पैश्च तिलाक्षतसमायुतैः ।
कल्पयेत् पूर्वमाचार्यः पाद्यं तेनाभिषेचयेत् ॥ ३१
गन्धपुष्पकुशक्षीरतिलसिद्धार्थसंयुतम् ।
अर्घ्य[3]माचमनीयं तै[4]र्मन्त्रैरेवाभिषेचयेत् ॥ ३२
लवङ्गपद्मगन्धोदैराचामं परिकीर्तितम् ।
पञ्चगव्यं स्वमन्त्रैस्तु पञ्चभिः स्नापयेदथ ॥ ३३
गायत्र्या चैव गोमूत्रमाप्यायस्वेति वै पयः ।
दधिक्राव्णेति च दधि घृतं शुक्रमसीति च ॥ ३४
मधुवातेत्यृचा क्षौद्रं ततः शुद्धोदकान्वितम्[5] ।
नवभिः सप्तदशभिः पञ्चविंशतिभि[6]रेव वा ॥ ३५
कषायं फलतोयं च मार्जनं मृज्जलं तथा ।
सक्तूदकं च गन्धोदं पुष्पोदं चाक्षतोदकम्[7] ॥ ३६
एतत् सप्तदशद्रव्यमेभिर्वा स्नापयेद्विभुम् ।
क्षीरद्रुमाणां च क्वाथं कदळ्यादिफलोदकम् ॥ ३७
इन्द्रवल्लीसदाभद्राकुशगन्धाक्षतार्त-वैः ।

---

2 ब्रह्मकुम्भेन । 3 पूर्वादिदिक्षु आग्नेय्यादिविदिक्षु च मघवन्तान्यष्टद्रव्याणि, अथवा प्रादक्षिण्येन । 5 परिकलशेषु । 7 मानुषे दिग्विदिक्क्रमेण ।

---

1 तान् ख 4 यान्ते ख 6 विंशति क

संयुक्तं मार्जनं प्रोक्तं मृज्जलं प्रोच्यतेऽधुना ॥ ३८
नद्याश्च तीरयोर्वेद्यां वृषशृङ्गे च पर्वते ।
क्षेत्रे च मृदमाहृत्य पूरयेन्मृज्जलं बुधः ॥ ३९
पञ्चविंशतिभिरथ[1] स्नापयेद्भूतनायकम् ।
गुळ[2]मिक्षुरसं चैव नारिकेळपयस्तथा ॥ ४०
नाळिकेरोदकं चैव रत्नोदं लोहवारि च[3] ।
तीर्थोदं चाक्षतोदं च पूर्वोक्तानीतराणि तु ॥ ४१
नवद्रव्योर्ध्व[4]मुद्दिष्टं द्रव्याणां मनवः स्मृताः ।
षण्मन्त्राः स्नानशिष्टाभिः प्रोक्षयेदङ्गदेवताः ॥ ४२
एवं संस्नाप्य विधिवत् पूजयेद्भूतनायकम् ।
उत्सवं च ततः कुर्याद्भक्त्या सर्वार्थसाधकम्[5] ॥ ४३

इति क्रियासारे (एकोनषष्टिः) शास्तृभागे चतुर्थः पटलः

पञ्चमः पटलः

उत्सवं विधिवद्वक्ष्ये शास्तुः सर्वार्थसिद्धिदम् ।
सप्ताहं वा नवाहं वा[6] पञ्चाहं वा स्वशक्तितः ॥ १
बीजाङ्कुरं च विधिवत् कृत्वा संस्थापयेद्ध्वजान् ।
प्राकारात् तु बहिर्दिक्षु वीरबाह्वादि नामभिः ॥ २
समभ्यर्च्य बलिं दत्वा वीथीः सम्मृज्य सर्वतः ।
सम्पूज्य गन्धतोयैश्च कुसुमैरक्षतैः किरेत् ॥ ३
बलिपीठं ध्वजान् दिक्षु सर्वतः परिकल्पयेत् ।
आरामे चत्वरे कुर्यान्मङ्गलानि सुरालये ॥ ४
प्राकाराभ्यन्तरं बाह्यं सम्मृज्यालिप्य सर्वतः ।

2 भृशाद्यन्तराळेषु गुळादीनि । 4 दैविकनवद्रव्योत्तरम् ।

1 द्विरथ वा क 3 रत्नलोहोदके तथा ख 5 नं ख 6 च ख

पुष्पमालादिभिः सम्यगलङ्कृत्य समन्ततः ॥ ५
दीपप्रासादजातीश्च दीपमालाश्च[1] कल्पयेत् ।
कृत्वैवं ग्रामसंस्कारं पूजयेद्भूतनायकम् ॥ ६
त्रिकालं च बलिं दत्वा रात्रौ चैव विशेषतः ।
कौतुके देवमावाह्य सकळीकृत्य पूजयेत् ॥ ७
शिष्यहस्ते प्रदायाथ बहिर्गत्वा बलिं हरेत् ।
दक्षिणे क्षुरिकापाणिं खड्गहस्तं तथाऽन्यतः ॥ ८
पूजयित्वा बलिं दत्वा बहिर्द्वाःस्थावथार्चयेत् ।
वीरबाहुं महावीरमग्रोऽश्वं मण्टपेऽर्चयेत् ॥ ९
विनायकं शिवं चापि दक्षिणे द्वारि वै यजेत् ।
दिक्षु दिक्पानजं शैवे[2] नैर्ऋत्यां शेषमर्चयेत् ॥ १०
यमगन्धर्वयोर्मातृस्तासां दक्षिणवामयोः ।
वीरभद्रं गणपतिं ताः क्रमेणार्चयेदथ ॥ ११
ब्रह्माणीं चैव माहेशीं कौमारीं वैष्णवीं तथा ।
वाराहीं च तथेन्द्राणीं चामुण्डीं पूजयेत् क्रमात् ॥ १२
पूजयित्वा बलिं दद्यात् ततः पारिषदैः सह ।
तासां प्रतीच्यां शास्तारमार्यामनिलगोचरे ॥ १३
मुख्येऽथ पन्मुखं घोषवन्तं चादितिगोचरे ।
एषां पूजां विधायैवं बलिं दत्वा बहिर्व्रजेत् ॥ १४
तीक्ष्णं च तीक्ष्णदन्तं च गोपुरद्वारि पूजयेत् ।
गोसारं पिङ्गलाक्षं च वीरसेनं च शाम्भवम् ॥ १५
त्रिनेत्रं शूलिनं दक्षं भीमरूपं क्रमेण तु ।
प्राकार[3]बाह्यतो दिक्षु सम्पूज्यैतान् बलिं हरेत् ॥ १६
एषां च पार्षदाः पूज्यास्ततः पार्श्वेषु दिक्षु वै ।
ततोऽनेन[4] बलिं दद्याद्दिक्ष्वष्टासु यथाक्रमम् ॥ १७

---

1 मालां क 2 शार्वे क 3 राद् क 4 त्रेन क

चाम्बादीनां गणाः सर्वे कोटिकोटिविभाजिताः ।
भवन्तु सहिताः सर्वे तेभ्यस्ताभ्यो नमो नमः ॥ १८
एवं दक्षिणपश्चिम [उत्तर] दिग्गणेभ्यश्च ।
ओं सर्वेभ्यः पिङ्गलेभ्यो महागणे[1]भ्यो घोरेभ्यो
घोररूपेभ्यो मृगयुभ्यो विनायकेभ्यो (मूकेभ्यो बधिरेभ्यो)[2]
जळे [डे] भ्यः स्थूलेभ्यः कृशेभ्यो दीर्घेभ्यो ह्रस्वेभ्यः
स्त्रीभ्यो नपुंसकेभ्यः सद्व्योऽसद्व्यः सदसद्व्यः
सर्वशर्वगणेभ्यो नमो नमः ।
एभिर्दत्वा बलिं दिक्षु बलिपीठे समापयेत् ।
ओं नमः प्रशास्तृभूतेभ्यो नम इति ॥ १९
तीर्थस्नानस्य पूर्वेद्युर्नि-शि दद्यान्महाबलिम् ।
अन्तः प्रविश्य भूतेशं प्रार्थयेत् तदनन्तरम् ॥ २०
तीर्थयात्रा त्वया देवेति । [तीर्थयात्रा ..... महसि ॥]
घृतस्यारोपणं कृत्वा पुण्याहं च यथाविधि ।
मूलेन कौतुकं दत्वा मङ्गलानि च दर्शयेत् ॥ २१
मण्टपेऽलङ्कृते शय्यामास्तीर्याभ्यर्चिते: न्यसेत् ।
मूलेन कौतुकं तत्र समभ्यर्च्यार्थ शाययेत् ॥ २२
अनिद्रया निशां नीत्वा स्नात्वाऽऽचम्य स्वयं पुनः ।
तत्कालोचितमखिलं कृत्वाऽन्तः कौतुकं नयेत् ॥ २३
सम्पूज्य च बलिं दत्वा पिष्टचूर्णानि कारयेत् ।
लिप्त्वाऽर्चां मधुसर्पिभ्यां चूर्णैः सम्मृज्य सर्वतः ॥ २४
भक्तानां मूर्ध्नि तद्दत्वा संस्नाप्याभ्यर्चयेदथ ।
यात्राहोमं च विधिवत् कृत्वा पुण्याहमाचरेत् ॥ २५
कौतुकं तत्र विन्यस्य संशोध्यावाह्य मूलतः ।
न्यस्त्वाऽऽराध्याम्बराभ्यां तु देवं सम्प्रार्थ्य देशिकः ॥ २६

---

1 शने ख 2 कंसाङ्कितो भागः क पुस्तकेऽधिकः ।

तीर्थयात्रां कुरुष्वेति परिधाप्य स्वयं गुरुः ।
आदाय द्वारि दत्वाऽथ कुर्यान्मङ्गलवाचनम् ॥ २७
शिष्यहस्ते प्रदायैनं निर्गच्छेदोमिति ब्रुवन् ।
वेश्मप्रदक्षिणं कृत्वा निर्गच्छेद्यत्नवान् गुरुः ॥ २८
ध्यात्वा गजं हयं देवमारोप्य सरितं नयेत् ।
तत्पार्श्वे स्थण्डिले न्यस्य पाद्यार्घ्याचमनं ददेत् ॥ २९
तीर्थमावाहयेत् पश्चादिमं मे मन्त्रमुच्चरन् ।
निर्मज्जेद्देवमादाय मूलमन्त्रेण देशिकः ॥ ३०
आदाय वेद्यां दद्याच्च पाद्यमाचमनं पुनः ।
प्रोक्षयेत् कुशपाणिस्तु मूर्ति-पैः सहितो गुरुः ॥ ३१
सुरभिमत्यञ्जिङ्गाभिर्वारुणीभिश्च[1] मन्त्रवित् ।
ततो हिरण्यवर्णाभिः पावमानीभिरेव च ॥ ३२
व्याहृतीभिः शान्तिकैश्च[2] षण्मन्त्रैर्मूलमन्त्रतः ।
प्रणवेन ततश्चूर्णैर्मूलेनोद्वर्त्य सादरम् ॥ ३३
महाजनैः सह स्नायादघमर्षणपूर्वकम् ।
पूर्ववद्वेदिमानीय समभ्यर्च्य यथाक्रमम् ॥ ३४
पायसं च निवेद्याथ सोपदंशं घृताप्लुतम् ।
षण्मन्त्रैः सर्पिषा हुत्वा[3] शतमष्टोत्तरं पुनः ॥ ३५
हविषाऽऽज्याप्लुतेनैव हुत्वा पूजाक्रमेण तु ।
बलिमप्सु प्रदायाशु पूर्ववद्वाहनं नयेत् ॥ ३६
आगत्य पूर्ववद्वेश्म मूलबिम्बे समर्चयेत् ।
दिवैवास्तमिते सूर्ये होमं[4] कृत्वा निवेशयेत् ॥ ३७
पूजयित्वा निवेद्यान्नं सोपदंशं घृताप्लुतम् ।

---

1 दधिक्राव्ण इति आपोहिष्ठेति अवते हेळेति ।
2 शन्न इन्द्राग्नीत्यादिभिः । 4 प्रायश्चित्तहोमं ।

3 दत्वा क

रात्रौ भूतबलिं दत्वा श्वोभूते स्नपनं भवेत् ॥ ३८
मध्यमं चोत्तमं वाऽपि स्नपनं कारयेद्गुरुः ।
तीर्थस्नाने च यः स्नातः सुलभस्तस्य भूतराट् ॥ ३९
यद्यदिष्टं च तत्सर्वं नित्यं प्रीतः प्रयच्छति ।
अनुगच्छन्ति ये त्वेनं तेषां च वरदो भवेत् ॥ ४०
गुरुं सम्पूजयेत् पश्चाद्वस्त्रदानैश्च पुष्कलैः ।
मनोभिलषितैर्द्रव्यैर्मूर्तिपान् पूजयेत् पुनः ॥ ४१
सदस्यान् पूजयेत् पश्चादव्यापारा[1]नतन्द्रितः ।
आचण्डालान्तमन्नाद्यं सार्वजन्यं तु कारयेत् ॥ ४२
एवं यः कारयेद्भक्त्या कुर्याद्वा भक्तिसंयुतः ।
स रुद्रत्वमवाप्नोति नात्र कार्या विचारणा ॥ ४३

इति क्रियासारे (षष्ठितमः) शास्तृभागे पञ्चमः पटलः

षष्ठः पटलः

प्रायश्चित्तं प्रकुर्वीत निमित्तं सम्भवेद्यदि ।
स्थाने चेत् खननाद्यैश्च संशोध्य स्थानमञ्जसा ॥ १
क्षाळनाद्यैस्ततो बिम्बं संशोध्य च यथाविधि ।
अर्धचन्द्राकृतिं कुर्यात् कुण्डं लक्षणसंयुतम् ॥ २
षण्मूलमन्त्रप्रणवैस्तत्राग्निं जनयेत् ततः ।
पक्वं गायत्र्या [त्रिया] हुत्वा व्याहृतीभिः प्रयुक्तया । ३
षण्मन्त्रैः समिदादीनि[2] द्विशतं जुहुयात् पृथक् ।
समिदाज्यचरून् लाजान् सर्षपांश्च यवांस्तिलान् ॥ ४
बिल्वस्य समिधः प्रोक्ता व्याहृतीभिर्घृतादिकम् ।

1 साक्षिगः । 2 प्रतिमन्त्रं सप्तदश एवं सति द्व्युत्तरशतं भवति ।

घृतं क्षीरं दधि क्षौद्रं पृथगष्टोत्तरं शतम् ।। ५
मृत्युञ्जयेन दूर्वास्तु मधुरत्रयसंयुताः ।
त्रिसहस्रं तु जुहुयात् ततः स्विष्टकृदादिकम् ।। ६
आज्यशेषमपां शेषं[1] स्थालीसंक्षाळनादिकम्[2] ।
हुतभस्मसमायुक्तं सम्पातं कलशेन[3] तम् ।। ७
अभिषिञ्चेद्गुरुस्तेन सर्वदोषो[4] विनश्यति ।
गुरुः[5] सम्पूजयेत् पश्चात् स्नानमन्नाद्यमाचरेत् ।। ८
पार्श्वस्थापत्यदारं वटविटपितलन्यस्तसिंहासनस्थम्
श्यामं काळाम्बरं च श्रितकरयुगळादर्शचिन्तामणिं च ।
शस्त्री[6] निस्त्रिंशबाणासनविशिखधृतं रक्तमाल्यानुलेपम्
वन्दे शास्तारमीड्यं घनकुटिलबृहत्कुन्तळोदग्रमौळिम् ।। ९
आकृत्या कूर्मवेषं जितवति नितरां वर्णतः सान्ध्यमभ्रम् ।
बिम्बोकेनाङ्गुलीनामभिनवललितावल्लरीर्वादयन्तम् ।
कान्त्या प्रोद्यन्नखानामरिदरकमलैरङ्कितत्वान्मुकुन्दम्
शास्तुः पादारविन्दे विहरतु सततं चित्तभृङ्गो ममायम् ।। १०
अंसासक्तसुवर्णकर्णिकमुरोविस्तीर्णहारोज्वलम्
शृङ्गारोचितवेषविभ्रमसखं श्यामांशुकं श्यामळम् ।
रक्तालेपनमाल्यदामरचितं नीलोल्लसत्कुन्तळम्
वन्दे बाणशरासनोद्यतकरं वीरेशमार्यं सदा ।। ११
रक्तां रक्तोज्वलाकल्पां सुरूपां कान्तयौवनाम् ।
धृतवीणां प्रभां वन्दे देवीं रक्तान्तलोचनाम् ।। १२
तमाळश्यामलं भद्रं पिशङ्गं[7] कल्पसुन्दरम्[8] ।
अधिज्यकार्मुकं वन्दे सत्यकं व्यक्तयौवनम् ।। १३

---

1 प्रणीताशेषं । 3 सहार्थे तृतीया । 6 क्षुरिका ।
2 न्वितम् क 4 षं क 5 गुरुं क
7 ङ्गा ख 8 विना कल्पेन सुन्दरम् घ

इति संक्षेपतः प्रोक्तं स्थापनं पूजनं विभोः ।
सर्वांगमानुसारेण शोध्यमेतन्मनीषिभिः ॥ १४

इति क्रियासारे (एकषष्टितमः) शास्तुभागे षष्ठः पटलः

क्रियासारः समाप्तः

शुद्धि पत्रिका

पृष्ठम्	पंक्तिः	अशुद्धं	शुद्धं	पृष्ठम्	पंक्तिः	अशुद्धं	शुद्धं
1	टि 4	घनं	घनं	41	1	द्रव्यै	गव्यै
1	टि 6	टीकर	दीकरं	41	7	ूरणे	पूरणे
2	3	सन्दर्भे	सदर्भे	42	1	क म	क्रमा
3	7	अग्नि	अग्नि	45	5	न व	तेव
3	17	लोका	लोका	45	5	दे ता	देवता
4	2	जित	जितः	48	1	शति	शन्ति
4	3	मूर्ति	मूर्ति	48	18	द्वयैक	द्वयैक
5	11	शाषा	शोषा	53	9	[पूर]	[पूज]
8	7	विन्यय	विन्यस्य	59	4	शक	शकं
9	15	सा ह्य	सङ्गृह्य	74	19	बहुषः	बहुशः
12	8	त्पकी	त्प्रकी	76	7	व स्तु	वास्तु
16	2	पीठ	पीठं	77	14	त्राद्य स्तु	त्राद्यास्तु
17	टि 3	मथा	मथा	79	12	मुद	मृद्
24	5	ब्रह्म	ब्रह्मा	82	6	दोंशाः	दोषाः
26	16	विषं	विषं	82	19	मन्त्रैण	मन्त्रेण
29	1	द्घुने	द्घुने	84	10	सङ्ग्रः	सङ्ग्रहः
30	5	प्रार्थैवं	प्रार्थ्यैवं	85	6	पीठ	पीठं
32	13	द्येश	द्येश	86	13	श्वभ्रं	श्वभ्रं
34	20	कृ वा	कृत्वा	86	19	त्र्यृचैव	[ऋचैव]
36	19	रा मा	रात्मा	93	2	मन्ड	मण्ड
38	9	यच्च	येच्चे	98	10	ज्ञयः	ज्ञेयः
38	14	र्युक्ता	युक्ता	100	12	शस	रस
40	6	द्रव्य	द्रव्यं	103	टि 1	तार्त्	मात्
40	17	मन्त्र	मन्त्रं	103	23	स्पृ्य	स्पृश्य
105	19	न्तया	न्त्य	180	2	शेश	शेषतः
106	6	सकें	सके	181	2	शिश्य	शिष्य

पृष्ठम्	पंक्तिः	अशुद्धं	शुद्धं
112	15-20	विश्वक्	विष्वक्
113	15	तत्र	त्तत्र
114	3	शनैं	शने
117	14	इ ां	इत्येवं
121	23	केंसर	केसर
121	टि	घा र	कार
123	9	ऋषी	षुधी
124	14	तद्यौश	तद्योष
126	13	करैः	किरैः
127	3	मामाह्य	मावाह्य
127	18	षनिर्वै	निषवैः
128	3	चाग्नि	चाग्नि
128	19	द्धर्थं	द्धार्थं
130	6	युक्ष्य	युंक्ष्य
130	9	तुगृ	तुगृं
131	14	मन्त्रैघृ	मन्त्रैघृं
135	4	दशक	दशकं
135	14	त्रिंशतै	त्रिंशतै
136	टि 6	अस्त्रं	अस्त्रं
137	2	धात्री	धात्री
137	23	न्यं	न्यैः
143	13	चूर्णेन	चूर्णेन
149	10	तांने	ताने
150	15	सन्पूर	सम्पूर
151	13	पङ्कज	पङ्कजं
151	15	चत्वारि	चत्वारि
158	5	तग्रां	ताग्रां
159	17	सङ्कल्पै	सङ्कल्प्यै
163	20	नत्वानि	तत्वानि
164	4	तस्मित्	तस्मिन्
167	6	विष्णो	विष्णवो
168	2	म्यैका	म्यैका
172	17	पाद्य	पाद्या
172	19	पू ये	पूरबे
174	14	त्यार्थे	त्यार्थे
175	3	पञ्चा	पंश्चा
176	15	पञ्चाष	पञ्चाश

पृष्ठम्	पंक्तिः	अशुद्धं	शुद्धं
181	4	पुष्ब	पुष्प
194	17	यि वा	यित्वा
197	16	स्वक्रीये	स्वकीये
204	6	वेदाद्यैदु	वेदाद्यैदुं
208	7	ब्राह्मो	ब्राह्मीं
209	4	प्राक्षाळच	प्रक्षाळच
222	22	पश्चादु	पश्चाददु
230	3	भुक	भुक्
235	18	शेशिकं	शेषिकं
238	10	दीव	दीप
239	7	यित्रिया	यत्रिया
239	22	स्वानाम	स्वनाम
240	1	श्री व	श्रीप्रदः
244	9	पू ये	पूरये
250	2	षोडषे	षोडशे
254	22	दूर्वाद	दूर्वांद
255	14	होमाश्च	होमांश्च
257	14	क्ष्वैकैकमे	क्ष्वेकैकमे
262	9	कौतुक	कौतुकं
263	13	प्रदक्षि-	प्रदक्षिणं
267	6	प्राज्ञ	प्रज्ञा
267	19	ग य	गाय
274	7	मूलेः	मूले
274	8	चापं	चाषं
274	8	आवह्य	आवाह्य
274	8	याथा	यथा
276	9	मन्डनं	मण्डपं
276	12	नैवा	नैव
278	9	वाहितो	वहितो
279	5	सर्पि	सर्पिः
280	5	बहिव्र	बहिर्व्र
281	19	स्कातं	स्कान्तं
285	22	मन्त्रैमू-	मन्त्रैर्मू
286	17	क्समस्या-	क् समस्ता
286	टि 1	व्यस्न	व्यस्त
289	8	पाद्य	पाद्यं
292	2	सूत्र	सूक्त

राष्ट्रिय संस्कृत संस्थान
जयपुर परिसर, जयपुर
पुस्तकालय
क्रमांक...15299

के. वासुदेवसोमयाजी

एतत्कर्तृका ग्रन्थाः

प्रकाशिताः

१. क्षयमासमीमांसा
२. गुरुनरसिंहसुप्रभातम् [कर्णाटकभाषाभावार्थोपेतम्]
३. भारतीयधर्मदर्शन [कर्णाटकभाषायाम्]
४. अनुष्ठानपद्धतिः [तृतीयमुद्रणम्]
५. क्रियासारः [द्वितीयमुद्रणम्]
६. लक्षणसंहिता
७. वासिष्ठसंहिता
८. विनायकोदयः
९. ऋग्वेदीयनित्यानुष्ठानपद्धतिः [सन्ध्यादि]
१०. शिवपञ्चायतनपूजा

प्रकाशनीयाः

१. विष्णुसंहिता [सव्याख्या]
२. आशौचनिर्णय [कर्णाटकभाषायां]

प्राप्तिस्थानम् : के. वासुदेवसोमयाजी ☎ ५६३४२८
'मनीषा' १४६९/१, कृष्णमूर्तिपुरम्, मैसूरु–५७० ००४